॥ श्रीः ॥

विद्याभवन संस्कृत ग्रन्थमाला

१०४

॥ श्रीः ॥

संस्कृत-भाषा-विज्ञानम्

अनुवादक

चक्रवर्ती श्रीरामाधीनचतुर्वेदी

व्याकरण-साहित्याचार्यः

चौखम्बा विद्याभवन, वाराणसी

प्रकाशक—

चौखम्बा विद्याभवन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा विक्रेता)

चौक (जनरल स्टेट बैंक भवन के पीछे),

पो० बा० नं० १०६९, वाराणसी २२१००१

दूरभाष : ३२०४०४

सर्वाधिकार सुरक्षित

मूल्य [illegible]

प्राप्ति स्थान—

चौखम्बा सुरभारती प्रकाशन

के० ३७/४२०, गोपालमन्दिर लेन

पो० बा० नं० ११२६, वाराणसी २२१००१

दूरभाष : ३३३४३९

चौखम्बा संस्कृत प्रतिष्ठान

(कृष्णदास अकादमी के प्रकाशक एवं विक्रेता)

१८ यू. ए., जवाहरनगर, बंगले रोड

पो० बा० नं० २११९

दिल्ली ११०००७

दूरभाष : २३६३९१

मुद्रक—

फूल प्रिण्टर्स

वाराणसी

THE
CHOWKHAMBA SANSKRIT GRANTHAMALA
104
SERIES

SANSKRIT BHĀṢĀ VIJÑĀNAM

(A Epitome of Science of Sanskrit Language)

BY

PT. RĀMĀDHĪNA CHATURVEDĪ,
(Vyākaraṇa-Sahityāchārya)

THE
CHOWKHAMBA VIDYABHAWAN
VARANASI-1
1963

THE
VIDYABHAWAN SANSKRIT GRANTHAMALA
104

SANSKRIT BHĀṢA VIJÑĀNAM

(A Philological Study of Sanskrit Language)

BY

PT. RĀMĀDHĪNA CHATURVEDĪ,
(Vyākaraṇa-Sahityāchārya)

THE
CHOWKHAMBA VIDYABHAWAN
VARANASI-1
1963

© CHOWKHAMBA VIDYABHAWAN
(*Oriental Publishers & Booksellers*)
CHOWK (Behind The Benares State Bank Building)
Post Box No. 1069
VARANASI 221001

Telephone : 236391

Also can be had of
CHAUKHAMBA SURBHARATI PRAKASHAN
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
VARANASI 221001

Telephone : 333431

CHAUKHAMBA SANSKRIT PRATISHTHAN
38 U. A., Jawaharnagar, Bunglow Road
Post Box No. 2113 DELHI 110007
Telephone : 236391

पूज्यपादपितृचरणानां

करकमलयोः

सादरमिदं

समर्प्यते

भारत शासन द्वारा सम्मान पद प्राप्त तथा वाराणसेय
संस्कृतविश्वविद्यालय के सम्मानित प्राध्यापक

म० म० पण्डित श्रीगिरिधरशर्मा चतुर्वेदीजी महोदय

की

शुभ सम्मति

श्रीरामाधीन शास्त्री व्याकरणाचार्य का 'संस्कृतभाषाविज्ञानम्' नामक ग्रन्थ को मैंने सावधानी से पढ़ा। यह विषय संस्कृत भाषा में नवीन है, हिन्दी भाषा में अंग्रेजी से लेकर इस विषय पर जो ग्रन्थ लिखे गए हैं, लेखक ने उन सभी की आलोचना भी इस ग्रन्थ में की है, विषय और शैली की नवीनता इसमें प्रस्फुटित है।

भाषाघटित शब्दों की उत्पत्ति के सम्बन्ध में भारतीय दर्शनों के सिद्धान्तानुसार इस ग्रन्थ में लेखक ने जो विचार व्यक्त किये हैं, उनमें उच्च विचार हिन्दी भाषा के ग्रन्थों में नहीं पाये जाते। 'शब्दनित्यता' के पुराने सिद्धान्त पर भी इसमें नवीन उक्तियाँ दी गई हैं।

भाषा-परिवर्तन के कुछ नियमों का संकलन भी लेखक ने किया है—जो बिल्कुल नई वस्तु है। संस्कृत के प्रसिद्ध ग्रन्थों से उन नियमों का निकालना लेखक की अन्वेषणपटुता को प्रत्यक्ष दिखा रहा है। जो जो विषय नवीन कहकर भूमिका में उल्लिखित हैं, उनके इस शैली से प्रतिपादन में अवश्य नवीनता प्रतीत होती है। प्रयत्नादि के सम्बन्ध में प्राचीन ग्रन्थकारों की कुछ त्रुटियाँ भी अच्छी तरह प्रदर्शित हैं। संस्कृत भाषा के शब्दों से भिन्न-भिन्न भाषाओं के शब्द कैसे बने, इसका प्रकार भी रोचक और नवीनता से युक्त है। निबन्ध की भाषा सरल किन्तु प्रौढ़ है।

शरत्पूर्णिमा
वि० सं० २०२०

—गिरिधरशर्मा चतुर्वेदी

काशीहिन्दूविश्वविद्यालयीयसंस्कृतमहाविद्यालयस्य
कृतकार्याध्यक्षाणां

पण्डित श्रीकालीप्रसादमिश्रमहोदयानां

शुभसम्मतिः

व्याकरणशास्त्राचार्यश्रीरामाधीनशर्मचतुर्वेदेन श्रममननाभ्यां संस्कृतवाङ्मयं निर्मथ्य प्रादुर्भावितमिदमभिनवं सोपज्ञं संस्कृतभाषाविज्ञानं नाम पुस्तकरत्नमुद्यद्दिनेशज्योतिरिव गवेषणाकाननं विनाक्षोभं तरीतुकामैः परिष्कृतपथस्य प्रदर्शने साधीयः साहाय्यमाचरिष्यतीति मे दृढो विश्वासः। ये तु पाश्चात्यविद्वद्भिर्दत्तमिदं भाषाविज्ञानमिति बम्भ्रम्यमाणा भारतीयवैदिकविदुषाञ्चैतदनभिज्ञतां घोषयन्तिस्म तेषां विनयविवेकावुपहसति, भाषाविज्ञानपदार्थयोर्विवेचनया पाश्चात्यविदुषां भाषापदार्थज्ञानस्य वैखरीवाङ्मात्रविषयतया अतलस्पर्शितां प्रकाशयति च।

संस्कृतवाङ्मयाब्धिमन्थनमन्दरायमाणधीषणेन विदुषाऽनेन प्रत्यग्रविवेचनप्रणाल्या भाषापदार्थो विविधं विवेचितः। येयं विवेचना प्रणाली प्रकाशिताऽस्ति, सा यद्यपि पुराणी प्रमाणी च, तथाप्यज्ञातस्वस्य रागान्धस्य परकीयं फल्ग्वपि वस्तु मोहस्य कारणतां भजत इति अस्याः प्राक्तनतायां प्रमाणतायाञ्च विपुलं प्रायस्यल्लेखकमहोदयः। तथाहि-भाषेयं कुतः कथञ्चागता? किमु तपोमहात्म्यात् स्वर्लोकाद्भगवती भागीरथी भगीरथेनेव केनचिदतीन्द्रियानसंवेद्यान् पदार्थान् आर्षेण चक्षुषा पश्यता ऋषिणा मुनिना महर्षिणा वा गीर्वाणलोकादनिर्वचनीयेन तपसा समानीतेति? अथवा विकासवादिनां केषाञ्चिन्मतेन पदार्थानां क्रमिको विकास इव भाषाया अप्यावश्यकतानुसारेण शनैः शनैर्विकासो जातः? तेषु केचिदनुकरणाद्भाषायाः प्रादुर्भावं व्याचक्षते। अपरे हर्षातिरेकादुद्वेगाच्च मनुष्यमुखात् केचिद् ध्वनयो निःसृताः, तदनु तैरेव हर्षविस्मयादिबोधकध्वनिरूपशब्दैर्भाषोद्गमो जात इति जल्पन्ति, इति सर्वं कल्पनापोढं निरस्यावगाह्य च संस्कृतसाहितीसुधाब्धिं तदन्तस्तलान्मुक्ताफलानिव भाषायाः प्रादुर्भावादिविज्ञानानि सहृदयहृदयसम्मतानि वस्तुजातानि ग्रन्थेऽस्मिन् प्रकाशितानि सन्तीति अभूतपूर्वप्रचुरविचारराशिरयं ग्रन्थ इति व्याकरणैरन्यैश्च संस्कृतविद्वद्भिर्विद्यार्थिभिश्च द्रुतं हस्ताहस्तिकया संग्राह्य इति विज्ञापयति—

कार्तिककृष्णाष्टमी
वि० सं० २०२०

कालीप्रसादमिश्रः

भूमिका

अर्वाचीन विज्ञानयुगे भाषाविज्ञानस्यापि सुमहत्स्थानं वर्तत इति सुविदितमेव तत्र भवतां विपश्चिताम्। विज्ञानं चेदमनया पद्धत्या आधुनिकयुग एव परितो विवेचितं मनीषिभिरित्यपि सत्यम्। नहि संस्कृते साम्प्रतिकशैल्या भाषाविषयकं विशिष्य विवेचनमेवंविधं समुपलभ्यते।

संस्कृते हि वेदाः प्रधानम्, प्राचीनता च तेषां जगतः समुपलभ्यमान-ग्रन्थेषु सर्वसंमता। तत्र तावदस्ति न वा भाषावैज्ञानिकं भाषाविषयकं वा विमर्श-निदानमिति भाषातत्त्वजिज्ञासुभिरवश्यमन्वेषणीयं भवति। भाषाविषयिकाध्ययन-प्रवृत्तिर्मुख्यतो भाषाणां परस्परं कञ्चन साम्यविशिष्टं भेदमवलम्ब्येव जाता। भाषा-भेदे च सन्ति बहूनि अशक्त्यशिक्षादीनि कारणानि, तानि च निबन्धेऽस्मिन्नुप-पादितानि।

अस्तु! वैदिकवाङ्मयेऽपि भाषाभेद आलोक्यते, स च यद्यपि विशुद्ध-भाषायां दोषप्रसक्तिरूपः पुनरपि ततो भेदबुद्धिस्तु जायते।

तथाहि ऋग्वेदे—

इमे येनार्वाङ् न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः।
त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः[1]॥

अर्थात् इमे ये अविद्वांसः अर्वाक् अर्वाचीनमधोभाविन्यस्मिन् लोके ब्राह्मणैः सह न चरन्ति परः परस्ताद् देवैः सह न चरन्ति ते ब्राह्मणासो ब्राह्मणा वेदार्थ-तत्परा न भवन्ति, तथा सुतेकरासः 'सोमं सुतमभिषुतं कुर्वन्तीतिसुतेकरासः ऋत्विजः तेऽपि न भवन्ति, अप्रजज्ञयः अविदांसः त एते मनुष्याः वाचं लौकिकम् अभिपद्य—प्राप्य तया पापकारिण्या वाचा युक्तास्ते सिरीः—सीरिणः कर्षका भूत्वा तन्त्रं कृषिलक्षणं तन्वते विस्तारयन्तीति मन्त्रार्थः। एतावता मन्त्रवागपेक्षया कर्षकाणां वाचि वैलक्षण्यमवगम्यते।

तत्राशिक्षा कारणम्। साम्प्रतमपि शिक्षिताः साधूच्चारयन्ति, अशिक्षिताश्चा-न्यदुच्चारयन्ति। यत्र विज्ञा 'विद्वान्' इति वदन्ति, तत्राविज्ञा 'विद्यमान्' इति। एवम्—'आत्मा, 'परमात्मा' इत्यनयोः शब्दयोरुच्चारणम् 'अतमा' परमतमा इति क्रमशः कृषकैः क्रियते। प्रायः एवंभूतेषु शब्देषु नोच्चारणलाघवम्, नाप्यालस्यम्, न च 'ऋतक्' शब्दस्थाने 'लृतक्' शब्दवदशक्तिः कारणम्, किन्तु शिक्षाऽभावः कारणम्। तथा च अशिक्षाया भाषाभेदे प्रधानस्थानम्।

---

१. ऋग्वेद अ० २, व० २४, म० १०, सू० ७१।

अपि विद्वांसस्तदा कथं ब्रुवतेस्मेति विचारे ऋग्वेदे तत्रैवोक्तमस्ति—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ॥

यथा सतुर्यं सक्तुम् तितउना—चालिन्या विशोध्य स्वीकुर्वन्ति मनुष्याः, तथैव विद्वांसो विविच्यापशब्देभ्यः साधुशब्दान् व्यवहरन्ति स्मेति भावः । एवंच तदानीमपि शुद्धवाचि दोषप्रसक्तिः स्पष्टमवगम्यते ।

अतः परं ब्राह्मणग्रन्थेषु भाषाभेदोऽयं 'दैवी वाग्' 'मानुषी वाग्' इति नामतः स्पष्टोऽभवत् । तद्यथा—

'स यदिदं पुरा मानुषीं वाचं व्याहरेत् ततो वैष्णवीमृचं वा यजुर्वा जपेत्'[१] ।

अपि च 'शर्मासीति' मन्त्रस्य ब्राह्मणे 'चर्म वा एतत् कृष्णस्य तदस्य तन्मानुषम्, शर्मदेवत्रा तस्मादाह शर्मासीति ।'

तदेवंविधानेकवचनैर्भाषाद्वयव्यवहारो जनेषु प्राचलदिति दृश्यते । अत्रेदमपि सहैवावगम्यते यद् भेदोऽसौ साधारणः, न तु संस्कृत-पालि-ग्रीक-लैटिनप्रभृतिभाषावद् मौलिकः । पुरा साम्प्रतं च यज्ञादिकाले देवभाषयैव व्यवहारः प्राचलच्चलति च, साधारणवार्तासु च न तथा नियम इति नियतः खलु पन्था आसीदस्ति च । परन्तैतावतोर्भयोर्महद् वैलक्षण्यमनुमादयितुं शक्यते । यतो हि ब्राह्मणविख्यातभाषाद्वयीधारा निरुक्तकृद्यास्क-पाणिनिपर्यन्तं प्रवहन्ती दृश्यते । तत्र भगवता यास्केन 'नेति प्रतिषेधार्थीयो भाषायाम्', उभयमन्वध्यायमित्युक्त्वा तयोर्भाषयोरैक्यमेव सूचितम् । यदि च निषेधवाचको लौकिको नकारः वेदे निषेधवाचकत्वे सति, उपमावाचकश्च स्यात्तर्हि न तेन कृतमन्यद् बहु, यतः शब्दानामेकार्थत्वे नानार्थत्वे वा आप्तव्यवहारादयः कारणानि भवन्ति । ततश्चैकत्र निषेधार्थे उपमार्थेऽपि, अपरत्र केवलं प्रतिषेधार्थे आप्तव्यवहारो जात इति मन्यते । महर्षिपाणिनिनापि 'चतुर्थ्यर्थे बहुलं छन्दसि' २-३-६२ 'प्रथमायाश्च द्विवचने भाषायाम्' ७-२-८८ इत्येवंविधसूत्रैस्तयोः साधारणत्वमेव प्रतिपादितम् । तद्वै दैवी मानुषीति भाषा—भाषाद्वय यास्क-पाणिनिकाले छन्दः, भाषेति च नाम्ना जातम् ।

अर्थात् ब्राह्मणकाले या वैदिकी वाक् सा दैवी वाक्, या तु ततः किञ्चिद्भेदमापन्ना व्यावहारिकी वाक् सा मानुषी वागित्युच्यतेस्म । साम्प्रतं च तामेव मानुषीं वाचं संस्कृतं संस्कृतमिति व्यवहरन्ति जनाः । परमुभयोर्देवभाषेतिपदेन ग्रहणमिति विवेकः ।

तत्रोभयत्रापि अशिक्षादिदोषविशेषवशाद् अपभ्रंशा आपतिताः, त एव च बहुलीभूताः कालान्तरे भाषान्तरनिर्माणहेतवो जाताः । तदनु तत्रापि निर्दिष्टकारण-

---

१. शत० ब्रा० का० १—ब्रा० ४ ।

कलापैः ततोऽपि विकृतशब्दा निपतन्तिस्म, तेभ्यश्च भाषान्तराणीति नानाभाषाकल्पकबीजम्। अतएवाधुना केवलं भारत एव पंचविंशोत्तरशतद्वयं (२२५) भाषोपसंख्यानं जातम्। यद्यप्येतासां सर्वासां मुख्यत्वेन नास्ति गणना, अथापि भाषाविचारदृष्ट्या तत्सत्तेति समवगन्तव्यम्। अस्तु!

ब्राह्मणग्रन्थेषु न केवलं भाषाभेदविचारो दृष्टः श्रुतश्च, अपितु भाषावयवभूतानां शब्दानामर्थानुरूपं निर्वचनं बहुलमुपलभ्यते। सन्ति श्रुतिसूक्तयश्च बहवो यतो भाषाविषयकविचाराणां लक्ष्यते प्रादुर्भावः। श्रुतिसूक्तसहितानि तानि निर्वचनान्येव च वाङ्मयमभिलषतां मनीषिणामाधारशिला, तामादायैव विज्ञानं किंचिदचलत् प्रचलिष्यति च बहु। यद्यपि बहवो भाषाविचारकाः प्रायः तेभ्यो निर्वचनेभ्यो वैदिकभाषातः प्राचीना कापि भाषा आसीद् यतो वेदभाषा निष्पन्नेति समुदं मन्यन्ते तत्तु बुद्धौ नावरोहति निबन्धकर्त्रेति निबन्धेऽस्मिन् विवेचितम्।

अत्र च तान्येतन्निबन्धाधारभूतानि निर्वचनानि कानिचिदुपन्यस्यन्ते—यतः शब्दस्य प्रवृत्तिनिमित्तं शक्यतेऽधिगन्तुम्।

तत्र तावत् तैत्तिरीयब्राह्मणे—

'वाग्वा अर्बुदम् वाचमेवावरुन्धे'।[१] इति

(काण्ड ३ प्रपा० ८ अनु० १६)

स्वाहा—

तं वागभ्यवदज्जुहुधीति, सोऽब्रवीत् कस्त्वमसीति,
स्वैव ते वागित्यब्रवीत् सोऽजुहोत् स्वाहेति तत्स्वाहाकारजन्म[२]।

कां० २ प्र० १ अनु० २।

मातरिश्वा—

अथ यद्दक्षिणतो वाति मातरिश्वैव भूत्वा दक्षिणतो वाति।[३]

कां० २–प्र० ३–अनु० ९।

---

१. वाग्देवतायाः शब्दविशेषाणां बहुविधित्वात्सैवार्बुदमित्युपचर्यते अतो वाचमेव प्राप्नोति, वाच एव भूमानवरुन्धे, इति तद्भाष्यम्।

२. तं होमविषये सन्दिहानं प्रजापतिं काचिददृश्या वाग् जुहुधीत्यब्रवीत् ततः प्रजापतिना कस्त्वमिति पृष्टे सति स्वकीया या वागस्ति सैवाहमित्यब्रवीत्। ततः प्रजापतिः स्वाहेत्युच्चारयन्नजुहोत्, स्वकीया वाग् जुहुधीत्याह इत्यर्थः।

३. यदा वायुर्दक्षिणस्यां दिशि संचरति तदा मातरिश्वेति तस्य नाम ध्यातव्यम्। मातरि–अन्तरिक्षेश्वयति वर्धते, मातृवन्नयति इव वा मातरिश्वा, सर्वेषामाप्यायनकारी–इति भावः।

पवमानः

अथ यत्पश्चाद् वाति पवमान एव भूत्वा पश्चाद्वाति[1]

प्राणः

'स यत्पुरस्ताद्वाति प्राण एव भूत्वा पुरस्ताद् वाति'

सविता—

अथ यदुत्तरतो वाति सवितैव भूत्वोत्तरतो वाति

तथा च शतपथब्राह्मणे—

इन्द्रः

'सोऽयं मध्ये प्राणः, एषेन्द्रस्तानेष प्राणान् मध्यत इन्द्रियेणैन्द्धत तस्मादिन्ध, इन्धो ह वै तमिन्द्र इत्याचक्षते परोक्षम्, परीक्षकामा हि देवाः। (६-१-१-२२)

स्वप्नाः—

प्राणं स्वा आपियन्ति तस्मात् स्वाप्ययः, स्वाप्ययो ह वै तं स्वप्ना इत्याचक्षते। (१०-३-६)

पुरुषः—

इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां परिशेते तस्मात्पुरुषः। (१२-६-२१)

गोपथब्राह्मणेऽपि तदेवम्—

पुरुषः—

प्राण एव स पुरिशेते इति पुरिशयं सन्तं प्राणं पुरुष इत्याचक्षते परोक्षेण' (१-१-३९)

वरुणः—

'यच्च वृत्वातिष्ठत्तद् वरणोऽभवत्तं वा एतं वरणं सन्तं वरुणइत्याचक्षते परोक्षेण' (१-७)

मानुषः—

'युद्ब्रुवन् मेदं प्रजायते रेतो दुपदिति तन्मादुषमभवत्तन्मादुषत्वं मादुषं ह वै नामैतद्यन्मादुषं सन् मानुषमित्याचक्षते' (ताण्ड्यम० ब्रा० ८-२-१०)

किंच आरण्यके—

पुरुषः—

पूर्वमेवाहमिहाऽऽसमिति तत्पुरुषस्य पुरुषत्वम्' (तैत्ति० आ० २३।१।२)

---

१. यथा स वायुः पश्चिमायां दिशि संचरति तत् पवमान इति तस्य नाम शोधक इत्यर्थः।

एवमुपनिषत्स्वपि सन्ति बहूनि निर्वचनानि—तत्र त्रीणीहोपस्थाप्यन्ते।

अङ्गिराः—

"अतो हीमान्यंगानि रसं लभन्ते तस्मादंगिरसः।"

(जैमिनी० उप० २।४।२।८)

अन्तरिक्षम्—

'यदस्मिन्निदं सर्वमन्तस्तस्मादन्तरिक्षम् अन्तयक्षं हवै नामैतत् तदन्तरिक्षमिति परोक्षमाचक्षते'। (जैमिनी० उप० १।२०।४)

स्वपिति

यत्रैतत्पुरुषः स्वपिति नाम सता सौम्य तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते। (छान्द०—उप०—६—८)

तदेवंविधसमुपलभ्यमाननानानिरुक्तिभिः शब्दस्य प्रवृत्तिनिमित्तमनुमीयते, न तु पुरा कश्चन विस्तृतः शब्द आसीद् यतः संक्षिप्येदं रूपं जातमिति शक्यतेऽभिधातुम्।

निष्कर्षस्तु वैदिकवाङ्मय एव वाग्विषयको विचारः सूत्रात्मकः किंवा निर्वचनरूपेण नातिबहूपलभ्यत एव।

अतः परं वेदानां यानि शिक्षा, निरुक्तम्, व्याकरणम्, छन्दः, कल्पः, ज्योतिषमिति षडंगानि सन्ति, अनुष्टुपा च।

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।[१]

इत्येवमुक्तानि, तेषु भाषाविज्ञानमिदं शिक्षा निरुक्तम् व्याकरणमिति त्रयं बहुतरं विगाहते।

तत्र तावत् शिक्षायां वर्णस्वरमात्रादीनामुत्पत्तिसंख्यादिविवेचनं विज्ञानपूर्णं प्रतिभाति। अत्रेदमवधेयम्—यद् भाषाया ध्वनिः, पदम, वाक्यम्, अर्थ इति चत्वारि स्वाङ्गानि सन्ति। तत्र ध्वनिविमर्शः ध्वनिविज्ञानं वा शिक्षाग्रन्थेषु तदनु प्रातिशाख्येषु समुपलभ्यते। वर्णोत्पत्तिमधिकृत्य बहवो विचाराः संस्कृते संपन्नाः, तत्र कथं ध्वनिः वर्णरूपं भजते, कानि तेषामभिव्यञ्जकस्थानानि, कियती च तत्संख्या, वर्गीकरणं च वर्णानां कथमित्यनेकविधं तद् विवेचनं शिक्षादिग्रन्थेषु विकीर्णं दरीदृश्यते। तद्यथा पाणिनीयशिक्षायामुक्तम्—

---

१. पाणि० शि० श्लोक ४१—४२

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णाञ्जनयते तेषां विभागः पञ्चधा मतः ॥
स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः, इत्यादिना ।

अपि च वर्णोच्चारणे कथं प्रवर्तितव्यम् , संयुक्ताः शब्दाः कथं संग्राह्या इत्यादेर्निदर्शनं शिक्षासु सुस्पष्टम् ।

तद्यथा—

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ॥
यथा सौराष्ट्रिका नारी तक्रमित्यभिभाषते ।
एवं रङ्गाः प्रयोक्तव्याः खे अराँ इव खेदया ॥

(पा० शि० २५-२६)

इत्थं च नानावचनैरिदमवबुध्यते यच्छब्दोच्चारणे सर्वदा सावधानेन भवितव्यमिति शिक्षा, एतदथा विकृताः शब्दा निपतिष्यन्ति, ततश्च समाजे उच्चारयितुरुपहासः सर्वतः पराभवश्च प्रसिद्ध एव "ते सुरा हेलयो हेलय इति कुर्वन्त पराव ब्रुवि"ति महाभाष्योपन्यासात् । तत्रैव पातञ्जले सम्यग्वर्णप्रयोगस्य महत्फलमप्युक्तम्—'एकः शब्दः सम्यग्ज्ञातः सुष्ठुः प्रयुक्तः स्वर्गे लोके च कामधुग्भवति' इत्यनेन । अतएव याज्ञवल्क्यशिक्षायां संयुक्तवर्णानामुच्चारणप्रकारो दृष्टान्तमुखेनोक्तः, तद्यथा—

यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम् ।
एवं वर्णाः प्रयोक्तव्या "युञ्जान" इति दर्शनम् ॥ श्लो० १८२

अयम्भावः—यदा पुत्रवती स्नेहवशात् पुत्रं चुम्बति, तदानीं यथा तदोष्ठयोः संकोचः संपद्यते तथैव 'युञ्जान' इति पदप्रयोगेऽपि संपद्यताम् । यदि लाघवात्तथा न बोभवीति तदा 'युजान' इति जायते । अत्र च तत्पदप्रवक्तारः प्रमाणम् , इदमेवास्य वैज्ञानिकं तथ्यम् , स्वल्पेनाप्यनवधानेन स्वस्थानभ्रष्टा वर्णा बहुविकृतिमालभन्ते, विकृताश्च ते विपरीतार्थमप्यावहन्ति । यथा—'मधुर-माहुर, स्तुति-थुई' इति । भवतु प्राकृते 'थुई' इति पदेन स्तुतिरूपार्थबोधः किन्तु लोके अधुना 'थुई' इत्यनेन निन्दैवावगम्यते, तत्पदद्वित्वे (थुइ थुई) जाते तु महानुपहासः संव्यज्यते । एवं क्षोभ इत्यस्य विकृतरूपम् 'छोह' इति तत्र क्षोभपदं कष्टरूपार्थं बोधयति 'छोह' इति प्रेमास्पदं दधाति, अत्रार्थान्यत्वं स्पष्टम् । तथा च महाकवितुलसीदासोप्याह—

'तजब छोभ जनि छाड़िअ छोहू' इति पद्ये विकृतेन पदेनार्थभेदम् । अत्र विपरीतार्थबोधे किंवा अन्यार्थबोधे को हेतुः इति प्रश्नस्योत्तरमग्रे स्पष्टं भविष्यति ।

महर्षीणामुपर्युक्तं प्रयतनञ्च सुशब्दे अपशब्दा मा भवन्त्विति सम्पादयितुमेव जातम्।

एवम् ऋग्वेदप्रातिशाख्येऽपि—

वायुः प्राणः कोष्ठ्यमनुप्रदानम्
कण्ठस्य खे विवृते संवृते च
आपद्यते श्वासतां नादतां वक्त्रीहायाम्।

(ऋक्० प्रा० ३१-१)

इत्यादिसूत्रैर्वर्णोत्पत्तिप्रकारः प्रदर्शितो विद्यते। अन्येषु च शुक्लयजुःप्रातिशाख्येष्वेवमेव वर्णस्वरादीनामुत्पत्तिक्रमविवेचनं निष्पन्नम्। तदित्थं षडङ्गेषु शिक्षाध्वनिविज्ञानमवगाहते। एतच्च निरूपितं ध्वनिविमर्शप्रकरणे।

तदनु निरुक्ते शब्दानामर्थानुरूपं निर्वचनम्, तदंगत्वेन वर्णागम-वर्णलोप-वर्णव्यत्यय-वर्णविकाराणां निदर्शनं सुकृतमस्ति। अर्थात् दुहिता, वासर, दक्षिणादिशब्दाः स्वार्थेषु कथं प्रवृत्ताः, पदस्य सम्भाविता अवयवार्थाश्च कथं संपन्ना इत्येतद् विवेचना निरुक्ते वरीवर्ति। तत्र समुपलभ्यमाने यास्कनिरुक्ते पदविभागो नामाख्यातोपसर्गनिपातरूपेण समालोच्यते, यन्निर्देशस्तावद् ऋग्वेद एव। तथाहि—

चत्वारि शृङ्गा त्रयो अस्य पादाः
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महोदेवो मर्त्याँ आविवेश॥

(अष्ट० ३, अ० ८, व० १० सू० ५८)

व्याख्यातं चैतन्महाभाष्ये—चत्वारि शृंगाणि—चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च, त्रयोऽस्य पादाः—त्रयः काला भूत-भविष्यद्-वर्तमानाः द्वे शीर्षे—द्वौ शब्दात्मानौ नित्यः कार्यश्च, सप्तहस्तासो अस्य—सप्तविभक्तयः त्रिधा बद्धः—त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसीत्येवम्। एतावता भाषाबन्धनम्, तदवयवानां स्वरूपबोधश्च वेदतो लभ्यत एव। अस्तु! भगवतो यास्कात् प्राग् गार्ग्य-कौत्स-शाकटायनप्रभृतयो महर्षयो बभूवुः। ते च पदविभागेषु सर्वाणि नामानि धातुजानि? अपि वा कानिचिदेव? किञ्चार्थनिधारणे उपसर्गा वाचका उताहो द्योतका इत्येवंभाषाविषयकमनेकविधं प्रश्नमुद्भाव्य तत्त्वनिरूपणे निरता एव दृश्यन्ते स्मेति निरुक्तादालोच्यते। तत्र शाकटायनः सर्वाणि नामानि धातुजानीति मन्यते, गार्ग्यस्तु तथा न मन्यते, यतो हि बहून्येवंभूतान्यपि मणिनूपुरसत्यसरूपाणि नामानि सन्ति यत्र धातवो न लक्ष्यन्ते। तस्मादेव पाणिनिः अव्युत्पन्नशब्दानां प्रातिपदिक

संज्ञासिद्ध्यर्थम् 'अर्थवदि'ति पृथक्सूत्रं कृतवान् । सर्वव्युत्पन्नत्वे तु द्वितीयेन 'कृत्तद्धि-तसमासाश्च' (१। २।४६) इति सूत्रेणैव सर्वत्र प्रातिपदिकसंज्ञा सिद्धा भवेत् । ततश्च केचन वैयाकरणा अपि शाकटायनमतं न स्वीकुर्वन्ति । 'सत्यशब्दे का प्रकृतिः कः प्रत्यय इत्यस्यावबोधो न भवति वस्तुतः । तथापि शाकटायनः, तत्र 'अस्' 'इण्' इति धातुद्वयं संभाव्य सत्यं साधयति ।

तथा चोक्तम्—

'एतेः कारितं च यकारादिं चान्तकरणमस्तेः शुद्धं च सकारादिं च[१]। इत्यादिना ।

एवं यत्र गार्ग्यः, उपसर्गा वाचका भवन्तीति समधिगच्छति, तत्र शाकटायनो द्योतका इत्युद्घोषयति । अर्थात् गच्छतीति आख्यातपदमेवागमनरूपार्थमपि बोध-यति, तत्राङ्गित्युपसर्गपदन्तु दीपवद्द्योतकमिति शाकटायनप्रभृतयः ।

गार्ग्यमतावलम्बिनस्तु 'आ इत्यर्वागर्थे' अभीत्यभिमुख्यम्, प्रतीत्यस्य प्राति-लोम्यम् इत्येवं स्वातन्त्र्येणापि वाचका भवन्तीति वदन्ति । अत्राधिकं ज्ञानन्तु तत एवावगन्तव्यम् ।

अपरं चार्थविषयमवलम्ब्य महद्वैज्ञानिकं विवेचनमुपपादितं निरुक्ते । तत्रैक एव शब्दः सम्बन्धविशेषादर्थान्तरे कथं प्रवृत्तः, इत्यर्थविज्ञानं दक्षिणशब्दोपन्यासेन संप्रदर्शितम् । सारांशस्तु संस्कृते उत्साहार्थको दक्षधातुः प्रसिद्धः, उत्साहशीलत्वा-देव सव्येतरबाहौ दक्षिणशब्दः प्रवृत्तः, तदनु सूर्याभिमुखं तिष्ठन् स हस्तो यस्यां दिशि भवति सा दिक् तत्सम्बन्धे दक्षिणादिगिति जाता । परिभ्रामन् पुरुषो यदा स्वदक्षिणं हस्तमेवोपास्यदेव दिशि गच्छति सा प्रदक्षिणा भवति. प्रदक्षिणक्रमेण ऋत्विजामागमनं भवति अतो हेतोः तत्सम्बन्धेन ऋत्विग्भ्यो दीयमानं धनमपि दक्षिणाशब्दाभिधेयमभूत् । क्रमेणानेन बहवः शब्दा दूरतरं गत्वा तत्र तत्र प्रति-नियता बभूवुः । येषामन्वेषणमर्थविज्ञानसापेक्षम् । साम्प्रतम् भाषाविज्ञानस्य प्रधानमङ्गमर्थविज्ञानमस्ति, तन्निर्देशस्तावन्महर्षियास्केनैव कृतः प्राक् । अतएव निरुक्तं भाषाविज्ञानमिति समयः ।

यद्यपि पदविभागो वेदादेवोपलभ्यत इत्युक्तं प्राक्, तथापि तद्विवेचनन्तु व्याकरण एव निष्पन्नम् । अतएव व्याकरणं पदशास्त्रमिति ब्रुवते । व्याक्रियन्ते शब्दा अनेनेति व्याकरणपदनिरुक्तिः । तथा च अव्याकृताः शब्दा व्याकृता भवन्ति, अर्थात् प्रकृतिप्रत्यय-विभागद्वारा संपरिज्ञायन्ते । पूर्वमव्याकृता एव शब्दा बभूवुः पश्चात्तत्र विभाग इत्युक्तं तैत्तिरीय-षष्ठकाण्डेऽपि—

---

१. निरु० अ० १–पाद ४ ।

'वाग्वै पराच्यव्याकृता अवदत् ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुरु इति, तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुद्यते' इति ।

अतएवप्रथमव्याकरणकर्ता इन्द्र एवेति व्यवहारः प्रचलितः । तथा चोक्तमस्ति शाब्दिकेषु प्रथममिन्द्रनाम—

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥

भवतु, वाग्विभागे व्याकरणमेव प्रधानं कारणम् । व्याकरणेषु च पाणिनीयं व्याकरणं सर्ववेदपारिषदम् । अत्र किल वैदिकानां लौकिकानांच शब्दानामनुशासनम् सुदृढैर्नियमैर्निष्पन्नमस्ति । नहि एवं भूतं वैज्ञानिकं व्याकरणं प्राक् पाणिनेः सर्वतः संपन्नमिति निश्चप्रचम् । यद्यपि यास्कमहर्षेः प्राक् शाकटायनप्रभृतयः शाब्दिका आसन्, ततः पश्चादपि प्राक्पाणिनेरनेके वैयाकरणा बभूवुस्तेषां विचारा नामान्यपि यास्कनिरुक्तात् पाणिनिसूत्रेभ्यश्चावगम्यन्ते, पुनरपि विवेचनमेतन्महामुनेरेव शेखरीभूतम् ।

तत्र तावन्माहेश्वराणां चतुर्दशसूत्राणां सन्निवेशविशेष एव महद् विज्ञानपदमर्हति । नहि तत्रैकेन वर्णेनानर्थकेन भवितव्यम् नापि व्यत्ययेन । किञ्च सर्वेषां ध्वनीनां सन्निवेशस्तुल्यजातीयानभिलक्ष्य जातः । अतएव वर्णोपदेशे नाज्झलोः संसृष्टिरस्ति । तदुक्तम् 'हयवरट' सूत्रमहाभाष्ये—

'एषा हि आचार्यस्य शैली लक्ष्यते यत्तुल्यजातीयांस्तुल्यजातीयेषूपदिशति अचोऽन्तु हलो हल्सु ।

अत्र शैलीपदेन समवधानपूर्विका प्रवृत्तिर्लक्ष्यत इति प्रदीपः ।

इयं हि महामुनेः पाणिनेः समवधानपूर्विका प्रवृत्तिर्लक्ष्यानभिलक्ष्यैव प्रावर्तत । तत्र सन्धिसूत्राणां प्रवृत्तिः स्वाभाविकी, नहि सुध्युपास्य इति पदमनादृत्य सुधी उपास्य इति लोको यतते वक्तुं प्रयत्नगौरवात् । स्वल्पव्ययेनाल्पकाले लघुप्रयत्नेन सर्वाणि कार्याणि भवेयुरिति जनानां स्वाभाविकी प्रवृत्तिः । अतएव 'मनोरथ' इत्युच्चारणे न 'केनापि मनारथ' इत्युच्यते । अशिक्षितावपि परस्परं मनोरथपदमेव वदतः, अत्रोकारापेक्षया आकारोच्चारणे विकृतत्वमधिकमायाति तदेव तस्य प्रयत्नाधिक्यं भवति । एवं नहि जगद्धितमिति प्रयोगं परित्यज्य जगत् हितमिति विलम्बोच्चारणे जगतः प्रवृत्तिर्दृश्यते, अपितु लाघवाज्जगद्धितं प्रयुञ्जते जनाः । यदि चेदत्रापि लघु भवेत्तदा तपशब्द एव सः । अधुना यो 'जग हित' इति पदेनोच्यते । जगद्धितमित्यत्र तकारस्य दकारः, हकारस्य च धकारो भवतीत्यत्रान्तरतम्यमेव कारणम्, तच्च स्थानप्रयत्नाभ्यां सिध्यति । वर्णः स्वभावतः स्वस्मिन् स्थाने एव, तत्रापि

व्यापारसाम्ये एव जायन्ते। एतच्च तत्स्वाभाविकं यतो यथा लोष्टः क्षिप्तो बाहुवेगं गत्वा नैव तिर्यग्गच्छति, नोर्ध्वमारोहति पृथिवीविकारः पृथिवीमेव गच्छति आन्तर्यतः, एवं यो वर्णः यस्यान्तरतमः स तस्य स्थाने भवतीति भगवान् पतञ्जलिरप्याह स्थानेऽन्तरतम इति सूत्रभाष्ये।

किञ्च पाणिनेः सन्धिविधायकेष्वेव सूत्रेषु पदविचारपरम्पराप्राप्तानां शाब्दिकानां बाहुल्येन नामोल्लेखो जातः। यथा—

लोपः शाकस्यस्य ८-३-१९
वा सुप्यापिशलेः ६-१-९२
अवङ् स्फोटायनस्य ६-१-१२३
व्योर्लघुप्रयत्नतरः शाकटायनस्य ८-३-१८
ओतो गार्ग्यस्य ८-३-२०

एतावता सन्धिसम्बद्धपदेषु भेदप्राचुर्यमधिगम्यते। यस्मिन् काले या खलु शिष्टानां व्यावहारिकी भाषा राष्ट्रभाषा वा भवति सैव नियमबद्धापि बोभूयत इति प्रसिद्धपरम्परा। यथाधुना हिन्दीभाषा व्याकरणपरिबद्धा। एवमांग्लभाषाप्रभृतयोपि नियममनुगच्छन्ति। भाषानियमाश्च नालौकिकाः किन्तु शिष्टैर्ये शब्दा यथा व्यवह्रियन्ते ते तथैव व्यवहारे सदा भवेयुरिति व्याकरणसिद्धान्तः। ततश्च प्राक् पाणिनेः 'हर इह-हरयिह', 'प्रार्षभीयति-प्रर्षभीयति', 'गवाग्रम्-गो अग्रम्', 'भो अच्युत-भो यच्युत', इत्येवंविधविकल्पप्रयोगः प्राचलद् व्यवहारे शिष्टानामिति संभाव्यते। वैदिकशब्दानां विषयेऽपि तथा शक्यं वक्तुम्। तत्रापि पश्च-पश्चा, जभार-जहार, 'पञ्चथम्-पञ्चमम्', 'पत्या-पतिना', इत्येवं भेदः सम्प्राप्तः। तत्र शिष्टास्तदानीं तथैव व्यवहरन्तिस्म। तदनु तदनुशासनमिति मतम्। अतएव अप्रयुक्ते लक्षणाभाव इत्यर्थकम् 'यथालक्षणमप्रयुक्ते' (म० भा० १-१-२३) इति महाभाष्यवचनं संघटते।

शिष्टपरिभाषापि महाभाष्ये चरके चोक्ता वर्तते। तत्र तावन्महाभाष्ये 'कें पुनः शिष्टा, वैयाकरणा' इत्युक्त्वा, एतस्मिन्नार्यावर्तनिवासे ये ब्रह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किंचिदन्तरेण कस्याश्चिद्विद्यायाः पारंगतास्तत्र भवन्तः शिष्टा (६-३-१०९) इत्यनुपदमुक्तम्। अतोऽपि व्यापकलक्षणं चरकग्रन्थे मिलति। तच्चैवं संगृहीतं मंजूषायां नागेश भट्टैः— 'तत्रासोपदेशरूपः शब्दः प्रमाणमि'ति विलिख्य आप्तो नामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चंयवान् रागादिवशादपि नान्यथावादी यः स इति चरके पतञ्जलिरिति। अतएव संस्कृते आप्तोपदिष्टा एव शब्दा अनुशास्यन्ते नापशब्दाः।

आचार्यपाणिनेरष्टाध्यायी च तत्परिज्ञानाय भवति। तत्परिज्ञानं च सुमहत्कार्यम्। तच्च सर्वं महर्षेः तपसः फलम्।

अपि च धातुपाठो गणपाठश्च संस्कृतो यथानेन, येन शिष्टोपदिष्टाशेषशब्दानां लघुनोपायेन परिमितैरेव सूत्रैः सदा भवत्वनुशासनम्। नहीदानीं व्यवहारपथमागतानां संस्कृतशब्दानां कृते धातुः गणो वा कश्चिन्नूतनः कल्प्यत इत्यहो महती समवधानपूर्विका प्रवृत्तिराचार्यस्य पाणिनेः शैली। अतएव च 'आकुमारं यशः' पाणिनेः' इत्युच्यते। अस्तु!

तदनु वैयाकरणः कात्यायनः पदविचारे प्रवृत्तः। तत्रैतद्वार्तिकग्रन्थो विख्यातः। पाणिनिसूत्राणां विवेचनं सम्यग्व्याख्यानमत्र जातम्। अपि च ये शब्दाः पाणिनिना अनवधानेन अनुपदिष्टाः किंवा तत्पश्चाद् व्यवहारे शिष्टानां जातास्तेषामुपसंख्यानमनेन विहितम्। तत्र 'गोगोष्ठम्' 'वृषगोयुगम्' 'तिलतैलम्' 'सर्षपतैलम्' इत्यादिशब्दानामपि साधुत्वमभिहितम्—गोष्ठजादिप्रत्ययसन्निधानेन। अत्र ये खलु शब्दाः प्रत्ययपदमात्रास्तेभ्य एव केवलेभ्यः समुदायार्थबोधो जायतेस्म प्राक्, किन्तु कालान्तरे व्यवहारवशात् प्रकृतिभिरपि प्रत्ययपदं गृहीतं केषुचिच्छब्देषु। अतएव—'वृषगोयुगमि'त्यत्र द्वित्वमेव सामान्येनावगन्तव्यं भवति 'गोयुग' इति पदेनापि न गोर्द्वित्वमिति। एवं तैलमिति पदं तिलभवस्नेहरूपार्थे परित्यज्य केवलं स्नेहरूपार्थे प्रयच्छत्यधुनापि। अतएव 'तैलमानय' इत्युक्ते कस्य तैलम्? तिलस्य सर्षपस्य वेति सन्देहः समुदेति। एष किल शब्दानां स्वभावः। तत्रार्थानां संकोचविकासावपि लोकव्यवहारतो भवतः। तथा च तेष्वर्थेषु तथाविधं प्रकृति प्रत्ययभागं परिकल्प्य कात्यायनः प्रासाधयत्।

अपि च शब्दानां प्रवृत्तिनिमित्तमधिगम्यैव भवति तदनुशासनमिति वार्तिकग्रन्थात् सम्यगवगम्यते। तथाहि—अनुकम्पितो देवदत्त इत्यस्मिन्नर्थे यत्र पाणिनिना 'दैविकः' 'दैवियः' 'दैविलः' 'देवदत्तक' इति रूपाण्युपात्तानि तत्र कात्यायनेन 'दत्तिकः' 'दत्तियः' 'दत्तिलः' 'दत्तक' इत्येवं प्रकाराणि रूपाण्यप्युपसंगृह्यन्ते, व्यवहारे तथाविधप्रयोगदर्शनात्। लाघवात्तथोच्चारणादपि लोके बोधः सुनभाव्यत। अतएव देवदत्तपदे गृहीतशक्तिको जनः केवलेन 'देव' इति पदेन, 'दत्त' इति पदेन वा तदर्थशक्नोत्यवगन्तुम्। एवं सत्यमामादिशब्देष्वपि पूर्वार्द्धेनोत्तरार्द्धेन वा बोधः प्रथमतः समुदाये गृहीतशक्तिकस्यैव भवति नान्यस्य। अतएवोक्तं वार्तिककारेण 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वक्तव्यः[१]' इत्यनेन तत्साधुत्वम्। यदि च यत्र कुत्रापि पदावयवेनापि समुदायार्थबोधोऽभविष्यत्तदा को नाम पदसमुदायनम्यधास्यत्—अर्थान्न कोऽपि यतते तथा

१. सू० ५-३-८३।

वक्तुम् । यतः शब्दोच्चारणम् अर्थप्रत्ययनाय भवति । स चार्थो देवदत्तघटकेन 'देव' इति पदेन 'दत्त' इति पदेन वा बोभोति । अतएव तदर्थं तदवयवपदानामपि पृथक् साधुत्वमितिशाब्दिकपरम्परा ।

कदाचित्तु यावदर्थबोधो न स्यात्तावदेकमेव पदं यथेष्टमावर्तत एव, न तत्र प्रयत्नलाघवप्रत्याशा । यतो हि–इष्टानर्थान् बोधयन्तु शब्दा इति वक्तुः समीहा । यथा कश्चित् कंचनाह—'सर्पः सर्पः बुध्यस्व–बुध्यस्व' इति तदत्र नैकेन 'सर्प' इति पदेन तथावबोधो जायते यथा प्रयोक्ताभिप्रैति ; तदर्थं वारत्रयमपि शक्यते वक्तुं ततोऽप्यधिकं वेति मतम् । तदुक्तं कात्यायनेन—'संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः'[१] इति । अत्राह पतञ्जलिरपि—यावद्भिः शब्दैः सोऽर्थो गम्यते तावन्तः प्रयोक्तव्याः–अहिरहिरहि बुध्यस्व बुध्यस्व बुध्यस्व इत्येवम् ।

तदेवं कात्यायनवार्तिकानुसन्धानेनेदं भाति यदनेनापि मुनिना लोकव्यवहारोपनीतानामेव संस्कृतशब्दानामन्वाख्यानं सूत्रव्याख्यानपुरस्सरं कृतम् । तच्च पदविवेचनमेव ।

अथातो भगवान् पतञ्जलिः सूत्रवार्तिकग्रन्थौ व्याचख्यौ । तद् व्याख्यानं च महाभाष्यरूपम् । अत्र शब्दार्थविचारः सर्वतः संपन्नः । लोकव्यवहारमनुगच्छताऽनेन भाषाविज्ञानस्य केचन विषयाः परीक्षिताः । तत्र को ध्वनिः, कश्च स्फोटः, तयोः कियदन्तरम् , अर्थवाचकता च कुत्र, वर्णा अर्थवन्तोऽनर्थका वेत्यादीनां विवेचनं सयुक्तिकं कृतमिति तद्ग्रन्थाध्यायिनां प्रत्यक्षम् । एकैकस्य शब्दस्य बहवः अपभ्रंशा जायन्त इत्यत्र गोशब्दस्य गावी–गोणी–गोता–गोपोतलिका' इत्युपन्यासेन निर्देशश्च कृतः । अर्थात् साधुशब्दा अल्पीयांसो भवन्ति, अपशब्दाश्च देशकालादिभेदाद् भिद्यन्त एव, तस्मात्तद्बाहुल्यं लोके इति ।

अपि च सर्वे शब्दाः सर्वदेशेषु समानार्थवाचका एव भवन्तीति नायं नियमः, अत्र यथा निरुक्ते कथितमस्ति तथैव प्रायो महाभाष्येप्युक्तम्—'शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते 'शव' इति, हमतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते' इत्यादिना । एतेन धातूनामनेकार्थत्वं देशभेदादर्थानां शब्दानां च नियतविषयत्वं भवतीत्युक्तम् ।

प्रतिनियतपुरुषव्यवहारादपि शब्दार्थस्वरूपन्निर्णीयते, तत्रैवमुक्तम्—'यथा वणिजः वाराणसीं जित्वरीत्युपाचरन्ति एवं वैयाकरणा वालवायं विदूर इत्युपाचरन्ति'[२] इति ।

---

१. सू० ८–१–१२ । २. म० भा० सू० ४–३–८४ ।

अयम्भावः—विदूरशब्दो नगरस्यैव वाचकः, नतु वालवायनाम्नः पर्वतस्य, मणिस्तु वालवायात् प्रभवति, विदूरे केवलं संश्क्रियते ततश्च वैदूर्यो मणिरिति कथं व्यवहार इति विप्रतिपत्तिः ? तत्रोच्यते यथा वणिजः सर्वमंगलप्रदां वाराणसीं जित्वरीति नाम्ना व्यवहरन्तिस्म तथैव वैयाकरणा एवं वालवायं विदूर इति पदेन प्रयुञ्जते स्म । अर्थात् विदूरवालवाक्योरभेदमभ्युपागच्छन् सामीप्यात् । एतावता शब्दानां व्यवहारो नियतपुरुषापेक्षोऽपि भवतीति सूच्यते ।

अपि च अर्थग्रहाग्रहयोर्लोकव्यवहारः प्रधानं कारणमिति 'अनेकार्थाभिधाने यत्नं कुर्वताऽवश्यं लोकः पृष्ठतो गन्तव्यः । केष्वर्थेषु लौकिकाः कान् शब्दान् प्रयुञ्जते'[१] इत्यादिना निर्दिशति भाष्यकारः । भाषाविज्ञानमपि लोकमनुगमयति तत एव तत्सद्धान्तः स्फुटति । नहि लोकमन्तरेणार्थबाहुल्यं शब्दबाहुल्यं शक्यमभिधातुम् ।

तथा च—

भाषारहस्यं महाभाष्येऽभिहितमिति मन्ये ।

तदनु महावैयाकरणेन भर्तृहरिणा शब्दतत्त्वं निरूपितम् , एतन्निर्मितं वाक्यपदीयं पदशास्त्रस्य दार्शनिको ग्रन्थः । तत्र वर्णोत्पत्तिविचारे वर्णोपादानकारणं वायुः उताहो अणुः, किंवा ज्ञानमिति सन्दिह्य व्याख्यातमस्ति । अपरंच दैवीवाक् कथं विकृतिमाप्ता, तत्र किं प्रधानं कारणमिति जिज्ञासितमप्यनेन 'देवी-वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः' इत्यादिना समाहितम् । तच्च शब्दविकृतौ विस्पष्टरूपेण हरेः प्रथमं मतम् । वाक्यं तु बहुधा विवेचितं तेन । तत्राखण्डवाक्यं खण्डवाक्यमिति भेदद्वयमूरीकृत्य वाक्यान्यष्टाविति मतमाचार्याणामुपदर्शितम् , प्रतिभैव वाक्यार्थ इत्युपपादितं च ।

वाक्यादेवार्थबोधो भवतीति न केवलं वैयाकरणा मन्यन्ते, अनुभवन्ति सर्वे बोद्धारोपि । केवलात् क्रियापदादपि यत्र बोधो भवितुमर्हति तत्रापि कर्तृकर्मणोरध्याहारः संभाव्यत एव । एषां कर्तृकर्मक्रियापदानां संस्कृतवाक्ये क्रमशः सन्निवेश इति नायं नियमः । 'आहर पात्रम्—पात्रमाहर' इत्युभयं हि तत्र दृश्यते । हिन्दीभाषायां नियमोऽयमस्ति, तत्र कर्मपदं मध्ये दीयते, अन्ते च क्रियापदमिति । एवम् आंग्लभाषायां कर्मपदमन्ते निवेश्यत इति नियता पद्धतिः । अर्थात् अनानुपूर्व्यं तु न तदर्थबोध इति निश्चितम् । संस्कृते यद्यपि स्वातन्त्र्यम् , पुनरपि अर्थावबोध-

---

१. म० भा० १. २. ६४ ।

नाय तु तथानुपूर्वी संभवत्येव । अतएव पतञ्जलिरपि प्राह—अनानुपूर्व्येणापि सन्निविष्टानां यथेष्टमपि सम्बन्धो भवति—तद्यथा—अनड्वाहमुदाहारि । सा त्वं हरसि शिरसा कुम्भं भगिनि । साचीनमभिधावन्तमद्राक्षीरिति । तस्य यथेष्टमभिसम्बन्धो भवति—उदाहारिभगिनि ! या त्वं कुम्भं हरसि शिरसा अनड्वाहं साचीनमभिधावन्तमद्राक्षीरिति । (म० भा० १-१-५७) अत्र क्रमशः कर्ता ततः कर्म तदनु क्रिया संस्मर्यत एव । एवमुद्देश्यविधेयावधिकृत्य वाक्यविचारः संस्कृते संपन्नः । अस्तु !

एतेषामेव पाणिनि-कात्यायन-पतञ्जलि-भर्तृहरीणां मतमवलम्ब्य व्याकरणे बहवो विचाराः पश्चाज्जाताः । तत्र वामन-जयादित्ययोः कैयट-नागेश-भट्टोजिदीक्षितानां च विचाराः परिस्फुरन्ति । तत्रापि नागेशभट्टानां मंजूषा शब्दार्थविचारगुरुतामावहति । धातुनामोपसर्गनिपातादयर्थानां समालोचनमत्र समीचीनं जातम् । वर्णोत्पत्तिविचारोपि चिन्तितः, तत्रापि स्फोटो बहुधा विवेचितः ।

तदेवं शिक्षा निरुक्तं व्याकरणमिति त्रयम् भाषाविज्ञानमधिकमवगाहते ।

एवमन्येष्वपि संस्कृतशास्त्रेषु प्रसंगतः शब्दार्थविचारो दृश्यते, परमधुना आंग्ल-हिन्दीभाषादिषूपलब्धग्रन्थ इव न कोऽप्यभिनवो भाषाविज्ञानस्य संस्कृतवाङ्मये ग्रन्थः, नापि तन्त्रशास्त्रस्य शिक्षाद्युपर्युक्तवेदाङ्गस्य प्रातिशाख्यस्य च भाषोत्पत्ति-भाषाविकृतिप्रकारान् संगृह्य कुत्रापि विवेचनं जातमिति विज्ञाय, प्राचीनानां महर्षीणां मतम्, अर्वाचीनविज्ञानविदां च सरणिमनुसृत्य यथामत्यभिनवोऽयं निबन्धः प्रस्तूयते ।

प्रस्तुतेऽस्मिन्निबन्धे शिक्षाप्रातिशाख्यतन्त्रनिरुक्तादिग्रन्थानां शब्दोत्पत्ति-प्रकाराः शब्दविकृतिनियमाश्च विवेचिताः, प्रतिभासमानो विरोधश्च यथामति निराकृतः । भाषोत्पत्तौ सम्प्राप्तपाश्चात्यमतपरिचयोऽपि केचनेत्यादिपदैर्ज्ञातः । श्रद्धेय-स्व० वाचस्पति-श्रीमधुसूदनशर्ममैथिलमहाशयानां च वर्णसमीक्षायाः बहवो भागाः समीक्षिता यथावसरम् ।

पाश्चात्यभाषा वैज्ञानिकानां बहुलीभूता गवेषणा तु नात्र संगृहीता, यतः संस्कृत भाषाविज्ञानमिति निबन्धनाम ।' ततश्च संस्कृते विकीर्णसामग्रीणामेवात्र संग्रहोऽभिप्रेतः । प्राचीना खलु सामग्री विषयेऽस्मिन् महद्वैलक्षण्यमुपदधाति गुह्यतमं च प्रकटयति । तद्यथा—शब्दा नित्याः, अनित्या वा, शब्दो द्रव्यं गुणो वा, शब्दे गतिरस्ति न वा, अपि च शब्दाश्रय आकाश उताहो पंचभूतानि इत्यादिविषयाणां विचारः प्राचीनदार्शनिकैः कृतः । स चात्रालोचितः ।

किंच शब्दनित्यत्वविचारे परा पश्यन्ती मध्यमा-वैखरीवाचां विवेचनमुपलभ्यते, यासामधिकं विवेचनमागमशास्त्रे कृतमस्ति। आधुनिकभाषाविज्ञाने तु तन्न समीक्षितम्। अत्र च निबन्धे तत्र प्रचुरः प्रकाशो दत्तः। भाषायाः परिवर्तननियमाः संस्कृते अविस्पष्टा एव प्रायः, ते च निरुक्त-पाणिनिग्रन्थेभ्योऽन्वेषणीयाः। निरुक्ते भाषापरिवर्तननियमा न स्पष्टमुक्ताः, अपितु निरुक्तकृद्भिर्वचनशैलीं सुसमीक्ष्य ते नियमा ऊह्या भवन्ति—तदर्थमप्यत्र कृतप्रयासः। संस्कृते विषयोऽयं नवीनः, अतश्चारम्भे दृढसिद्धान्तो दुष्करस्तथापि प्रयासः कृतः।

निबन्धे नवीनताः काश्चनेहोपदर्श्यन्ते—

१. भाषा-शब्देतिवृत्तम्

२. शब्दानित्यत्वखण्डने नवीना युक्तयः

३. परा-पश्यन्त्यादिवाचामस्वीकारे वाच उत्पत्तिविज्ञानं न भवतीति स्पष्टीकरणम्

४. बाह्यप्रयत्नानामुदात्तादीनां च स्वरूपस्पष्टीकरणम्

५. वाच उत्पादकानां गुणानांविशेष्यविवेचनम्

६. किमात्मिका वागिति विशिष्य स्पष्टीकरणम्

७. भाषा-परिवर्तननियमानां यथाशक्यमन्वेषणम्

८. बहूनाम् आंग्लभाषादिशब्दानां संस्कृतशब्देभ्य उत्पत्तेः प्रकारप्रदर्शनम्।

इत्याद्या द्रष्टव्याः।

अपि चात्र ध्वनयः समालोचिताः। तत्र ध्वनिविचारे तद्भेदविकासावुपदर्शितौ। विकासक्रमे 'अकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति' इति श्रुतिरपि व्याख्याता।

अपि च मातृकाचक्रविवेकमनुसृत्य ध्वनिविकासश्चिन्तितः। आगमशास्त्रे च वर्णोत्पत्तिमधिकृत्य बहूक्तम्। तत्र वसुविधशक्तयः, ताभ्यश्च नवविधनादाः, तेभ्यश्च वर्णा इति क्रमो योगिभिरवगम्यते। स चात्र पुनर्विचारितः। यद्यपि क्रमोऽयं विज्ञानपदं नार्हतीति कृत्वोपेक्षितो वर्णविद्भिः, किन्तु यथा वर्णोत्पत्तौ वायोर्जिह्वाया वा व्यापाराः परिलक्ष्यन्त इति सर्वजनसंवेद्यं, तथैव तत्र मानसव्यापारा अपि सहैव प्रचलन्ति। अथ च ते कथं ज्ञायन्त इति

जिज्ञासितं संस्कृतशास्त्राण्येव समादधति । तस्मात्तत्परिचयोऽत्रावश्यक इति मत्वा नोपेक्षितः ।

अत्र च निबन्धनिष्पत्तौ येषां मुनीनां भाषावैज्ञानिकानां विदुषां वा साक्षात् परम्परया साहाय्यं समुपलब्धं तदर्थं तेषां कृतज्ञोऽहम् ।

अथ च येषां पूज्यपादानां महामहोपाध्यायानां **श्रीगिरिधरशर्मचतुर्वेद-महाभागानां** वैयाकरणकेसरिणां गुरुवराणां **श्रीराजनारायणशर्मपाण्डेयमहोदयानां** च चरणानामन्ते वसता निबन्धोऽयं पूर्णतां गमितः तेषु चरणसरोरुहेषु सादरं प्रणतिं विदधाति—

गोपाष्टमी
वाराणसी
वि० सं० २०२०

रामाधीनचतुर्वेदी

विषय-सूची

पृष्ठ-संख्या

प्रथमोऽध्यायः

विज्ञानम् १–५

विज्ञानपदार्थः, विज्ञानमहिमा भाषाविज्ञानं च किम् ? एतस्य पुरातनन्नाम, अस्यापरशास्त्रवैलक्षण्यम् ।

द्वितीयोऽध्यायः

भाषाविचारः ६–९

भाषाप्रयोजनानि, भाषापरिभाषा, भाषाशब्देतिवृत्तम् ।

तृतीयोऽध्यायः १०–२४

भाषोत्पत्तिः ... ...

भावविकाराः, भाषाप्रादुर्भावे विकासवादिमतम्, अन्यमतम्, अपरमतम्, संस्कृतशास्त्रेषु तद्विवेचनम्, नैयायिकमतम्, शब्दानित्यत्वसाधनानि, शब्दनित्यत्वखण्डनम्, तत्समालोचनम्, ध्वनेरनित्यत्वं शब्दस्य नित्यत्वं च, शब्दादेव सर्वप्रभवः, मीमांसकमतेऽपि शब्दनित्यत्वम्, स च नित्यः शब्दः स्फोट एव, अहङ्काराच्छब्दोत्पत्तिरिति साङ्ख्यमतम्, असत्येनापि वर्णेन स्फोटावभासः ।

चतुर्थोऽध्यायः

वाग्विभागः २५–४९

परवाग्विचारः, पश्यन्तीवाक्, मध्यमावाक्, वैखरीवाक्, वैखरीवाक्प्रकृतयः, नवीनवैयाकरणानां प्रातिशाख्येन मतभेदः, कैयटाद्युक्तमुदात्तादिस्वरूपं शिक्षाद्यसम्मतम्, वाचः प्राणमयत्वे श्रुतिविरोधमुद्भाव्य तन्निराकरणम्, वाग्गुणाः सप्त, स्वरगुणविवेचनम्, सिद्धान्ते किमात्मिका वाक्, वाग्विभागे ऋग्वेदसम्मतिः ।

पञ्चमोऽध्यायः

ध्वनिविमर्शः ५०–५८

ध्वनिशब्दार्थः, ध्वनिभेदः, आगमे वर्णमातृका, स्वरेभ्यो व्यञ्जनोत्पत्तिः, अकार एव सर्वा वाक् ।

पृष्ठ-संख्या

षष्ठोऽध्यायः

भाषानिष्पत्तिः ५९–६६

तत्र व्यवहारः प्रधानम्, ईश्वर एवादिव्यवहर्ता, ईश्वरेच्छैव शक्तिः, वेदे एवेश्वरेच्छाशक्तिः, अपभ्रंशादपि साक्षादर्थबोधः, पदार्थान्तरं शक्तिः, भाषासिद्धौ विकासवादः, तत्रेदं मतम्।

सप्तमोऽध्यायः

भाषा-भेदः ६७–८८

तत्रार्वाचीनरीतिः, आकृतिमूलकं वर्गीकरणम्, पारिवारिकं वर्गीकरणम्, संस्कृते भाषाभेदः, दैवी भाषा मानुषी भाषा च, उभयोर्भाषयोरेकत्वम्, भाषाबाहुल्यम्, कल्पितभाषाः, वैदिकभाषैवादिभाषा, ततः पूर्वमपि प्राकृतमिति केचन, संस्कृतशब्दप्रवृत्तिः, श्रुतिनिरुक्तितात्पर्यम्, विंशतिशब्दनिर्वचनम्, तितउशब्दनिरूपणम्, निष्कर्षः।

अष्टमोऽध्यायः

भाषाविकृतिहेतवः ८९–११६

देशकृतं परिवर्तनम्, कालकृतं परिवर्तनम्, व्यक्तिकृतो विकारः, विचालिनो वर्णाः, वर्णदोषाः, पाणिनेर्नियमस्य व्यापकत्वम्, शब्दपरिवर्तने यास्कमतम्, शब्दविकृतिकारणानि, लेखसादृश्यम्, उच्चारणसादृश्यम्, यत्नदोषः, अनिश्चयः, विवक्षा, अप्रसक्तिः, वाग्व्यवहारलाघवम्, हिन्दी-भाषोत्पत्तिः।

संकेत परिचयः

अमर को०	—	अमरकोषः
ऋक् तंत्र०	—	ऋक्तन्त्रव्याकरणम्
ऋक् सं० अष्ट० अ०	—	ऋक् संहिता अष्टकः अध्यायः
ऋग्०	—	ऋग्वेदः
ऋग्० प्रा०	—	ऋग्वेद प्रातिशाख्यम्
ऐतरे० उप०	—	ऐतरेयोपनिषत्
का० मी० अ०	—	काव्यमीमांसा अध्यायः
काव्याद०	—	काव्यादर्शः
कौषीत० उप०	—	कौषीतक्युपनिषत्
गो० ब्रा०	—	गोपथ ब्राह्मणम्
छान्दो० उप०	—	छान्दोग्योपनिषत्
जैमिनी० उप०	—	जैमिनीयोपनिषत्
तन्त्र वा०	—	तन्त्रवार्तिकम्
ताण्ड्य महा ब्रा०	—	ताण्ड्य महाब्राह्मणम्
तु० भा० वि० परि०	—	तुलनात्मक भाषाविज्ञान, परिच्छेद
तै०	—	तैत्तिरीयोपनिषत्
तैत्ति० उप० व० अनु०	—	तैत्तिरीयोपनिषद् वल्ली, अनुवाकः
तैत्ति० ब्रा०	—	तैत्तिरीय ब्राह्मणम्
तैत्ति० सं०	—	तैत्तिरीय संहिता
नाट्य शा०	—	नाट्यशास्त्रम्
निरु०	—	निरुक्तम्
न्याय० वा०	—	न्यायवार्तिकम्
न्याय सू०	—	न्यायसूत्रम्
परि० शे०	—	परिभाषेन्दुशेखरः
पात० सू०	—	पातञ्जलसूत्रम्
पा० शि०	—	पाणिनीय शिक्षा
पा० सू०	—	पाणिनीयसूत्रम्
प्रश्नोप०	—	प्रश्नोपनिषत्
बृह० उप०	—	बृहदारण्यकोपनिषत्

मनु०	—	मनुस्मृतिः
म० भा० आदि०	—	महाभारत आदि पर्व
मातृका०	—	मातृकास्तुतिः
मीमां० द०	—	मीमांसादर्शनम्
मुक्तावली का० सं०	—	मुक्तावलीकारिकासंख्या
ल० कौ०	—	लघुसिद्धान्तकौमुदी
लघु मञ्जू०	—	लघुमञ्जूषा
ल० श० शे०	—	लघुशब्देन्दुशेखरः
वाक्य०	—	वाक्यपदीयम्
वा० प्रा०	—	वाजसनेयिप्रातिशाख्यम्
वा० रा० सु०	—	वाल्मीकीयरामायणसुन्दरकाण्डम्
वै० भू० का०	—	वैयाकरणभूषणसार-कारिका
व्या० महा०	—	व्याकरणमहाभाष्यम्
शत० ब्रा०	—	शतपथब्राह्मणम्
शिव पु०	—	शिवपुराणम्
श्रीभा० पु०	—	श्रीभागवतपुराणम्
श्रीम० गीता अ० श्लो०	—	श्रीमद्भगवद्गीता अध्यायः श्लोकः
संगीत०	—	संगीतरत्नाकरः
सांख्य०	—	सांख्यकारिका
सा० भाषा वि०	—	सामान्यभाषाविज्ञान
सि० कौ० सू०	—	सिद्धान्तकौमुदीसूत्रम्
स्फोट०	—	स्फोटतत्त्वनिरूपणम्

संस्कृत–

भाषा-विज्ञानम्

❀ श्रीविश्वनाथो विजयतेतराम् ❀

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

वाचं देवा उपजीवन्ति विश्वे,
वाचं गन्धर्वाः पशवो मनुष्याः ।
वाचीमा विश्वाभुवनान्यर्पिता,
सा नो हवं जुषतामिन्द्रपत्नी ॥
यामृषयो मन्त्रकृतो मनीषिण-
अन्वैच्छन् देवास्तपसा श्रमेण ।
तां देवीं वाचं हविषा यजामहे,
सा नो दधातु सुकृतस्य लोके ॥

—तैत्ति० ब्रा० २-८-८

अथ प्रथमोऽध्यायः

विज्ञानम्

तत्र विज्ञानपदार्थः

अर्वाचीनमते विज्ञानं नाम वस्त्वनुभवपर्यवसायि ज्ञानम्। पुरा किल भारतीयसुधानिधौ 'विशिष्टं ज्ञानं विज्ञानम्' 'विविधं ज्ञानं विज्ञानम्' 'विभेदेन ज्ञानं विज्ञानमित्यादि विविधा व्युत्पत्तयोऽस्य निरूपिताः।

तत्र 'एकं वा इदं विबभूव सर्वम्' 'एतस्मादात्मन आकाशः संभूतः' 'यतो वा इमानि भूतानि जातानि' 'जन्माद्यस्य यतः' इति श्रुतिस्मृतिवचनस्वारस्येन विज्ञानपदमेकस्य तत्त्वस्य नानात्वमनुभावयति। ज्ञानन्तु 'सर्वं खल्विदं ब्रह्म' 'इमे लोकाः प्रजापतिः' इत्यादिवचनैर्नानात्वे एकत्वं परीक्षत इति ज्ञानविज्ञानयोर्वैलक्षण्यमवलोक्यते।

श्रीभगवद्गीतयापीदमेव गीयते—

सर्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्[1] ॥ इति।

अपि च

तर्कोऽपि नैवोत्सहते यत्र तज्ज्ञानमर्जुन।
प्रपंचोऽन्यत्तु विज्ञानमज्ञानं तत्र सत्यधीः ॥ इति।

भगवद्गीतायाष्टीका ज्ञानेश्वरी। अतो दर्शनशास्त्रदृष्ट्या 'बहुत्वे एकत्वम्' 'एकत्वे च नानात्व'मित्येव ज्ञानविज्ञानयोः स्वरूपं निरीक्ष्यते तत्त्वज्ञैः।

कोशेषु विज्ञानपदम् 'मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः[2]' इति शिल्पशास्त्रादिकं बोधयति। शिल्पे खल्वेकमेव द्रव्यं विभिन्नरूपतां भजते; यथा सुवर्णं कटककुण्डलादिरूपेण परिणमते इति प्राग्व्याख्यातं विज्ञानपदमेव क्रमेण शिल्पशास्त्रादिषु प्रवृत्तमित्यनुमीयते।

श्रीशंकराचार्यैरुपनिषत्सु 'विज्ञानं जीवः' प्रज्ञानं प्राज्ञो वा परमात्मेति व्याख्यातम्। तस्यापि पूर्वोक्ते तात्पर्यम्। यतः ईश्वरांशो जीवः औपाधिकभेदेन नानात्वमेव भजते। एवमेव भाषापि समयानुसारेण विभिन्नरूपतामवाप्ता, सा तदा कतिधेत्युपरिष्टाद् विशदं वक्ष्यते। तथा च जगति पदार्थानुभवपर्यवसायित्वमेव विज्ञानपदार्थ इति मतमाभाति।

---

१ श्री भ० गीता अ० १८ श्लो० २०। २ अमरको० [illegible]।

विज्ञानमहिमा

तद्धि विज्ञानं जनानां स्वाभाविकं ज्ञानं विशोधयति। तत्र च सर्वदेयं जिज्ञासा जागर्ति यज्ज्ञानविषयभूते पदार्थे किन्नाम सत्यं किञ्चासत्यमिति। यतो नहि ज्ञानं सत्यात्मकमेव जगति जायते। तथाहि तच्च द्विविधम् भ्रमात्मकं प्रमात्मकञ्चेति। तत एवं प्रमाणैर्जायमानं ज्ञानं तर्केण परिशोध्यत इति न्यायभाष्यकृतोक्तम्। तद्विशोधितं स्वरूपमेव विज्ञानपदाभिलप्यतां भजते। तदित्थं विज्ञानं सत्यमेव।

विज्ञानविशेषज्ञाश्च यं कमपि पदार्थमालोच्य किमत्रैतिहासिकं भौगोलिकं सामाजिकं धार्मिकं च तथ्यं पिहितम्, कियती चात्र शक्तिर्निहिता, यया-स्माकमुपकारो भवेदिति विवरीतुं शक्नुवन्ति।

किंच विज्ञानं नवीनं समीचीनं किमिति सर्वत्रान्विष्यति। पिहितं सत्यं सर्वथोद्घाटयति। ज्ञानमनुशास्ति। अत एव सत्यमिदं भाति 'एकेन विज्ञातेन सर्वं विज्ञातं भवती'ति वचनम्। साम्प्रतं विज्ञानयुगे व्यवहार-जातं विज्ञानमूलकं प्रतिभाति। अनुपदं विना विज्ञानं गमनमनुचितं विदुषाम्। न भूतो न भविष्यतीति वचनं विज्ञानप्रभावेणालीकं जातम्। हेममृगस्य जन्म इत्यासम्भवं नास्ति किमप्यधुनेति।

भाषाविज्ञानं च किम् ?

भाषाविज्ञानमपि विज्ञानस्यांशभूतं वरीवर्ति। भाषाविज्ञानस्य विचारेण भाषाणां निदानं सुतरां ज्ञायते। यतस्तत्र भाषा कथमागता, कुत आगता, कस्माज्जाता ? किंवा सहजा, अपिवा जगतः पूर्वमासीत्, अथवा तदनन्तरं मनुष्यैर्निर्मिता, नित्या वा अनित्या वा, कथं वा परिवर्तते, कुतो विभिन्नेषु देशेषु भाषा भिद्यते। भाषायां च का प्रकृतिः कः प्रत्ययः; पूर्वं व्याकृता, अव्याकृता वेति बहुविधाः प्रश्ना जायन्ते। तदुत्तरमपि भाषा-विज्ञानविद्भिः पुरावृत्तविद्भिः पाश्चात्त्यैर्भारतीयैर्वा यथावसरं प्रादायि दीयते च साम्प्रतमिति। एवं नहि भाषाविज्ञानेन विना भाषाणां मूलभूतं रहस्यं ज्ञातुं शक्यते। केवलं भाषार्थज्ञानं ज्ञानमेव भवति न विज्ञानमिति जानीयात्। भाषाशब्दार्थश्चानुपदं विवरिष्यते।

एतस्य पुरातनन्नाम

संस्कृतवाङ्मये निरुक्तं व्याकरणं शिक्षेति वेदांगत्रये भाषावयवानां शब्दानां निर्वचनं समीचीनमुपलभ्यते। भाषाविज्ञानस्य प्राचीनन्नाम हि

निरुक्तम्, निर्वचनम्, शब्दशास्त्रं वेति ज्ञायते। निरुक्तं च तावत् शब्दानां निर्वचनमेव। तत्र च प्रकृतिप्रत्ययादीनां विवेचनपुरस्सरं कथा, कथं वा तत्तदर्थेषु शब्दानां शक्तिग्रहस्त्यागो वेति विचारः। किंचाव्युत्पन्नानामपि शब्दानां साधुत्वप्रकारः साधु प्रदर्शितो वर्तते। तच्च पंचविधम्—

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम्[1]॥ इति।

तद्यथा

भवेद् वर्णागमाद्धंसः सिंहो वर्णविपर्ययात्।
गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम्[2]॥ इत्यादि

तथा च निरुक्तं भाषाविज्ञानमेव।

अस्यापरशास्त्रवैलक्षण्यम्

व्याकरणं केवलं नहि भाषाविज्ञानपदं लब्धुमर्हति, यतो व्याकरणं वै भाषाणां सिद्धस्वरूपं बोधयति। भाषाविज्ञानन्तु तन्मूलं किमिति विचारयति। महर्षिपाणिनिना क्वचित् क्वचित् सूत्रेषु भाषाविज्ञानांशो निवेशितः। स तु वस्तुतः क्वाचित्क एवांशिकः न सपरिकरः सार्वत्रिक इत्यन्यदेतत्। किं च व्याकरणं नहि सर्वथा भाषास्वरूपसंघटनाय व्याप्रियते, केवलं भाषावयवभूतानि पदानि तद् व्याकरोति। तदेतदुक्तं महाभाष्यकृता—'नेह प्रयोगनियम आरभ्यते' किं तर्हि, संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसंबन्धो भवति। तद्यथा आहर पात्रम्, पात्रमाहरेति[3]।

साहित्ये च यद्यपि पदानां स्वारसिकं संघटनं विचन्त्यते, परं तत्रापि भाषाया उत्पत्तिः, विकृतिनिमित्तम्, विवृतिश्चैतत्सर्वं न विचारितम्। तस्माद् भाषाविज्ञानशास्त्रमन्यदेव। अपि च कस्याश्चिद् भाषाया व्याकरणं भाषान्तरज्ञानं नान्तर्भावयति। भाषाविज्ञाने तु भाषान्तराण्यपि ज्ञातानि भवेयुः। तथा च निरुक्तकारो यास्कः कथयति—

'तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च[4]' इत्येतावता स्पष्टं व्याकरणं भाषाविज्ञानमनुसरतीति जातम्।

---

१. नि० १. १. १. टिप्पणी। २. सि० कौ० समासाश्रय० सू० ६।१।१०९।
३. व्या० महा० १।१।१ ४. नि० १।५।१५

द्वितीयोऽध्यायः

भाषा-विचारः

अत्र वस्तुयोजनानि

भाषा हि लोकस्य सर्वश्रेष्ठनिधिरस्ति। नह्येनां विना जनाः किमपि वाक् कर्तुं शक्नुयुः। जनानां विचाराः भाषयैव जनपदे प्रसरन्ति। अक्षिसंकोचादिभिः कंचन स्वाभिप्रायं प्रकटयन्तोऽपि मानवाः सर्वथा स्फारं न स्फारयन्ति, किंच न केवलं विद्यमानानां पुरुषाणामपितु अतिपूर्वजानां मृताश्चरियाणामपि महतां विचारधारास्माभिर्ज्ञायते, अनुस्रियते च। सोऽयं भाषाया एव महिमा। यथा प्राणिनां कृते क्षितिजलपावकगगनसमीरणमावश्यकाः सर्वैः स्वीक्रियते, तथैव भाषावयवभूतानां शब्दानामपीत्यत्र न कश्चन विप्रतिपत्तयः। जगति च यावन्तो वर्तमाना व्यवहारास्ते सर्वे भाषानुपातिन एवेति प्रत्यक्षानुभवेन सिद्धम्। अत एव हरिणोक्तम्—

> न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते।
> अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते[1] ॥ इति।

अपि च यदि भाषाज्योतिर्न स्यात्तदा समग्रं भुवनत्रयमज्ञानान्धकारेण व्याप्तं भवेत्। वदति चात्र दण्डी—

> इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
> यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते[2] ॥ इति।

श्रावयति श्रुतिरप्येवमेव

'वाचैवायं ज्योतिषास्ते' अर्थाद् बृहदारण्यकोपनिषदि जनकः पृच्छति यद् 'अस्तमिते आदित्ये याज्ञवल्क्य चन्द्रमस्यस्तमिते शान्ते चाग्नौ किं ज्योतिरेवायम् पुरुष इति। उत्तरयति याज्ञवल्क्यः—वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते, पल्ययते कर्म कुरुते विपल्येतीति, तस्माद्वै सम्राट्। अपि यत्र स्वः पाणिनं विनिर्ज्ञायते। अथ यत्र वागुच्चरत्युपैव तत्र न्येतीत्येवमेवैतद् याज्ञवल्क्य[3]' इति।

अपि च वेदा अपि भाषामया एव। नैनां विना तत्सत्ता। किमधिकम् 'वागेव विश्वा भुवनानि जज्ञे' इति सर्वाधिकं भाषायाः प्रयोजनं निष्प्रकम्।

---

१. वाक्य० १. १२४. २. काव्याद० १. ४।

३. बृह० उप० ४. ३. ५।

तत्परिभाषा

सिद्धे च प्रयोजने भाषायाः का परिभाषेति जिज्ञासायां विश्वजनीनः परस्पराभिप्रायप्रकटनसाधनीभूतः सन्निवेशविशेषनिवेशितः शब्दसमूहो भाषा।

अपि नाम :—

स्वाशयं स्पष्टं परेषु समनुभावयितुमारचित उपायविशेषो हि भाषा। तत्र तावज्जनैर्भाष्-धातोः स्पष्टप्रवचने शक्तिर्गृहीता, भाष्यते इति व्युत्पत्त्या भाषाशब्दोपपत्तिश्च।

निरुक्तादिग्रन्थनिर्माणकाले सार्वजनीना खलु भाषा लोक इति पदेनोच्यतेस्म, तदानीं वैदिकी लौकिकीति मार्गद्वयेन वाणी प्रवहतिस्म, तत्र साहित्यचर्चाचर्चितवैदिकीवाग् विख्याता। अपरा च सदा सेवनीया लौकिकी वागिति। या ग्रन्थनिबद्धा वाक् तदानीं सैव जनभाषापि सभासीदिति तु कथमपि नावगम्यते। यथेदानीं दृश्यते यदेका काचिद् विशिष्टभाषा साहित्यमनुसरति। अपराश्च बहुविधाः ख्याता लोक इति। तदिदं चिरसत्यं यद् यदा कदापि यथैका साहित्यभाषा भवति तदा किल स्वभावतो जनभाषा सरस्वती नदीव नीचैर्वहति। तस्मात्तदानीमपि वेदवाचोऽपेक्षया काचित्सर्वजनबोध्या लोकभाषाऽऽसीत्। अत एव निरुक्तग्रन्थे 'नूनमिति विचिकित्सार्थीयो भाषायाम्' इत्युक्त्वा श्रीयास्को वाचो विभागं कृतवान्। अपि च व्याकरणमहाभाष्यादिग्रन्थेषु प्रचलिता एव शब्दा निबद्धा व्याख्याताश्च। तत्र शास्त्रे यथैको गोशब्दः सुप्रयुज्यते स्म तदा लोके प्रायस्तदनुरूपास्तदर्थवाचकाश्च नानाविधा गावी गोणी गोपोतलिकेति शब्दाः समुपलभ्यन्तेस्म। तस्मात्तदानीं या वाक् साधारणजनतायां परस्परं व्यवह्रियतेस्म सैव लोकपदावगम्येति निर्णीयते। साम्प्रतं यथा महाकवेर्वाल्मीकेर्वाचोऽपेक्षया श्रीतुलसीदासकृतरामचरितमानसीयभाषा सर्वेषां जनानां मानसमध्यास्ते। तथैव कदाचिद् वाल्मीकीयवागपि वेदवाचोऽपेक्षया सर्वजनसंवेद्याऽऽसीत् तस्माच्च सापि तदा जनभाषैवेति स्पष्टम्। एष एव भाषायाः स्वाभाविकः क्रमः। तयैव प्राणिनां सर्वे व्यवहाराः संपद्यन्ते। तदित्थं परस्परं स्वाभिप्रायबोधानुकूलः शब्दसमूह एव भाषाशब्दस्य वाच्योऽर्थ इति सिद्धम्।

भाषाशब्देतिवृत्तम्

भाषास्वरूपनिरूपणानन्तरं प्रसंगाद् भाषा-शब्देतिवृत्तं किमिति प्रश्नो जागर्ति चास्मन्मनसि। तत्र प्रथमं त्विदमवधेयं-यद् वैदिकसाहित्

वाक्कृते भाषा-शब्दस्य व्यवहारो नैव प्राचलत्। वेदेषूपनिषत्सु च तावद् वाक्-शब्दस्यैव व्यवहारो दृश्यते। तथाहि ऋग्वेदे—

'तदद्य वाचः प्रथमं मंसीय येनासुरां अभिदेवा असाम'[1] इति; बृहदारण्यकोपनिषदि 'कश्च शब्दो वागेव सा' इति[2]।

अपिच शतपथब्राह्मणे :—

'वाग्वै मनसो ह्रसीयसी अपरिमिततरमिव हि मनः परिमिततरेव वाक्'[3] इति वचनमुपलभ्यते। तथा चैवं सर्वोपनिषत्सु च भाषायै वाक् शब्द एव केवलं व्यवहारविषयतामलभत। एभिर्निर्दिष्टवैदिकवचनैश्चैदमेव सुनिश्चीयते यन्नहि वैदिकसाहित्ये भाषाशब्दस्य श्रवणमिति। यदा खलु इयं वैदिकी वाक्, इयं च संस्कारात् सर्वजनव्यवहारार्हा लौकिकी वागिति नैरुक्तिकी व्यवस्था प्रचलिता, तत एव च लौकिकभाषार्थे भाषाशब्दोऽपीत्यवगन्तव्यम्। तथाहि आचार्यप्रवरेण यास्केन 'नेति प्रतिषेधार्थीयो भाषायाम्'[4] इत्युक्तम्, तदर्थस्तु 'लोके' इति तद्व्याख्यातारः।

अयमाशयः संस्कृतभाषायां प्रतिषेधार्थीय एव नकारो गृहीतः किन्तु उभयमन्वध्यायमित्यादिना प्रतिषेधार्थीय उपमार्थीयश्चेति नकारस्यार्थस्वीकारः। तदेवं छन्दस्त्वम् भाषात्वं चेति वाचो भागद्वयं जातमिति। तदारभ्य महर्षिपाणिनिना 'प्रथमायाश्च द्विवचने भाषायाम्' इति सूत्रितम्, तदनन्तरं वार्तिककारश्च 'प्रत्यये भाषायां नित्यमिति' वार्तिकयांचकार। तथा च तदानीं भाषायामिति शब्देन संस्कृतभाषाया एव बोधोऽभवत्, नान्यस्या भाषाया इति।

निष्कर्षस्तु :—

यास्कमहर्षेः प्राङ् न कुत्रापि भाषाशब्दः प्रयुक्त उपलभ्यत इति। लोके तदा प्रचलिता बहुजनव्यवहारविषया संस्कृतवागेवासीदित्युक्तमेवास्माभिः, सैव च भाषाशब्दमलंकुर्वती जनानां मनांसि रञ्जयतिस्म। साम्प्रतं तु हिन्दीवागेव भाषाशब्दमधिकृत्य विराजते। तथा च श्रीकवितुलसीदासेन मानसस्यादावन्ते हिन्दीवागेव साम्प्रतिकी भाषेति स्पष्टमुद्घोषितम्।

तद्यथा :—

'स्वान्तःसुखाय तुलसी रघुनाथगाथा—
'भाषा' निबन्धमतिमञ्जुलमातनोति'।
'भाषाबद्धमिदं चकार तुलसीदासस्तथा मानसमि'ति।

---

१. ऋग० १०. ४. ५३। २. बृह० उप० १. ५. ३।
३. शत० ब्रा १. ४. ४. ७ ४. नि० १. २. १

तदेवं शब्दानां तत्तदर्थेषु शक्तिग्रहाग्रहयोर्व्यवहाराव्यवहाराभ्यां प्रकृतिरेव प्रधानं कारणम् । सा च प्रकृतिः सदा नवीनतामन्विष्यति । नवीनतायै च परिवर्तनं परिवर्धनमपेक्ष्यते । तच्च कालक्रमेण वस्तुनिचयेष्वपि स्वाभाविकमिति पश्यन्त्येव जनाः । तथा चैकः शब्दः सर्वदैकमेवार्थं बोधयतु, एकस्मिन्नर्थे एक एव च शब्द इति प्रकृतिर्न सहते । यतः प्रकृतिसिद्ध एव देशभेदेन कालभेदेन च शब्दानामप्यर्थेषु व्यवहारभेदः । दृश्यते हि लोके तैलगवेषणादिशब्दाः स्वव्युत्पत्तिप्रयोज्यार्थानन्तर्भावयन्तोऽपि क्रमेण विकासमाप्ताः सामान्येनेदानीं स्नेहान्वेषणाद्यर्थान् बोधयन्ति । अत एव च 'तिलतैलम्' 'गोगवेषणम्' इत्येतादृशा अपि शब्दा व्यवह्रियन्ते विज्ञैरपि ।

इत्थं विभिन्नदेशे विभिन्नावस्थाभिरशक्तैर्वक्तृभिश्च भाषावयवभूतानां शब्दानामुच्चारणमपि भिद्यते । तद् वै शीतोष्णप्रदेशवासिनामपि वा दाक्षिणात्यानां शब्दोच्चारणं स्थानविशेषादेवातिरिच्यते । एवमर्थसाम्येऽप्यवस्थाभेदात् स्त्रीपुरुषभेदाच्च शब्दोच्चारणे वैलक्षण्यं परिलक्ष्यते । तत्र शिशवः किल मधुरं भाषन्ते । योषितां वाचि लालित्यं माधुर्यं च स्वाभाविकमेव । ता यदि परोक्षेऽपि भाषेरन् पुनरपि शब्दोच्चारणविशेषादेव महिलावागसाविति समवधार्यते । एवं प्रायो यूनां वाचि ध्वनिगाम्भीर्यम्, वृद्धानां चाशक्त्या ऋतक प्रयोक्तव्ये लृतकत्वमिति संभ्रियते । तस्माच्छब्दोच्चारणं व्यवहारतो लोकेऽर्थबोधश्च स्वाभाविक इति ।

तदुक्तं स्वाभाविकत्वं गोनर्दीयेनापि :—

'उभयमिह वर्णेपूक्तम् अर्थवन्तोऽनर्थका' इति च । किमत्र न्यायम् । उभयमित्याह, कुतः स्वभावतः । तद्यथा समानमीहमानानां चाधीयानानां च केचिदर्थैर्युज्यन्ते अपरे न·····तत्र किमस्माभिः शक्यं कर्तुम्····· स्वाभाविकमेतदिति । [1]तदित्थं प्रकृतिरेव नियोजयति तथा कर्तुमिति सिद्धम् ।

---

१. व्या० महा० प्रत्याहार सू० ५.

तृतीयोऽध्यायः

भाषोत्पत्तिः

तत्र भावविकाराः—

अथ भाषा कथं प्रादुर्भूतेति विचार्यते। यतो हि 'संस्कृत-भाषाविज्ञानम्' इति प्रस्तुतनिबन्धस्य यद्यपि सन्ति बहूनि शब्दार्थध्वनिनिरूपणभूतानि, भाषोपचयापचयरूपाणि चाङ्गानि तथापि 'जायते अस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति षड भावविकारा भवन्ति' [1]इति निरुक्तोक्त-वार्ष्यायणेर्वचनात् प्रथमं जनिः, तदनु क्रमशः सत्ता, विपरिणामः, वृद्धिः, उपचयः, अदर्शनम्, इत्येवं च भावपदार्थानां प्रक्रमः स्वभावसिद्धः। तथा च भाषापि भवनात्मकेन भावेन परिलक्षितेति ज्ञात्वा कौतस्कुतः कथं वा सा जाता, किं वाग्वात्मिका, अण्वात्मिका, ज्ञानात्मिका वेति च विवेचनीयं विविधं विषयं मनसिकृत्य जायते च कथमित्यंशः पूर्वमस्माभिः परिष्क्रियते।

तत्प्रादुर्भावे विकासवादिमतम् :—

तत्र हि प्रथमं तदुत्पत्तौ भाषाविज्ञानविदां विदुषां विचाराः प्रस्तूयन्ते। तत्र विकासवादिनस्तर्कयन्ति, यत् पदार्थानां क्रमिको विकास इह जायते, ईश्वरवादिनां श्रीमतां भगवानपि पूर्वं मत्स्यरूपं ततश्च क्रमशः कूर्म-वाराह-नृसिंह-वामन-परशुराम-रामादिरूपमभजत। तथा च न सहसैवाका-शादागत्य मनुष्या अवोचन। अपितु महाप्रलयसमये हि नात्र भूमिः, केवलं जलमेवासीत्। बहुदिनानन्तरं पृथिवी बभूव। तदनु लतागुल्मौ-षधीनां ततश्च क्रमशः प्राणिनां मनुष्याणामपि स्वाभाविकं जननमभूत्। तैरेवावश्यकतानुसारेण भाषा निर्मिता, वस्त्रं निर्मितम्, किमधिकं गृहाः, उपवनानि, कासाराः, कूपाश्चेति सर्वम्। तत्र यावद्वस्तुनिर्माणे भाषैव समीचीनं साधनमिति सर्वैः सहर्षं स्वीक्रियते। अतश्च सा कुतः कथमिति कुतूहलं स्वाभाविकमन्वेषकाणां बुद्धावुदतिष्ठत। तदारभ्याद्यावधि विवदन्ते चेह बहवः, किन्त्विदमेव तदुत्पत्तौ निश्चितं बीजमिति परिष्कृत्य न कोऽपि पारं गतः। तर्कतरिश्च तेषां तत्रैव निमज्जति।

तथाहि :—

तत्र केचनाचक्षते यत् पूर्वजाः खलु पुरुषा भाषां विना कार्यावरोध-मनुभवन्तः संघीभूय तां रचयामासुः। रचिता च सा क्रमशः लोकैर्गृहीतेति।

---

१. नि० १. १. ३

तत्तु तुच्छम्, यतो भाषया विना संघीभवनमेवासंभूतम्, तत्र विचारचर्चा च कथमिति त एव जानन्तु। भवतु नाम कथमपि चेष्टादिकटाक्षैर्जनसम्मेलनम्, पुनरपि अस्माभिरत्र किं विधेयम्, किमर्थं च वयं समवेता कश्चास्माकं प्रस्तावः, इत्यादि च वाचा विना कः प्रस्तावयतिस्म। तस्माद् बुद्धेः परं तदनुसन्धानमिति।

अन्यमतम् :—

अन्ये चाहुः अनुकरणाद्धि भाषा प्रादुर्भूतेति। तत्र चानुकरणं तावत् पशुपक्षिणामेव, ते हि पूर्वजाः, मनुष्याश्चावरजाः, ततश्चाग्रजन्मनोऽनुकरणं स्मृतिसिद्धम्। एवं यथा काका इति जल्पन्ति वायसाः। चीची चटकाः। तथाच पुरा मानवास्तदव्यक्तान् ध्वनीन् श्रुत्वोत्सहन्तेस्म प्रयत्नांश्च चक्रुः। तत एव भाषायाः प्रभव इति केषांचन पाश्चात्त्यपण्डितानां पाण्डित्यम्।

तत्र यद्यप्येषोऽनुकृतिपक्षः 'काक इति शब्दानुकृतिः। तदित्थं शकुनिषु बहुलम्' [1]इति आचार्यप्रवरं यास्कम्,

'अनुकरणं चानितिपरम्' [2]'अव्यक्तानुकरणस्यात इतौ' [3]इति सूत्रे महर्षिपाणिनिं च स्मारयति। तथापि भाषोत्पत्तावमूनि साधनानीति नहि भ्रमितव्यम्। यतोऽनुकरणं नाम पशुपक्षिणां मनुष्याणां च सर्वेषां भवतीति समुदं मन्ये। तदनु तेषां नामान्यपि शब्दानुकृतिमूलकानि कानि चिदिति च सहे। किन्तु ततः पूर्वं मानवा अभाषन्त एव नहि किंचित् पक्षिणश्च कूजन्तिस्मेत्यादि न बुद्धावुपारोहति।

किंच, कथं चाव्यक्तानामनर्थकानामनुकरणशब्दानां शब्दरूपेण परिणतम्, इत्यस्य न किमप्युत्तरं लभे। तस्मादेभिर्विचारैः सन्तोषो न स्यादिति।

अपरमतम् :—

अपरे च पुनः कल्पन्ते। यत् पुरा हर्षातिरेकादुद्वेगबाहुल्याद् वा मनुष्यमुखात् केचिद् ध्वनयो निःसृताः, तदनु तैरेव हर्षविस्मयादिबोधकध्वनिरूपशब्दैर्भाषोद्गमो विकासश्च जात इति। सत्यम्, पुनरपि कल्पनेयं भाषोत्पत्तिं परितो नाङ्गीकरोति तथा भूतानां शब्दानामल्पविषयत्वाद् देशभेदेन भिन्नत्वाच्च।

किंच ते शब्दाः प्रायशोऽव्यक्तध्वनिमयाः, व्यक्तशब्दनिर्माणे कथं प्रभवाः समासन्निति।

---

१. नि० ३. ४. १८ २. पा० सू० १. ४. ६२ ३. पा० सू० ६. १. ९८

तदित्थं कल्पना शेमुषीजुषां किल विवेचकानामत्र मतैक्यन्न लक्ष्यते। किं कर्त्तव्यम्, विषय एवैतादृशः, यत्र धिषणा शीघ्रमिदमित्थमिति विविच्य निर्धारयितुं नाग्रेसरति समीचीनमिति।

संस्कृतशास्त्रेषु तद्विवेचनम् :—

संस्कृतशास्त्रेषु च भाषोत्पत्तेर्विचारो बहुधोपलभ्यते। भाषा च तावच्छब्दानां समूह एवेति प्रागुक्तमस्माभिः। तथा च दर्शनशास्त्रेषु, शिक्षासु, व्याकरणे, किंच प्रातिशाख्येषु, तन्त्रग्रन्थेषु च विकीर्णोऽयं विषय इति समालोक्यते। न तत्र केवलं यथा तथेत्यनुकल्प्य विद्वांसो विरता बभूवुः, अपितु वैज्ञानिकरीत्या पुष्टैः प्रमाणैश्च तद्विवेचनं यथाकालं कृतवन्तः।

दृश्यन्ते च तत्रापि बहवः विप्रतिपत्तयः, तथाहि न्यायभाष्यकारो भगवान् वात्स्यायनः।

१. 'आकाशगुणः शब्दो विभुर्नित्योऽभिव्यक्तिधर्मकः' इत्येके।

२. 'गन्धादिसहवृत्तिर्द्रव्येषु सन्निविष्टो गन्धादिवदवस्थितोऽभिव्यक्तिधर्मकः' इत्यपरे।

३. 'आकाशगुणः शब्द उत्पत्तिनिरोधधर्मको बुद्धिवत्' इत्यपरे।

४. 'महाभूतसंक्षोभजः शब्दोऽनाश्रित उत्पत्तिधर्मको निरोधधर्मकः' इत्यन्ये[1]।

इत्येवं मतचतुष्टयं विविक्तवान्। तत्र प्रथमं प्रभाकरमतम्, द्वितीयं सांख्यीयमतम्, तृतीयं वैशेषिकमतम्, तुरीयं च बौद्धमतमिति प्रसन्नपदाख्यव्याख्यायाम्।

एवं वाक्यपदीयादिष्वपि बहवो मतभेदाः प्रदर्शिताः, तेऽनुपदमुपदर्शयिष्यन्ते।

तत्र नैयायिकमतम् :—

शब्दस्य गुणत्वमुत्पादि-विनाशित्वं च मन्यमाना नैयायिकाः प्राहुः—'संयोगाद् विभागाच्च शब्दाच्च शब्दनिष्पत्तिः' इति। स च व्यक्ताव्यक्तसाधारणः। यथा वस्तुनोरभिघाताख्यात् संयोगात् 'पटत् पटदिति' विभागाच्च वेणोः 'चटचटेति' अव्यक्ताः शब्दाः प्रभवन्ति, तथैव जिह्वाव्यापारेण तालवादिस्थानेषु वायोः संयोगाद् व्यक्ताः शब्दा अपि निष्पद्यन्ते।

---

१. न्यायसू० २. २. १२

शब्दाच्छब्दनिष्पत्तिस्तु शब्दसन्तानद्वारा सिध्यति। यतः संयोग-विभागाभ्यां यत्र शब्दानां जनिस्तत्र शब्दसन्तानः क्रमशस्तन्यते। यथा वीचिः वीच्यन्तरमुत्पादयति तथैव शब्दोऽपि शब्दान्तरमुद्भावयतीति सिद्धान्तः। यदि शब्दाच्छब्दनिष्पत्तिर्नाङ्गीक्रियेत तदा परश्रवणगोचर-तामलभमान एव शब्द उत्पत्तिस्थानेषु विलीनतां लभेत। यतः शब्दस्य गुणत्वाङ्गीकारात्तत्र क्रिया न जायते। शब्दस्य गुणत्वसाधने प्रमाणं चानुमानमेव। तथाहि शब्दो गुणः चक्षुर्ग्रहणायोग्यबहिरिन्द्रियग्राह्यजाति मत्त्वात् स्पर्शवदिति। अपि वाऽस्तु द्रव्यसमवेतो गुणत्वात् संयोगवदिति।

तथा चोक्तं मुक्तावल्याम्—

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः[1] इति।

किंच शब्दो न द्रव्यं यत्र क्रिया जायेत। यतो द्रव्ये हि अनेकद्रव्योपा-दानकता सर्वत्र च सिद्धा। नच तथा शब्दे। नापि कर्म 'कर्म कर्मसाध्यं न विद्यते' इति नियमान्नैका क्रिया क्रियान्तरमुत्पादयति, शब्दस्तु शब्दान्तर-मुत्पादयतीति कर्मत्वमपि शब्दे न सिध्यति!

किंच विभुपदार्थेषु किल कालाकाशात्मदिक्षु क्रिया न विद्यत इति सर्वसिद्धान्तः। तथा च कर्णशष्कुल्यवच्छिन्नाकाशो न किमपि कर्म जायते। अतस्तस्य गमनन्न कयापि रीत्या संघटते। ततश्च पारिशेष्याद् गुणत्वं भगवता कणादेन व्यवस्थापितम्।

तदित्थं शब्दसंतानः स्वीकार्यः। स च वीचितरंगन्यायेन, कदम्ब-कोरकन्यायेन वा शब्दान्तरमुत्पादयतीति शब्दाच्छब्दनिष्पत्तिर्जाता।

शब्दानित्यत्वसाधनानि—

स च शब्दोऽनित्यः, 'आदिमत्वादैन्द्रियकत्वात् कृतकवदुपचारा-च्चे'[2]ति न्यायसूत्रम्। तत्र च पूर्वमादिमत्वादिति हेतोः शब्दानित्यत्वं साध्यते। आदिमत्वन्नाम आदीयते उत्पाद्यतेऽस्मादित्यादिः कारणम्। तथा च शब्दोऽनित्यः कारणवत्त्वाद् घटादिवदित्यनुमित्या घटोत्पत्तौ यथा कपा-लत्वावच्छिन्ना समवायिकारणता कपाले, कपालद्वयसंयोगे चासमवायि-कारणता निमित्तकारणानि च दण्डादावित्युच्यते। तथैव शब्दोत्पत्तौ पूर्वो-क्तानि 'संयोगविभागशब्दाश्चेति त्रीणि निमित्तकारणानि सिद्धान्येव। कारणवतश्चानित्यत्वमनुमानादेव सिद्धं घटादिवत्। यद्वा आदिमत्व-न्नासीभूत्वा भावित्वं तच्च शब्दे प्रत्यक्षसिद्धम्।

---

१. मुक्तावली का० सं० ४४। २. न्याय सू० २. २. १३।

यदि च प्रदीपादिप्रकाशेन यथा रूपादिकमभिव्यज्यते तथैव व्यञ्जकेन संयोगादिना शब्दानामभिव्यक्तिरेव नोत्पत्तिरिति च केषांचिन्मतम्। तत्तु न शोभनम्। यतो नष्टे प्रकाशे न कथमपि कौशिकैर्विना कैरपि रूपं गृह्यते। एवमिहापि भेरीदण्डादिसंयोगरूपव्यञ्जकस्य नाशे सति शब्दो नानुश्रूयेत। किन्तु तथा न भवति; दूरस्थेन पुरुषेण चक्षुषा यस्मिन् क्षणे भेरीदण्डसंयोगो दृश्यते तस्मिन्नेव क्षणे शब्दो न श्रूयते, क्षणान्तरे निवृत्ते भेरीदण्डसंयोगे श्रूयते। अतः संयोगादिना शब्द उत्पाद्यते नाभिव्यज्यते। उत्पन्नश्च स शब्दसंतानेन शब्दान्तरमुत्पादयति ततश्च दूरतोऽपि श्रयत इति सरणिः।

नचैवं घटप्रध्वंसस्यादिमत्वं नित्यत्वन्नियतम्। तत्र च व्यभिचारः स्यात्। यतो हि व्यभिचारित्वं नाम साध्याभाववति वृत्तित्वमिति। तथा च 'घटप्रध्वंसो जायते' इत्यभियुक्तव्यवहारात्तत्रादित्वमस्ति। किन्तु घट-प्रध्वंसोऽनित्य इति न तथा। तस्मात् साध्याभाववति हेतोः सत्त्वाद् व्यभि-चारोऽपि समीचीन एवेति।

अत्र वक्तव्यम् :

नित्यत्वं तावद् द्विविधम्। तात्त्विकं भात्तं चेति। तत्र तात्त्विकन्नाम 'उत्पत्तिरहितत्वे सति स्वरूपविनाशराहित्यम्' एतच्च नित्यत्वं ध्वंसं नाङ्गीकरोति। भात्तं च नित्यत्वं विनाशराहित्यमेवात एव घटप्रध्वंसमपि नित्यत्वेन लक्षयति। इह तु पुनर्नौपचारिकस्यापितु वास्तविकस्य नित्यत्वस्याभावोऽस्माभिः साध्यते। एवंच नात्र व्यभिचारशङ्कापीति पुष्कलम् आदिमत्वाच्छब्दानित्यत्वमिति।

किंच, ऐन्द्रियकत्वादपि शब्दानित्यत्वं साध्यते। तथाहि शब्दोऽनित्यः, इन्द्रियग्राह्यत्वाद् रूपादिवदिति। नच यस्येन्द्रियग्राह्यत्वम्, तस्य सर्वस्या-नित्यत्वमिति स्वीकारे येनेन्द्रियेण या व्यक्तिर्गृह्यते तद्गता जातिस्तद-भावश्च तेनैवेन्द्रियेण गृह्यत इति नियमाद् घटत्वादिजातेरपीन्द्रियसम्बन्ध-ग्राह्यत्वादनित्यत्वमापत्स्यत इति वाच्यम्, ऐन्द्रियकत्वमित्यस्य सामान्य-वत्त्वे सति, ऐन्द्रियकत्वमिति परिष्कारेणादोषात्। तथा च न कुत्रापि व्यभिचारः। भाष्यकारस्तु ऐन्द्रियकत्वादित्यस्य, इन्द्रियप्रत्यासत्ति-ग्राह्यत्वादित्यर्थमाह। उक्तं हि पूर्वम्—यदि शब्दसन्तानो न स्यात् तर्हि न कर्णशष्कुल्यवच्छिन्ने नभसि शब्दः प्रत्यासन्नो भवेत्।

तदेवं प्रत्यासत्तिरेव शब्दसन्तानमनुमापयन्ति। सिद्धे च शब्द-सन्ताने सुतरां सिद्धमनित्यत्वम्, उत्तरोत्तरमुत्पत्तेरेव सन्तानशब्दार्थत्वात्।

तदित्थम्—ऐन्द्रियकत्वादपि शब्दानित्यत्वं सुसिद्धम् ।

एवं कृतकवदुपचाराच्छब्दोऽनित्य इत्याचष्टे । यथाऽनित्यपदार्थे तीव्रं दुःखम्, मन्दं दुःखमिति व्यवहारः सर्वजनसंवेद्यः, तथैव तीव्रः शब्दो मन्दः शब्द इति व्यवहारोपि श्रोतृभिः स्वीक्रियते, इत्युभयोः साम्यादनित्यत्वं सुकरमिति भावः ।

यदि च पुनर्नित्येष्वपि कालात्माकाशदिक्षु 'अयमाकाशप्रदेशः' 'अयं च दिक्प्रदेश' इत्यादि व्यवहाराद्धेतव्यभिचरिष्यतीत्युच्यते, तदपि न, कारणद्रव्यस्य प्रदेशशब्देनाभिधानमिति गौतमसूत्रस्वारस्येन नित्येषु प्रदेशव्यवहारो न वास्तविकः, अपितु भाक्त एवेति कृतकवदुपचारादपि शब्दानित्यत्वमेव ।

तदित्थमादिमत्वादैन्द्रियकत्वात् कृतकवदुपचाराच्चेति सूत्राच्छब्दोऽनित्य इति सिद्धम् ।

शब्दनित्यत्वखण्डनम्

शब्दनित्यत्वसाधने याश्च किल युक्तयो भगवता गौतमेन स्वयमुद्भाव्य खण्डितास्तासु काश्चनेहोपदर्श्यन्ते ।

तत्र प्रथमम्—शब्दो नित्यः, अस्पर्शत्वादाकाशवदिति यदुच्यते तत्तु न निर्मलम्, अस्पर्शत्वस्य नित्यत्वस्य च समव्याप्तेरभावात् । दृश्यते हि नित्यत्वाभावेऽप्यस्पर्शत्वं क्रियायाम् । स्पर्शरहितापि क्रिया, न नित्या, तस्माद् व्यभिचारः । यत्र यत्र नित्यत्वम्—तत्र सर्वत्र स्पर्शत्वमित्यपि न नियतम्, परमाणौ व्यभिचारात् ।

किंच संप्रदानादध्यापनाद्वेति हेतोः शब्दस्य नित्यत्वमपि न समीचीनम्, यतो नहि संप्रदानरूपमध्यापनम्, 'गुरुमुखान्निःसृतो यः शब्दः स एव शिष्यमभिगच्छतीति' बोधयति, अपितु नृत्यशिक्षणे यथा आचार्यचेष्टाया अनुकरणं भवति तद्वदध्यापने तच्छब्दस्याप्यनुकरणमेव, अर्थाद् यं मन्त्रं शिक्षणार्थं गुरुरुच्चारयति तं तथैव शिष्योपि । शब्दा उभयत्र भिन्नाः ।

तदेवम—अनित्यनृत्यक्रियायामपि अध्यापनसादृश्यभानत्वात् नाध्यापनाच्छब्दनित्यत्वं शास्यते ।

नचावस्थितस्यैव शब्दस्य पुनः पुनरुच्चारणमभ्यास इत्यभिधानम्, तद्यदि शब्दोऽनित्यः स्यात् कथं तस्याभ्यसनमिति शब्दस्य नित्यत्वमावश्यकमिति निश्चेतव्यम्, अभ्यासस्यानित्यवस्तुष्वपि 'द्विर्नृत्यतु भवान्' त्रिर्नृत्यतु भवानित्यादिष्वविशेषव्यवहारात् ।

तस्मादभ्यासादिति हेतोरपि शब्दस्यानित्यमनुमातुं न शक्यते ।

यदि च पुनः शब्दस्य विनाशकारणन्नोपलभ्यते ततश्च शब्दः शाश्वत इति मीमांस्यते, तदपि न, यतो यथा बाणस्य गतौ वेगाख्यप्रसाधनीभूते संस्कारे कुड्यादिप्रतिघातिद्रव्यसंयोगान्निरुद्धे गमनाभावः । तथैव दण्डाभिघाताद् यस्मिन् क्षणे घण्टारवो जायते तस्मिन्नेव क्षणे यदि कश्चिन् पुरुषस्तां संस्पृशति तदावश्यं स रवो विनश्यति, ततः शब्दसन्तानश्च नोत्पद्यते । अनुत्पन्ने च शब्दश्रवणाभावः सुतरां सिद्धः । तदित्थम्—प्रतिघातिद्रव्यसंयोगः शब्दविनाशकारणमवदातम् ।

एवं नैयायिकनये उत्पादिविनाशित्वमनित्यत्वमाकाशगुणत्वं च शब्दस्य सिद्धम् ।

तत्समालोचनम्—

एवमनित्यत्वेऽभ्युपगते शब्दार्थबोधानुपपत्तिर्भवति । 'तथाहि—'उत्पद्यन्ते विनश्यन्ति चेति क्षणत्रयस्य प्राघुणिका वर्णाः कथं सन्निधिं विना वाचकतां वक्ष्यन्ति । वायुकण्ठसंयोगादिना हि प्रथमक्षणे वर्ण उत्पद्येत द्वितीयक्षणे तिष्ठेत्, वीचितरंगन्यायेन स्वसमानं वर्णमुत्पादयेच्च । तस्मिन्नेव च क्षणे वायुकण्ठाद्यभिघाताद् द्वितीयवर्णोत्पत्तिः । तृतीयक्षणे वीचितरंगन्यायोत्पन्नेन सजातीयवर्णेन पूर्ववर्णस्य नाशः' इति धारा प्रवहति । अन्त्यस्य चोपान्त्यशब्दध्वंसेनैव ध्वंस इति तार्किकपद्धतिः । ततश्चार्थावबोधो दुर्लभः ।

यदि च वीचितरङ्गन्यायेन शब्दजाः शब्दाः श्रोतुः कर्णदेशं गत्वा श्रावणप्रत्यक्षविषयतामाप्नुवन्तीति निश्चयः । पुनरपि वर्णानां संघो न सेत्स्यतीति तादवस्थ्यम् ।

नच पदस्य प्रथमोच्चारितवर्णादेवार्थबोधः कल्पनीयः, वर्णान्तरोच्चारणवैयर्थ्यप्रसंगात् । एवञ्चापिपूर्ववर्णस्थितिकाले द्वितीयवर्णोत्पत्तिः स्थितिश्च-इति भ्रमितव्यम्, पूर्ववर्णनाशोत्तरं यत्नान्तरेण वर्णान्तरोत्पत्तेरधुनैव स्वीकारत् ।

नच विनष्टानामपि वर्णानां स्मृत्युपारूढानां स्मृत्युपारूढ एव समुदायः सेत्स्यति, अस्तु वा तत्तद्वर्णसंस्कारसहितचरमवर्णस्य वाचकत्वम्, तथैव प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य पदस्य वाक्यार्थबोधकत्वमपीति वक्तुं युक्तम्, सरो-रस-नदी-दीन-इत्यादावर्थपार्थक्यानुपपत्तेः । एक एव तत्र वर्णसमुदायः पुनः कथमर्थभेद इति ।

किंच संस्कारवशादव्यवहितोत्तरसम्बन्धेनोत्तरवर्णप्रत्यक्षक्षणे पूर्वपूर्ववर्णवत्त्वम्, तत्राप्यनुभूयत इति वदितुमपि न शक्यम्। अव्यवहितोत्तरसम्बन्धस्य तत्राभावात्। अव्यवहितोत्तरत्वभ्रमः, तत्तद्वर्णाधिकरणक्षणाव्यवहितोत्तरक्षणवृत्तित्वम्। तत्र वृत्तित्वं वर्णधर्मः, तद्विशेषणतया च पूर्ववर्णस्यापि तत्र प्रवेशः। तथा च नष्टस्य वर्णस्य कथं विशेषताऽस्तु, कथं वा नष्टे वर्णे धर्मो गृह्यताम्।

ननु च तत्तद्वर्णबुद्धीनां पौर्वापर्यं वर्णेष्वारोपयिष्यते, तेनाव्यवहितोत्तरत्वप्रतीतिर्भविष्यतीति चेत् तदपि न, बुद्धीनामपि नैयायिकमते क्षणिकत्वांगीकारेण तासामप्युत्पन्नप्रध्वंसितया तत्रापि पौर्वापर्यग्रहणासंभवात्। सर्वासां बुद्धीनां पुनरेकस्यां समूहालम्बनबुद्धौ समाविष्टानां पौर्वापर्यग्रहसंभव इति चेत्, विचार्यतां तावत् कियद् गौरवमत्रेति।

किंच सर इत्यत्र पंचवर्णाः रस इत्यत्रापि तथा। तत्र जिह्वाप्रेरित वायुसंयोगेन प्रथमवर्णोत्पत्तिः, तदैव च जिह्वायां क्रियान्तरोत्पत्तिरिति प्रथमक्षणः। तदनु च वर्णेन वीचितरङ्गन्यायेन वर्णान्तरोत्पादनं स्वाविषयकबुद्ध्युत्पादनं जिह्वायां च पूर्ववर्णसंयोगनाशः इत्येकः क्षणः, सोऽयं द्वितीयः। तदनु उत्पन्नेनवर्णान्तरेणोत्पादकस्य वर्णस्य नाशः। बुद्ध्या संस्कारजननं जिह्वाया वायोर्वा स्थानान्तरसंयोग इति तृतीयः क्षणः। तदनु च संस्कारेण बुद्धेर्नाशः; वायुसंयोगेन वर्णान्तरोत्पाद इति चतुर्थः क्षणः। एवमग्रेऽपि बोध्यम्। यस्योत्तरक्षण एव वर्णान्तरग्रहणरूपं बुद्ध्यन्तरमित्यादिक्रमः प्रचलति; तदा कदा व्यवहितोत्तरत्वबुद्धिरुत्पद्यताम्। मध्ये व्यवधाने वर्णस्य विनाशापत्या तद्ग्रह एव न संभवेदिति दूरे अर्थबोधकथा।

अनेन प्रकारेण विंशतिः क्षणाः सरोरस इत्यादौ सर्ववर्णग्रहणे व्यतीयुः। तदनु च पदान्तरोच्चारणं तस्यापि एवमेव ग्रहणमिति क्रमोऽयं यावद् वाक्यसमाप्ति प्रचलेत्। तदनु सर्वबुद्धीनां समूहालम्बनरूपमेवं स्मरणं सम्भवेत्। ततश्चार्थावबोधे विलम्बोऽनुभवविरुद्ध आपतेत्। येन क्रमेणानुभवस्तेनैव क्रमेण स्मरणमिति नियमादर्शनात्; स्मरणविपर्ययस्यापि सम्भवात् सर्वोपप्लवः प्रसज्येत। एकं पदमेकं वाक्यमिति बुद्धेश्च सर्वथानाधारत्वापत्तिः; वर्णानां बहुत्वेनैकत्वग्रहानुपपत्तेः।

ननु च सेनावनवदेकत्वं समूहेऽपि ज्ञास्यत इति चेन्मैवं, यतो हि तत्रौपचारिक्यापि बुद्ध्या व्यवहारनिर्वाहसम्भवः। इह तु एकत्वग्रहणमेवार्थावबोधे प्रधानं प्रयोजकम्। नहि कुन्तलशब्दघटकेन कुन्तशब्देन शस्त्ररूपार्थस्य प्रतीतिर्भवति; नवा शुनासीरघटकेन शुनेति पदेन कुक्कुररूपार्थः प्रतीयते।

वर्णसमुदायमात्रस्य बोधकत्वे इहापि तादृशसमुदायप्रत्यभिज्ञानात् तत्तदर्थाव-बोधापत्तिर्दुर्वारा। तत्रैकपदत्वग्रहो नास्तीत्येव समाधानं सम्भवेन्नान्यः पन्थाः। तस्मात् पदे एकत्वग्रह एवार्थावबोधे प्रधानप्रयोजकः। स एवौपचारिकश्चेत् गतमर्थव्यवस्थया।

किं च सेनायां वने वा किंचिन्न्यूनत्वे आधिक्येऽपि वा कार्यसाधकत्वं दृश्यते। इहत्वेकस्यापि वर्णस्याभावे व्यत्यासे वा न तत्तदर्थबोधप्रत्याशा। कूप-सूप-यूप-इत्यादावेकवर्णमात्रवैलक्षण्येन सुमहद् वैलक्षण्यं भवतीति स्पष्टं महाभाष्ये द्वितीयाह्निके,

तस्माद् वर्णसमुदायाऽनुपपत्तेर्नार्थावबोधसंभवः।

अपिच मौनी मनुष्यः यदा पद्यं निर्माय विलिख्य चान्यस्मै पठनार्थं ददाति तदा तत्रोच्चारणं जात्वपि न जायते, अर्थश्चावगम्यते ततोऽपि; किन्तु नैयायिकानां सदने शब्दोऽयमिति न कोऽपि व्यवहर्तुं शक्नुयात्। नहि तत्र वायोर्जिह्वाया वा संयोगः संजातो यतः शब्दोत्पत्तिरिति। तत्रार्थावबोधे च नहि विलम्बो विभ्रमः सन्देहो वेति सर्वैरनुभूयते। नच तत्र लिप्यादिभिः शब्दस्य स्मरणमिति वक्तुं शक्यते, तादृशानुपूर्व्याः पूर्वमनुभवाभावेन स्मरणा-संभवात्। नच स्मर्यमाणानां वर्णानामभिनवानुपूर्वीकल्पनसंभव; असत्सु वर्णेषु सन्निवेश-कल्पनाया असंभवात्। नहीष्टकानां स्मरणं मन्दिरनिर्मिति-कारणं कुत्रापि केनापि श्रुतम्। तथा चाऽत्रापि स्मरणमात्रेण न निर्वाहः। तस्मात् संयोगविभागरूपजनकस्याभावेऽपि शब्दोत्पत्तिः सुतरां सिद्धा।

तार्किकाश्च संयोगविभागाभ्यामुत्पन्नं ध्वनिरूपं कार्यशब्दमेव जानन्ति नत्वर्थबोधकं नित्यं शब्दतत्त्वापरनामकं स्फोटम्, अतोऽनित्यः शब्दः कार्यत्वाद् घटवदिति तर्कयन्ति तत्र किं कुर्मः।

ध्वनेरनित्यत्वं शब्दस्य नित्यत्वं च

वस्तुतस्तु संयोगविभागाभ्यामुत्पन्नो ध्वनिर्ह्यनित्यः शब्दस्तु नित्य इति सिद्धान्तः।

तथा चोक्तं भगवता पतंजलिना—

एवं तर्हि स्फोटः शब्दः ध्वनिः शब्दगुणः कथम्? "भेर्यावातवत्" तद्यथा भेर्यावातो भेरीमाहत्य कश्चिद् विंशतिपदानि गच्छति, कश्चित् त्रिंशत्, कश्चिच्चत्वारिंशत् स्फोटश्चतावानेव भवति ध्वनिकृता वृद्धिः।

'ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।
अल्पो महाँश्च केषांचिदुभयं तत्स्वभावतः॥'[१] इति॥

---

१. व्या० महा० १, १, सू० ६९।

अत्र ध्वनिपदेन प्राकृतवैकृतावुभावपि गृह्येते इति चात्रे स्फुटीभविष्यति। अस्तु।

शब्दादेव सर्वप्रभवः

निगमागमादिभिरपि तेनैव नित्यशब्देन जगदुत्पत्तिर्गीयते। तथाहि—

"सभूरिति व्याहरत्, भूमिमसृजत्"[1] इति॥

"भूरिति वै प्रजापतिः, आत्मानमजनयत"[2] इति।

मनुरपि मन्यते—

सर्वेषां तु सनामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥[3] इति।

आगमा अपि नादादेव जगदुत्पत्तिमुद्घोषयन्ति। तदेतत्सर्वं शब्दतत्त्वं मनागपि न संस्पृश्यते तार्किकैरित्यलं परदोषगवेषणयेति।

मीमांसकमतेऽपि शब्दनित्यत्वबाधकत्वम्

एवं वर्णनित्यत्ववादिनां मीमांसकानां मतेऽपि संगतेरभावाद् अर्थाबबोधो न स्यात्; यतस्तत्र नैयायिकाः संयोगविभागाभ्यां वर्णानुत्पादयन्ति। मीमांसकाश्च पुनस्ताभ्यामभिव्यंजयन्तीत्येतयोरेतावानेव भेदः। तत्र वर्णसमुदायं तु द्वावपि भर्तुं न शक्नुतः।

किंच मीमांसकैः शाब्दिकैरिव पदं वाक्यं वा वर्णातिरिक्तं नाङ्गीक्रियते; किन्तु क्रमोपलक्षिता वर्णा एव "पदम्" "वाक्यम्" इति प्रत्यभिज्ञायते। ततश्च कथमुदेति समुदायः। नहि तालवाद्यभिव्यञ्जितानां वर्णानामेककालावच्छेदेनोपस्थितिः केनापि स्वीकृता; अनुभवविरोधात्। नचात्र पूर्वपूर्ववर्णानुभवजन्यस्मरणचर्चोपयुज्यते; राजा जारा, नदी दीन इत्यादिपूर्वोक्तव्यत्यासस्य जागरूकत्वाद्। नायं नियमो यदनुभवक्रमानुरूपमेव स्मरणं सर्वत्र। दृश्यते हि लोकेऽस्तमनं पूर्वम्; अनस्तमनं च पश्चात् स्मरन्ति मानवाः। तस्माद् अनुभवजन्यस्मरणाय मेहानुकूलो वर्णसमूहः; अतश्चार्थानवबोधएवेति समापद्यते।

अपिच मीमांसकानां मतेऽपि औन्निना निर्मितं लिखितं च पद्यमाश्चर्यकरमेव। नहि तत्र वायोर्जिह्वाया वा संयोगो यतः शब्दाभिव्यक्तिरिति। या खलु दोषपरम्परा नैयायिकानां शिरसि सैवैतेषामप्यग्रे नरीनृत्यते।

---

१. तै० २. २. ४. २। २. शत० ब्रा० २. १. ४. १३।

३. मनु० १. २१।

किंच मीमांसकेषु गुरुमते शब्दः आकाशगुणः। भाट्टमते तु शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धवेद्यत्वाद् घटवदित्याद्यनुमानद्वारा शब्दस्य द्रव्यत्वमिति वैमत्यं यद्यपि; तथापि वर्णाभिव्यक्तौ न तथा। ततश्च वर्णा एव शब्दः; सोऽयं गकार इत्यादिप्रत्यभिज्ञया च तस्य नित्यत्वमिति जानतामपि शब्दतत्त्वमजानतां तेषां न कयाऽपि रीत्या वर्णानां साधु संगतिरिति कुतोऽर्थबोधनियताप्तिः स्यात्। अस्तु।

स च नित्यः शब्दः स्फोट एव

पुनरपि शब्दादर्थावबोधः कथमिति जिज्ञासा अभिनवेव क्राम्यतीति चेद् न; स्फुटत्यर्थो यस्मादिति स्फोटेनाङ्गीकारात्।

ननु च कश्चासावभिनवः स्फोटः; यतोऽर्थः स्फुटति प्रकाशते ज्ञातो भवतीति चेद्, अत्र शाब्दिका भाषन्ते—

तत्र प्रथमन्नहि कुलालकलशवत् स्फोटः चक्रचीवराभ्यामिव जिह्वाया वायोर्वा संयोगादुत्पद्यते; किन्तु अभिव्यज्यते। अभिव्यक्तौ मानसाभिव्यक्तिरत्र प्रधानम्। तत्रापि व्यापारः प्रचलतीत्युपरिष्टाद् वक्ष्यते। ध्वनिरूपशब्दाभिव्यक्तौ यद्यपि ताल्वादिव्यापारो नियन्त्रित इति प्रतिवर्णमनुभूयते; किन्तु स्फेटाभिव्यक्तौ तु न केवलस्यास्योपयोगः; यतो मौनिश्लोके मनोव्यापार एव नतु रसनाया इत्यनुभवन्ति समीचीनं अजञ्जपूका अपि।

यदि च यत्रापि तनीयसी कापि रसना मनसा साकं रमत इति कश्चिद् वदितुमुत्सहेत; तदा कर्णौ पिधाय ततोऽन्यत्र गमनमेव श्रेयस्करं शब्दतत्त्वविदाम्। तत्रापि स्फोटाभिव्यंजकः प्राणरूपो वायुरेवेति नागेशमतं परतो दर्शयिष्यामः।

प्रकृते च यः खलु वर्णव्यतिरिक्तः तत्तद्वर्णाभिषिक्तो नूतन इवावभासमानोऽनुभवपथमारोहति स एवार्थस्फोटनक्षमतामावहति। अतएव स्फोटपदभाग् भवतीत्यवगन्तव्यम्।

नच स्फोटरूपकारणसिद्धे सत्यर्थप्रतीतिरूपकार्यस्य सिद्धिः; अर्थसिद्धौ च स्फोटस्यावगतिरित्यन्योन्याश्रय इति वाच्यम; 'गौरित्येकम् पदम्" "गामानयेत्येकं वाक्यमि"ति व्यवहारेणैवावगमात्। ततश्च नायमपूर्वः स्फोटः स्फुटति यतोऽन्योन्याश्रय इति।

तथा चोक्तं शेषकृष्णेन—

इदं पद्यमिदं वाक्यमिमे वर्णा इति त्रिषु।
प्रत्ययेषु स्फुटं स्फोट एक एवानुभूयते॥[१] इति॥

---

१. स्फोट० ११।

तत्र गौरित्यत्र पूर्वपूर्ववर्णग्रहणाहितसंस्कारायामनुसंहारबुद्धावबश्यमभिन्नं वस्त्वेकं समुल्लसतीत्येषणीयमिति" तट्टीका। अर्थात् तत्रैकत्वनानात्वयोरसमवायाद् नहि वर्णा गोचरीभूताः ततश्चैकं वस्तु स्फोट एवार्थप्रकाशकः सिद्धः।

नच यथा वनमित्युक्ते वृक्षा एव लक्षिता भवन्ति; तथैव पदमिति वाक्यमिति वा प्रतिपादने वर्णा एवानुभूताः स्युरिति कल्पनीयम्, पदे तदवयवभूतवर्णानामस्वीकारात्। अभिव्यंजकध्वनिगतं सादृश्यमेव वर्णावभासं प्रयोजयति नतु स्फोटातिरिक्ता वर्णाः सन्तीति मन्वते वैयाकरणाः। तदेतदुक्तं हरिणा—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन। [१] इति॥

ननु च भोस्त्वयापि वर्णव्यतिरिक्तस्फोटस्वीकारे सततं तदभिव्यक्त्यभावाद्, अभिव्यंजका ध्वनयः स्वीकार्या एव, ते च क्षणिका एव स्युरिति समुदायानुपपत्तिरूपदोषभारस्तवापि शिरसि पतति। यदि च तत्र प्रथमादेव ध्वनेः स्फोटः प्रतीयते तदा द्वितीयादीनां ध्वनीनां वैयर्थ्यं स्पष्टमेव; प्रत्येकध्वनेरस्थायित्वात्। ससुदायस्तु संघटत एव नहि, ततोऽभिव्यक्तिस्तु दूरे आस्ताम्। एवं चोभावपि समानावेवेति मीमांसकादयः।

तदुपरि शाब्दिकाः कथयन्ति—

यद् यथा रात्रिकानां रत्नतत्त्वज्ञानं पौनःपुन्येन दर्शनेन साधु जायते; तथाच स्फोटानुभवेऽपि प्रथमतो ध्वनेर्जातु स्फुटाभिव्यक्तिस्ततश्च क्रमशो द्वितीयादिना स्फुटतराभिव्यक्तिरित्येवमन्तिमेन ध्वनिना सार्धं पूर्णतयाऽर्थावगतिरिति नहि दोषकणिकाऽस्माकम्मते।

तथा चोक्तम्—

पूर्वपूर्वानुभूजन्यभावनासचिवेऽन्तिमे।
चेतसि स्फुरति स्फोटो रत्नतत्त्वमिव स्फुटम्॥[२] इति।

वाक्यपदीयकारा अपि तदेवाहु—

नादैराहितबीजायामन्त्येन ध्वनिना सह।
आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते॥[३] इति।

अस्यायमाशयो यत्—

प्रथमेन ध्वनिना किंचिद् भावनाबीजमाहितं भवति, ततश्च कश्चित् कार्य-

---

१. वाक्य० १. ७३। २. स्फोट० १३। ३. वाक्य० १. ८५।

जननशक्तिरूपः परिपाको जायते। एवं च क्रमशः परिपाकस्य पुष्टौ सत्यामन्त्येन नादेन समं बुद्धौ स्फोटात्मकः शब्दो निश्चीयत इति।

भगवान् पतंजलिः शब्दानां पौर्वापर्यमपि बुद्धावेव निर्णीतवान्।

तच्चेत्थम्—

बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तत्त्वन्नीतिः।
शब्देनार्थान् वाच्यान् दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यम्॥[1] इति।

अत्र बुद्धावित्यस्यान्तःकरण इत्यर्थः। अन्तःकरणं चैकमपि विकल्पकनिश्चय-गर्वस्मरणात्मकवृत्तिभेदाच्चतुर्विधम्। तत्र संकल्पविकल्पात्मकमन्तःकरणं मनः; निश्चयात्मकं बुद्धिः; गर्वात्मकमहंकारः; स्मरणात्मकं च चित्तमिति अन्तःकरणस्य विषयविभागः।

ततश्च स्फोटात्मकशब्दस्यान्तःकरणवृत्तित्वमिति विचार्य विज्ञैर्बुद्धिप्रदेश एव शब्दार्थपौर्वापर्यव्यवहारः क्रियेतेति महतामादेशो वैज्ञानिकः। तथा च शब्दस्यान्तर्धर्मत्वं सुतरां सिध्यति।

अहंकाराच्छब्दोत्पत्तिरिति सांख्यमतम्—

सांख्यैरपि, अन्तःकरणरूपादहंकाराच्छब्दजनिमुक्त्वा तत्र सूक्ष्मत्वम्' तत एव च पंचमहाभूतादीनां प्रभवः पर्यालोचि। तथाहि तेषां मते पुरुषः, प्रकृतिः, बुद्धिः, अहंकारः, पंच तन्मात्राण्येकादशेन्द्रियाणि, पंचमहाभूतानि चैतानि पंचविंशतितत्त्वानि परिगणितानि सन्ति। तत्र प्रथमं प्रधानात् प्रकृतेः बुद्धिरुत्पद्यते; तदनु बुद्धेश्चाहंकारः, स च पुनः शब्दतन्मात्रादीनुत्पादयतीत्याहङ्कारिकः शब्द इति निश्चितम्।

तथा चोक्तम् ईश्वरकृष्णैः—

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥[2]

अपिच—

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः।
तस्मादपि षोडशकात् पंचभ्यः पंचभूतानि॥[3] इति।

असत्येनापि वर्णेन तदवभासः—

नचेत्थं शब्दस्याहंकारिकत्वे संपन्नेऽपि प्रकृते कथं वर्णव्यतिरिक्तस्य सत्यस्य स्फोटस्य तवासत्येन ध्वनिनाऽवभासः; नहि असत्येन सत्यस्य ज्ञानमिति वाच्यम्; मिथ्याभूतेनापि तेन तस्यावबोधे बाधकाभावात्।

---

१. व्या० महा० १. ४. १०९। २. सांख्य० ३। ३. सांख्य० २२।

तथा चाह हरिः—

उपायाः शिक्ष्यमाणानां बालानामुपलालनाः।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते ॥[1] इति।

किंच यथा शुक्तौ रजतत्वस्य विवर्तनादिदं रजतमिति प्राथमिकी बुद्धिरुदेति, तदनु समालोचने तु नेदं रजतम् अपितु शुक्तिकेति मतिः। तथैव शब्दतत्त्वमपि निर्णीयते। यत इदमप्यर्थभावेनवियदाद्यात्मना विवर्तते।

प्रमाणं चात्रापि हरिश्लोका एव—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[2] इति।

तदित्थं स्फोटवादिनां मते शब्दादर्थावबोधे न समुदायानुपपत्तिरूपदोषसंभवः; स तु पुनरपि वर्णवाचकत्ववादिनां गले लगितः।

शब्दविचारचर्चायां महाभाष्यस्थो भगवान् पतंजलिश्च—

"कः शब्दः, को ध्वनिः, के च शब्दगुणा" इत्यादि प्रश्नानुद्भाव्य सुगमेन मनोहरेणोदाहरणेन बहुवारं स्फोटमसाधयत्। तत्रादावेव पस्पशाह्निके महाभाष्ये शब्दानुशासनत्वाद् 'गौरित्यत्र कः शब्दः' इति शब्दविषयिणीं जिज्ञासामकरोत्। नच श्रोत्रग्राह्या वर्णा एव भवन्त्यतो गौरित्यत्र कः शब्द इति प्रश्नेऽपि गकार, औकार, विसर्जनीयरूपा वर्णा एव शब्द इति का नवीना जिज्ञासा महर्षिपतंजलेरुरसीति वाच्यम; कः शब्द इत्यस्य गूढाभिप्रायत्वात्। अर्थात् तत्र प्रतिभासमानेषु द्रव्यक्रियाजात्यादिषु कः शब्दशब्दाभिधेयो गौरिति। तत्र वर्णास्तु न कथमपि तदभिधाने समर्थाः; तेषामनित्यत्वम् असमुदितत्वं च प्रतिपादितं पूर्वमस्माभिः।

किंच सास्नालांगूलाद्यर्थरूपं तदिङ्गितं चेष्टितम्, तच्छुक्लो नीलः तद्भिन्नेष्वभिन्नं सामान्यूभतमित्यादिकं द्रव्यक्रियागुणाकृतिस्वरूपमपि न शब्दशब्दवाच्यम्; श्रोत्रेन्द्रियातिरिक्तेन्द्रियग्राह्यत्वात्।

तस्मादाह—

येनोच्चारितेन सास्नालांगूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्द[3] इति अर्थाद् येन स्फोटेनोच्चारितेन प्रकाशितेन सास्नादिमत्या गोव्यक्तेर्ज्ञानं भवति स स्फोटः शब्दशब्दाभिधेय इति। अत्रस्थः स्फोटशब्दः श्रोतुरन्तर्गत एव गृह्यते, येनोच्चारितेनेत्यस्य तत्रैव सार्थक्यदर्शनात्। स च नाभिनवः किन्तु वक्तुरन्तःस्थ एव शब्दः श्रोतुर्हृदयमधिरोहति।

---

१. वाक्य० २. २४०। २. वाक्य० १. १।

३. व्या० महा० पस्पशाः।

इदमेव च भाषावयवभूतस्य शब्दस्योत्पत्तिबीजम्—यदुच्चारयिता स्वाभिप्रायं परानवबोधयितुं स्वहृदयस्थितं तं शब्दं तालवादिव्यापारैर्बहिः प्रकाशयति। प्रकाशितो भाषितो वा वर्णरूपोपपन्नः स शब्दः वीचितरंगवत् कर्णशष्कुल्यवच्छिन्नाकाशमार्गेण श्रोतुः अन्तर्देशमनुप्रविश्य पुनः स्फोटतां लभते। मध्ये कंचित् कालं ध्वनिरूपेण भ्राम्यन्नपि स भूयः श्रोतुर्मध्यमवाचमवाप्य-एवार्थबोधकतां याति। अतएव च 'अइउण्' सूत्रे भगवान् पतंजलिः श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्द [1]इति चतुर्भिर्विशेषणैस्तल्लक्षणं प्रोक्तवान्।

तदित्थं वक्तृश्रोत्रोरुभयोर्मध्यमवाचि स्फोटोऽनुक्रमं संघटत इत्यपि बोध्यम्।

---

१. व्या० महा० प्रत्याहा० सू० १।

चतुर्थोऽध्यायः

वाग्-विभागः

तत्र परवाग-विचारः

का तावद् मध्यमा वागिति यत्र स्फोट इति चेत् श्रूयताम्—चतुर्धा हि वागिष्यते परा, पश्यन्ती, मध्यमा, वैखरीभेदात्। नहि केवलं वैखरीं वाचमेवावलम्ब्य भाषाया मुख्यं तत्त्वं भाषाविद्भिर्ज्ञातुं शक्यत इति।

तत्र परवाचः स्वरूपनिर्धारणे सन्ति मतभेदाः। तान्त्रिकेषु तावद् 'चिच्छक्तिरेव परा वागि'ति अभिनवगुप्तपादाचार्या मन्वते। शैवागमद्वैतवादिनश्च 'बिन्दोरुच्छूनावस्थैव परा वागि'ति वदन्ति। केचन शान्ताम्बिकयोः शक्त्योः सामरस्यमेव परा वागिति जानन्ति। अपरे च पुनः प्रकाशरूपपीठस्योल्लासो हि नाम परा वागिति कल्पयन्ति।

एवमेव तान्त्रिकतन्त्रेषु बहुविसंवादाः परां वाचमवलम्ब्य प्रचलिता दरीदृश्यन्ते।

हरिस्तु परां शक्तिमेव परां वाचमङ्गीकरोति। शाब्दिकानां च तदेव शिरोधार्यम्।

अयमत्र संक्षेपः—

सर्वस्यास्य जगत आदिभूतं सर्वाधिष्ठाता सर्वदैकरसः परमशिवः। तदात्मभूता च संकोचप्रसरणशीला परा शक्तिः, परमशिवस्यैकरसत्वेऽपि सेयं परा शक्तिरेव तदाधारेण जगत्पटमिमं प्रसारयति संकोचयति च। तावुभौ परशिवपराशक्तिश्च प्रकाशविमर्शशब्दाभ्यां व्यवह्रियेते आगमशास्त्रे। पराशक्तिः चिच्छक्तिः, स्पन्दः, आरुण्य इत्यादयः शब्दाश्च एकार्था एव। अस्या एव च चिच्छक्तेः प्रथमोन्मेषो बिन्दुनादौ वर्तेते। तत्र बिन्दुरेव त्रिगुणमव्यक्तमिति मंजूषायां नागेशभट्टाः।

तदुक्तम्—

ततो बिन्दुरूपमव्यक्तं त्रिगुणं जायते। इदमेव शक्तितत्त्वम्। तस्य बिन्दोरचिदंशो बीजम्। चिदचिन्मिश्रोंशो नादः। चिदंशो बिन्दुरिति। अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते। अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयम्, वर्णादिविशेषरहितम्, ज्ञानप्रधानम्, सृष्ट्युपयोग्यवस्था-

विशेषरूपम्, चेतनमिश्रम्, नादमात्रमुत्पद्यते। एतद् जगदुपादानमेव 'रव' 'परा' आदिशब्दैर्व्यवह्रियते—

बिन्दोस्तस्माद् भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्।
स एव श्रुतिसंपन्नैः शब्दब्रह्मेति गीयते॥ इत्युक्तेः।

एतत् सर्वगतमपि प्राणिनां मूलाधारे संस्कृतपवनचलनेनाभिव्यज्यते। ज्ञातमर्थं विवक्षोः पुंस इच्छया जातेन प्रयत्नेन योग एव मूलाधारस्थपवन-संस्कारः, तदभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दम् 'परा वाग्' इत्युच्यते। तदुक्तं हरिणा—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[1] इति

तदित्थं बिन्दोरुत्पद्यमाना परा वागिति पूर्वोक्तेषु द्वितीयसिद्धान्तमङ्गी-करोति तत्र भवान् नागेशभट्टः।

महामहोपाध्यायाः श्रीगोपीनाथकविराजास्तु संस्कृतरत्नाकरस्य दशमाङ्के एतावन्तं विशेषं व्याचक्षते :—

बिन्दुभेदेन यो व्यक्तात्मा रवो जायते स महानादः, बिन्दुबीजयोः संघट्टादनन्तरमुत्पद्यमानो ध्वनिस्तु 'नादः' इति महानादनादयोर्विवेकः। नादेऽस्मिन् अकारादिक्षकारान्तवर्णानामव्यक्तोध्वनिर्लक्ष्यते। पूर्वोपवर्णितो महानाद एव शब्दब्रह्मापरनामा कुण्डलिन्यात्मना परिणतः सन् प्राणिनां देहमध्ये राजमानो वर्णरूपेणाविर्भवतीति।

अयमपि च विशेषस्तैर्व्याख्यातो यद् महानादस्योर्ध्वं शक्त्यात्मिका कोटिरेका ब्रह्मरन्ध्रस्य मध्यस्थे इच्छाकारणभूते व्यक्ते आदिनादे लीना तिष्ठति। अपरा कोटिस्तावदधः शक्तिरूपेण भ्रूमध्यं भित्त्वा मेरौ प्रसरति। मेरोरधः प्रदेशे मूलाधारचक्रे सैव कुण्डलिन्यात्मना परिणता भवति। मेरुरत्र शरीरव्यापी वंशाकारः। आदिनादश्च ज्योतीरूपः, चिच्छक्तेः प्रथमो विवर्तः। सा हि महाशक्तिर्लक्ष्यालक्ष्यस्वरूपेत्युच्यते। तत्र नाद एवायं तस्यालक्ष्यं रूपम्। तथा च ब्रह्मरन्ध्रेऽपि महानादस्योर्ध्वं शक्त्यात्मिकां कोटिमादिनादे प्रलीनामभ्युपगच्छद्भिस्तैरप्यन्तः चिच्छक्तिरूपतैव कुण्डलिन्यपरपर्यायायाः परस्या वाचः स्वीकृतेति। सामंजस्यं च मतयोरनयोः सम्यक् प्रदर्शितम्।

अभिनवगुप्तपादाचार्यादयस्तु :—

तत्सृष्ट्वा तदेवोपाविशदिति न्यायेन सृष्टेषु प्राणिष्वनु प्रविश्य मूलाधारे कुण्डलिनीरूपेण प्रतितिष्ठन्ती चिच्छक्तिरेव परा वागिति प्रतिजानते।

---

१. लघुमंजू० शक्त्याश्रयनिरूपणम्।

तदेतन्मातृकास्तुतावप्युक्तम्—

निर्गतगुणकृतिजातिविभेदे,
चित्सुखसान्द्रसुधाजलधे ।
परिहृतपरिमितिपरवागरूपिणि,
मूलविलासिनि मुक्तिमयि ।
स्वातन्त्र्येण समीहितभावे,
मणिपुरवासिनि पश्यन्ति ॥[1] इति ।

चिच्छक्तेरुत्पद्यमानो बिन्दुः 'पश्यन्ती वागि'ति उत्तरार्द्धेनात्र स्फुटीकृतम् । श्रीवेदव्यासोऽपि परां शक्तिमेव परां वाचमाह :—

स्वरूपज्योतिरेवान्तः परावागनपायिनी ।
तस्यां दृष्टस्वरूपायामधिकारो निवर्तते ॥[2] इति ।

मंजूषायां महाभारतवचनम् ।

वाक्यपदीयस्यादावेव हरिश्च तामेव परां शक्तिं शब्दतत्त्वमिति पदेन जग्राहेत्युक्तमेव । अस्याः परशक्तेः शब्दतत्त्वस्य वा निर्विकल्पकसमाधावेव साधकानामनुभवः नान्येषाम् । इयं हि मूलाधारमधिशेते । तद्धि चक्रं देहमध्ये वर्तते । देहमध्यन्नाम :—

पाय्वन्ताद् द्व्यंगुलादूर्ध्वं लिंगाच्च द्व्यंगुलादधः ।
मध्यमेकांगुलं यच्च देहमध्यं प्रचक्षते ॥[3] इति ।

संगीतरत्नाकरकाराः ।

अत्रैव च ब्रह्मशक्तिः; भुजगाकारा कुण्डलिनी वा सुषुम्णाख्यं विवरमध्यास्ते । तां च योगिन उद्बोध्य ब्रह्मरन्ध्राख्येन चक्रेण सार्धं संयोजयन्तीत्यन्यत्र विस्तरः ।

तदित्थं परशक्तिरेव परावागिति निश्चितम् । अस्तु वा यः कोऽपि मतभेदः, वाङ्मनसातीता केवलं योगिनां निर्विकल्पकसमाधिगम्या, शब्दब्रह्मपदाभिधेया, सर्वमूलभूता, परावागित्यत्र तु न कस्यापि सन्देह इति ।

पश्यन्तीवाक

परशक्तेः प्रादुर्भूतो बिन्दुरेव परनादादनतिरिक्तरूपप्रकाशात्मा पश्यन्तीवागित्युच्यते । इदमत्र विज्ञेयम्—

तदैक्षत बहुस्यां प्रजायेयेति श्रुतिस्वारस्येन यदा चिच्छक्तौ सिसृक्षो-

---

१. मातृका । २. लघुमंजू० शक्तिनिरूपणम् । ३. संगीत० १. २. ११९ ।

त्पद्यते, तदाऽसौ स्रष्टव्यपदार्थानालोचयतीति पश्यन्तीवागिति संज्ञां लभते। इयं हि वर्णक्रमाभ्यां शून्या, अविभक्तरूपा, नाभौ मणिपूरचक्रं संक्रमते। मनोगोचरीभूता च साधकानां सविकल्पकसमाधावेव।

तथा चोक्तम्—

'अविभागा तु पश्यन्ती सर्वतसंहृतक्रमेति'[1] मंजूषायां भारतवचनं नागेशभट्टेन।

वेद्यार्थरहस्यश्लोकाश्च मातृकास्तुतिव्याख्यायामुपलभ्यन्ते :—

तस्यां हि निर्विकारायामनादिप्रायदृष्टतः।
स्वान्तः संहृतविश्वस्य सिसृक्षोत्पद्यते ततः॥
ईक्षते सृज्यवस्तूनि नाभिचक्रमुपागता।
तदेवेक्षणमाहृत्य सा पश्यन्तीति गीयते॥ इति।

इत्थं हि व्याख्याता पश्यन्ती वागिति।

मध्यमा वाक्

तदनु च बिन्दोरुत्पद्यमानो नाद एव मध्यमा वागिति ज्ञायते। इयं खलु ज्ञानमयी, स्थूलशब्दोपादानभूता, क्रमविशिष्टा, स्फोटपदाख्या चेति बुधैरनुभूयते, अत्र हि शब्दार्थौ विभागं गतौ। अत एव शब्देनार्थबोध इति कार्यकारणभावः फलितः। इदं च स्मरणीयं यद् यावद् बिन्दुः बिन्दुरूपेण, अर्थादप्रसरणरूपेण स्थीयते, तावत् परनादपदेन पश्यन्तीवाग्, जाते च तत्र प्रसारे विकासे वा नाद इति नाम्ना मध्यमावाङ्निर्धार्यत इति नादपरनादयोर्विभागः।

एतस्या वाचो मध्यमात्वन्तु व्यक्ताव्यक्तरूपयोरुभयोर्वाचोरन्तरालत्वादेवेति बोध्यम्। वाचा चानया मनीषिभिर्मौनिभिः पद्यानि निर्मीयन्ते; ग्रन्था लिख्यन्ते, प्रेमसंदेशपत्राणि च प्रेष्यन्ते, उचितमनुचितं वा कार्यं निश्चीयते। जपादिकं चिन्तनं च समीचीनं संपाद्यते। किमधिकं चिन्तनेन साकं समस्ति शब्दस्य स्वाभाविकः सम्बन्धः। तत्रमध्यमवाग्रूपः, चिन्तनात्मकश्च शब्दो व्यावहारिक एव स्फोट इति वक्ष्यते। इयं मध्यमावागपि, आन्तरेण कोष्ठेन वायुनाभिव्यज्यत इत्युक्तं मंजूषायाम्।

तथा च प्रयोक्तः मध्यमवागेवान्तरेण वायुना ध्वनिरूपेण विवर्तमाना सती श्रवणपथमासाद्य श्रोतुः हृदयमनुप्रविशति; ततश्च स्फुटतीत्यर्थावबोधश्चोभयत्र स्फोटात्मकशब्दादेवेति रहस्यमिदमत्र स्थाप्यते।

---

१. लघुमंजू० शक्तिनिरूपणम्।

यद्यपि सर्वे शब्दाः सर्वे चार्थाः बिन्दुरूपायाः पश्यन्त्या वाच एव उत्पद्यन्त इत्युक्तं प्राक्, तथा सर्वे शब्दाः सर्वार्थबोधका इत्येव प्रसज्येत, सर्वेषामेकोपादानकत्वेन परस्परसम्बन्धस्याव्याहतत्वात्। तथापि व्यवहार-सांकर्यनिरसनाय पृथक् पृथक् शब्दानां पृथक् पृथगर्थैः सह संबन्धो व्यवहारनिर्वाहकैः शिष्टैः परिक्लृप्त इति नियतैः शब्दैर्नियतार्थबोध एव भवति।

यद् वा येनार्थेन सह यः शब्दः प्रादुर्भूतः, तस्य तेनैव सम्बन्ध इति भावनया शब्दार्थसम्बन्धमप्यनादिमातिष्ठन्ते मीमांसकादयः।

तदुक्तं जैमिनिना—

"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः"[१] इति तत्परिचयस्तु सर्वेषां व्यवहारादिनैव भवतीति शक्तिग्रहोऽपेक्ष्यत इति।

तदुलक्तम् उभयगतिरिह भवतीति परिभाषायां परिभाषेन्दुशेखरे—

"सर्वे सर्वार्थवाचका इत्यभ्युपगमोपि योगिदृष्ट्या नत्वस्मद्दृष्ट्या, विशिष्य सर्वशब्दार्थज्ञानस्याशक्यत्वादिति"[२] इत्थं च मध्यमा वागेव व्यवहारविषयेति सिद्धम्।

तदुक्तं मातृकास्तुतावपि—

"तदनुज्ञानमयात्मविभक्तान्,
मध्यमभावान् कलयन्ती।
मध्यमरूपानाहतवासिनि,
मिश्रितरूपे बुद्धिमयि"[३] ॥ इति।

इदं चात्रानुसन्धेयम्—

यन्मध्यमवाग्रूपः स्फोटः खलु व्यावहारिकः, नतु तात्त्विकः, स तु चिच्छक्तिः, परावाक्, शब्दतत्त्वापरपर्यायरूपः। तत एव जगतः प्रक्रिया। अत्र च हरेरादिमः श्लोकः पौनःपुन्येन स्मर्तव्यः—

"अनादि निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः" ॥ इति।

तदेवमुक्तं कौण्डभट्टैरपि—

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरंजनम्।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः ॥ इति।

---

१. मीमा० द० १. १. ५। २. परि० शे० १०। ३. मातृका० ३।

अयमर्थः "नामरूपे व्याकरवाणि" इति श्रुतिसिद्धा द्वयी सृष्टिः। तत्र रूपस्येव नाम्नोपि तदेव तत्त्वम्। प्रक्रियांशस्तु अविद्याविजृम्भणमात्रम्। उक्तं च वाक्यपदीये—

"शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते।
समारम्भस्तु भावानामनादि ब्रह्म शाश्वतम्॥" इति।

ब्रह्मेवेत्यनेन "अत्रायं पुरुषः स्वयं ज्योतिः"। "तमेव भान्तमनुभाति सर्वम्" "तस्य भासा सर्वमिदं विभाति" इति श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोऽस्मादिति स्फोट इति यौगिकस्फोटशब्दाभिधेयत्वं सूचयतीति"[1] वैयाकरणभूषणसारे।

तस्माद् शब्दतत्त्वमेव नित्यस्फोटतत्त्वमिति विस्पष्टम्। एतेन व्याख्यानेनैव च मध्यमवाचि स्फोटशब्दो व्यावहारिकः सिद्ध इति।

वैखरी वाक

तदनु वैखरी वाक प्रवर्तते, एषा हि वैखरी वाक् कण्ठतात्त्वाद्यभिघातजन्या, वर्णात्मिका, परश्रवणगोचरा चेति प्रत्युच्चारणमनुभूयते। इयं च कण्ठस्थितं विशुद्धाख्यं चक्रमधितिष्ठति। एतस्याः प्रादुर्भावप्रकारस्तु शिक्षासु पुराण-प्रातिशाख्यादिग्रन्थेषु च बहूपलभ्यते। तत्र मध्यमवाक्स्थितनाद एव पवन-संस्कारेणोर्ध्वमाक्रम्य मूर्द्धानमाहत्य परावृत्य च मुखमभिनिविशन् कण्ठता-त्वाद्यभिघातैर्बहिर्निर्गच्छन् च वैखरीरूपतां लभते।

तदुक्तं पाणिनीयशिक्षायाम्—

आत्मा बुद्ध्या समेत्यर्थान् मनो युंक्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्॥[2]
सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः।
वर्णान् जनयते[3] इत्यादि।

अयं, आत्मा बुद्ध्या समेत्यार्थानिति पश्यंत्या मध्यमायाश्च व्यापारः। अग्रे तु वैखर्या उत्पत्तिप्रकारः। आत्मना प्रेरितं मनः कायाग्निमाहत्य तद् द्वारा वायुं प्रेरयन् तदभिघातेन वर्णान् जनयतीति। सोऽयं संयोगजः शब्दः वैखरीवाग्रूप इति।

किंचैतदर्थप्रतिपादकं महाभारतवचनं लघुमंजूषायां नागेशभट्टैर्निहितम्—

प्राणापानान्तरे देवी वाग् वै नित्यं स्म तिष्ठति।
स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा।

---

१. वै० भू० का० ७४। २. पा० शि० ६। ३. पा० शि० ९।

वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी ॥[1] इति ।

अस्यायम्भावः—

वाग्रूपा देवी सर्वेषां प्राणिनां प्राणापानवाय्वोर्मध्ये अर्थाद् हृत्प्रदेशे तिष्ठति मध्यमारूपेणेति शेषः, तदेतद् व्याख्यातं प्राक् प्रयोक्तृप्राणव्यापाराभिव्यक्ता च सा कण्ठादिषु ककारादिवर्णरूपेण विवर्तमाना सती परश्रवणयोग्येति वाग् वैखरीति । अस्तु,

भागवते च भगवान् स्वयं श्लोकद्वयेन वाग्ममाभिव्यक्तिरिति स्पष्टं जगाद—

स एष जीवो विवरप्रसूतिः
प्राणेन घोषेण गुहां प्रविष्टः ।
मनोमयं सूक्ष्ममुपेत्य रूपम्
मात्रास्वरो वर्ण इति स्थविष्ठः ।
यथाऽनलः खेऽनिलबन्धुरूष्मा
बलेन दारुण्यधिमथ्यमानः ।
अणुः प्रजातो हविषा समिध्यते
तथैव मे व्यक्तिरियं हि वाणी ॥[2] इति ।

तत्रेमौ श्लोकौ व्याख्यातौ—

स एषोऽपरोक्षः जीवयतीति जीवः परमेश्वरः, अपरोक्षत्वे हेतुः, विवरेष्वाधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्य सः, तामेवाभिव्यक्तिमाह = घोषेण पराख्येन नादवता प्राणेन सह गुहामाधारचक्रं प्रविष्टः सन् मनोमयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरकचक्रं विशुद्धिचक्रं चोपेत्य प्राप्य वक्त्रे मात्रा = ह्रस्वादिः, स्वरः = उदात्तादिः; वर्णः = ककारादिरित्येवं वैखर्याख्यः स्थविष्ठोऽतिस्थूलो नानावेदशास्त्रात्मको भवति ।

किंच यथाऽग्निः खेऊष्मा = अव्यक्तोष्मरूपः दारुण्यधिकं मथ्यमानोऽनिलसहायः सन्नणुः सूक्ष्मविस्फुलिंगादिरूपो भवति, पुनः प्रकृष्टो जातो हविषा संवर्धते तथैवेयं वाणी ममाभिव्यक्तिरिति श्रीधराचार्यव्याख्या ।

अत्र जीवयतीति जीवः परमेश्वर इत्यर्थस्त्वद्वैतमतमवलम्ब्य व्याख्यातः । तत्र "एकमेवाद्वितीयं ब्रह्म" तत एव जगतः प्रक्रिया नान्यतः, स एव विशुद्धसत्त्वं मलिनसत्त्वं चोपाधिमाश्रित्य ईश्वररूपेण जीवरूपेण च व्यवहारभाग्भवति । तस्मान्न जीवेश्वरयोर्वास्तविकः पारस्परिको भेद इति तदीयः सिद्धान्तः ।

---

१. लघुमंजू० शक्तिनिरूपणम् । २. श्रीभा० पु० ११. १२. १७. १८ ।

उपनिषदादौ च तथैवोक्तम्—

'एकस्मादात्मन आकाशः संभूतः; आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी, पृथिव्या ओषधयः, ओषधिभ्योऽन्नम्, अन्नात्पुरुष[1] इति'।

किंच यथा तान्त्रिकाणाम् मते चिच्छक्तिरूपा परावागेव विवर्तमाना जगद्रूपतामापद्यत इत्युक्तं प्राक,

तथैवात्रापि परमेश्वर एवाधारचक्रमनुप्रविष्टः मनोमयं सूक्ष्मरूपं ततश्च स्थूलतामधिगच्छतीत्युक्तम्। अतएव वाणी ममाभिव्यक्तिरिति सूक्तं भवति। ईश्वर एव वाग्रूपेणाभिव्यक्त इति तदभिप्रायः।

अपि चातिसंघर्षाच्चन्दनादपि वह्नेः प्रादुर्भाव इति प्रसिद्धिः। ततश्च यथा अरणिद्वयोऽव्यक्तवह्निरन्योन्यसंघट्टनाद् व्यक्तीभवन् वायुसंयोगाच्च वृद्धिमवाप्य हुतभुगिति विशेषाख्यमुपैति, तथैवात्मना प्रेरितं मनः पौनःपुन्येन कायाग्निमाहन्ति ततश्च तत्रैव सूक्ष्मरूपेण वाग् व्यक्तीभवतीति; तदनु च सा वायोः पूर्णसंयोगाद् मुखमागत्य वैखरीवागिति समाख्यायते।

अत्रास्तु वाग्रूपेण शब्दरूपेण वैखराभिव्यक्तिः तत्र न विचार्यते, निश्चीयते चैतावतेदमेव यच्छब्दाभिव्यक्तावन्तःकरणावच्छिन्नाकाशे वह्निवायवोरावट्टनमेव मुख्यं कारणम्। तत एव क्रमशः सूक्ष्मस्थूलादिशब्दानां प्रभवः। एवं बहिरपि शब्दानां प्रसारणमाकर्षणं च वह्न्याद्यपेक्षमेव। दृश्यते हि साम्प्रतं शब्दवर्धकयन्त्रे वह्निसापेक्षत्वम्, एवं च यानि खलु नानारूपाणि तथाभूतानि शब्दयन्त्राणि समुपलभ्यन्ते तानि सर्वाणि वह्निवायव्याद्यधिष्ठितान्येव। ततएव शब्दश्रुतिः। वह्नेर्वायो र्वाऽभावे यन्त्रे मौनता; तदाने च मुखरतेत्यन्वयव्यतिरेकाभ्यामनुमीयते तत्र तत्सत्तेति।

इत्थं चाधारचक्रेष्वरणिस्थाग्निवदव्यक्तरूपेण स्थिता वाग् अनलानिलयोः संघर्षाद् व्यक्ततमां वैखरीवाचं सृजतीति सिद्धम्।

प्रातिशाख्येषु विकीर्णोऽयं विषयो बहुधोपलभ्यते। तत्र तावद् ऋक्तन्त्रव्याकरणकर्तारः 'अथ वाचो वृत्तिं व्याख्यास्यामः' इति प्रतिज्ञाय विशदमूचुः, तद्यथा—

'वायुं प्रकृतिमाचार्याः, वायुमूर्ध्वं श्वासीभवति, श्वासो नाद इति शाकटायनः। वायुरयमस्मिन् काये मूर्च्छत्यटतीत्येषोऽर्थः। सखलु ख विशेषं प्रतिपन्नः, कण्ठं प्रतिपन्नः श्वसितिर्भवति। स श्वसितिः शिरः प्रतिपन्नः, आकाशमद्वारकं नदतिर्भवति। तस्येदानीं नदतेर्जिह्वाग्रेणेयमाणस्य व्यक्तयः

---

१. तैत्ति० उप० व० २. अनु० १.

प्रादुर्भवन्ति, वर्णानामोष्ठ्याः, कण्ठ्यास्तालव्या मूर्धन्या दन्त्या नासिक्या जिह्वामूलीया इति। तद्यथा त्रपुकारः त्रपु विलाप्य बिम्बे निषिञ्चेद्, यं यं बिम्बदेशं तत्त्रपु निषिच्यते, ततस्ततो द्रव्याणां व्यक्तिर्भवति, कांचिमणिके रुचकः स्वस्तिक इत्येवं यंयमयं स्थाताविशेषं जिह्वाग्रेण स्पृशति ततस्ततो वर्णानां व्यक्तिर्भवति ओष्ठ्यानां कण्ठ्यानां तालव्यानां मूर्द्धन्यानां दन्त्यानां नासिक्यानां जिह्वामूलीयानाम्' इति, ऋक्तन्त्रप्रथमप्रपाठके।

एतेनेदमायातं यदेकस्मादेव नादात्सर्वे वर्णाः प्रादुर्भवन्ति। यतः प्रतिशरीरं वायुर्मूर्च्छति, विवक्षायां च स तूर्णमूर्ध्वमधिगच्छन् कण्ठे यद्यपि श्वासो भवति, तथाप्यतिवेगवतामाघातं विना अवरोधो नेति प्रत्यक्षम्। तथा च वायोर्मूर्ध्नाऽवरोधो भवति। तदनु नादरूपेण विवर्तः स परावृत्य ताल्वादिसंयोगेन नानावर्णरूपतां भजते। दृश्यते हि यदा स्वर्णकारः स्वाभिलषितं नानारूपमाभूषणं स्वस्तिकादिकं वा निर्मातुमिच्छति, तदा केवलं त्रपु सुवर्णं वा सन्ताप्य विभिन्नस्थातासु "सांचा" इति हिन्दीभाषायाम्, निःक्षिपति। ततोऽनेकरूपानलंकारान् संगृह्णाति।

एवमेव यः कश्चिद् वा प्राणी यदा वक्तुमिच्छति तदा तदात्मनाऽपेरितं मनः कायाग्निमाहत्य तद् द्वारा वायुमुत्थापयति, उत्थितश्च सोऽतिर्यक् शीघ्रमद्वारकं मूर्द्धानं व्रजति, तत्र च स्फालनान्नादरूपता प्रयुज्यते. तदनु स एव नादः कण्ठताल्वादिरूपस्थाताप्रदेशमधिगत्य अ-क-च-ट-त-पादिवर्णरूपेण विवर्तत इति।

तथा च श्रावयति श्रुतिरप्येकस्मात्सर्वेषां वर्णानां जनिम्—

"अकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति"[१] इति।

तदित्थं नाद एव साक्षाद् वर्णोपादानमिति सिद्धम्।

शुक्लयजुःप्रातिशाख्येऽपि शब्दमूलोपादानविवेचनपुरस्सरं शब्दाभिव्यक्तिप्रक्रियां प्रकटीचकार भगवान् कात्यायनः—

तत्र तावत् "वायुः खान्" इति सूत्रम्, तद्व्याख्या च, वायुः कारणभूतः शब्दस्य, स च खादाकाशादुत्पद्यत इति। तदनु 'शब्दस्तन्' इति द्वितीयं सूत्रम्, शब्दस्तदात्मको वाग्यात्मक इति तदर्थः यदि वाग्यात्मकः शब्दः, वायोः सर्वगतत्वात् सदाकालं सर्वत्रोपलब्धिः प्राप्नोतीत्याशंक्याह तृतीयं सूत्रम् 'संकरोपहित' इति। अर्थात् सम्यक्करणैरुपहितो हृदि वायुर्वेणु-

१. लघुमंजू० स्फोटनिरूपणम्।

शंखादिभिः शब्दीभवति, तदनु च चतुर्थं सूत्रं प्रवर्तते 'ससंघातादीन् वाग्' इति यो वायुः सम्यक्करणैरुपहितो वेणुशंखादिभिः शब्दीभवति, स एव संघातादीन् प्राप्य वाग् भवति, संघातः पुरुषप्रयत्नः स आदौ येषां स्थानादीनां ते संघातादयस्तान् प्राप्य वाग भवति वर्णो भवतीति तद्भाष्यम् ।[१]

अत्रोच्यते—

प्रथमसूत्रेणाकाशाद् वायोः प्रभवो व्याख्यातः । तत्राकाशश्च कुत इति जिज्ञासायाम् उपनिषद् एव शरणम् । तथा हि "एतस्मादात्मन आकाशः संभूतः, आकाशाद् वायुः, वायोरग्निरित्यादि पूर्वोक्तमेव ।

तथा चैतावतापि पाणिनीयशिक्षोक्तदिगेव "आत्मा बुद्ध्या समेत्यार्थानिति" परिपुष्यते; यत आत्मना प्रेरितं मन एव जठराग्निमाहत्य तद्द्वारा वायुं प्रेरयतीत्युक्तम् , तथा च तत्रात्मनः प्राधान्यम् , एवमिहापि शब्दोत्पादनजनकजनकतयाऽऽत्मनो मुख्यत्वमिति । इत्थमात्मैव च प्रथमशब्दाऽभिव्यक्तौ प्रयतत इति विस्पष्टम् ।

एवमत्र वाग्वात्मकः शब्दः, अर्थाद् वायोर्विवर्तः शब्द इति यदुच्यते, तत्र वायोरणूनां ज्ञानस्य वा विवर्त इति विचारणीयोऽयं विषयः । अत्रानुसंदधतिस्म बहवः, तदुपरिष्टाद् वक्ष्यते । अस्तु;

प्रातिशाख्येनामुना वायोर्विवर्तः शब्द इत्युक्तं भवति । हृदिस्थः प्राणवायुश्च मुखनासिकाश्लिष्टवेणु-शंखादिभिरव्यक्तशब्दत्वेनाभिव्यज्यते, अतएव वायुवत् सर्वत्र सर्वदा नोपलभ्यते, यदाभिव्यज्यते तदा तूपलभ्यत एव ।

अयमत्र विशेषः—

यदा प्राणवायुर्विवृतसंवृतादिकरणैर्वेणु-शंखादिद्वारा बहिर्निर्गच्छति तदा सामान्यतः शब्दो भवति । यदा च स पुरुषचेष्टया उरः, कण्ठः, शिर इति त्रीणि स्थानानि-विवृतसंवृते द्वे करणे च प्राप्नोति तदा वागिति. अर्थात् स्फुटवर्णरूपत्वेन भाषापदभाग भवतीत्यवधेयम् ।

एतदेव ऋग्वेद-प्रातिशाख्ये शौनकेनापि स्पष्टीकृतम् ; तत्र कश्चिद् विशेषेणोपदर्शितः । तथाहि—

वायुः प्राणः कोष्ठ्यमनुप्रदानम् ,
कण्ठस्य ते विवृते संवृते वा ।
आपद्यते श्वासतां नादतां
वा वक्त्रीहायाम्[२] । इति सूत्रम् ॥

---

१. वा० प्रा० १. ६. ९ । २. ऋक्० प्रा० १३. १ ।

तत्र वाचि वर्तमानः प्राणः, आहोस्विदुदानमिति विप्रतिपत्तिराचार्याणाम्, सैव व्याख्यायां प्रथमं स्थापितोव्वटेन—

"य इमे शारीरा इह पंच वायवो नानाकर्माणः प्राणापानव्यानोदान-समानास्तेषां प्राणो हि नाभेरुपरिष्टाद् व्याप्यास्ये व्याचरति। नाभेर-धस्तात्पायुमेढ्रयोरपानः, प्रसारणाकुंचनोत्क्षेपणावक्षेपणगतिकर्माव्यानः। कर्मप्रवृत्तिषु बलमारोपयत्युदानः, सर्वक्रियाणामुपरमः समानः। एवं वाचि वर्तमानं प्राणमेक आचार्या मन्यन्ते।

अपरे उदानं मन्यन्ते—

उपरिष्टान्मुखादग्र ऊर्ध्वं यो वर्ततेऽनिलः।
ऊर्ध्वं कर्म क्रियाः सर्वाः प्राणिनां सम्प्रवर्तयन्॥
नाभ्युरोऽथ शिरोभागं गच्छन् करणसंयुतः।
कण्ठताल्वोष्ठदन्तानां सप्रयत्नः समीरितः॥
ह्रस्वदीर्घप्लुतान् वर्णान् स्निग्धान् रूक्षश्च नैकधा।
उदात्तानुदात्तांश्च स्वरितान् कल्पितानपि॥
समान् विकीर्णांश्च तथा संवृतान् विवृतानपि।
देहिनामवबोधार्थं तेनोदानः स उच्यते॥ इति तद्भाष्यम्।

तत्र पंचसु वायुषु कण्ठस्थितो य उदानवायुस्तत एव प्रयत्नद्वारा कण्ठ्य-तालव्यादीनां वर्णानां जनिः, वर्णेषु च यावन्तो ह्रस्वदीर्घप्लुतोदात्तानुदा-त्तादयो गुणा अनुभूयन्ते तेऽपि उदानवायोः क्रियाकलापादेव। स एव च कर्मप्रवृत्तिषु बलमारोपयति। नाभिं हृदयं मूर्धानं चानुक्रमं क्रामति, श्वासो नाद इति संज्ञां च लभते।

तस्मादुदानमेव वाचि वर्तमानमिति तदाशयः।

तदेके न क्षमन्ते; तन्मते—

वाचि वर्तमानः प्राणो वायुः समस्ति, तस्य पंचानां वायूनां व्यवहार-साधारण्यात्। उक्तं हि सूत्रभाष्ये "प्राणो हि नाभेरुपरिष्टाद् व्याप्यास्ये व्याचरतीति"।

किंच तस्यैव चेमेऽपानव्यानोदानसमाना औपाधिकभेदाः, तत्र प्रधानता च प्राणवायोः, तत एव शिक्षोक्तदिशा वर्णानां प्रादुर्भावः। अत एव च सूत्रेऽस्मिन् वायुः प्राणः कोऽयमनुप्रदानमित्याद्युक्तं संगच्छते।

अपि च प्रथमद्वितीयाः श्वासानुप्रदाना अघोषाः एकेऽल्पप्राणाः अपरे महाप्राणाः, तृतीयचतुर्थौ नादानुप्रदानावोषवन्तः, एकेऽल्पप्राणा अपरे

महाप्राणा इत्युव्वटकृतभाष्यम्। एतदेव विस्तृतं "वर्गाणां प्रथमतृतीयपंचमा यणश्चाल्पप्राणाः"। "वर्गाणां द्वितीयचतुर्थाः शलश्च माहाप्राणा"[१] इति वरदराजाचार्यवचनं च संघटते" इतरथाऽल्पप्राणमहाप्राणयोः प्राणपदोपादानं व्यर्थमेव स्यादिति।

सूत्रार्थस्तु प्राणो वायुः कोष्ठ्यमनुप्रदानमित्युच्यते। कोष्ठ्यं नामेह उदरम्, अनुप्रदानं च श्वासनादोभयम्। तथा च यदा प्राणिनां किंचिद् वक्तुमिच्छा भवति तदा प्राणवायुः, कण्ठबिले विवृते विशाले च जाते श्वासत्वमापद्यते, संवृते संकुचिते च नादत्वमिति, प्रयत्नेनानेन श्वासनादोभयमनुप्रदानं सिध्यति।

मिश्रितं श्वासनादात्मकमप्येकं तृतीयमनुप्रदानमिहोच्यते। तथा च सूत्रम् "उभयं वान्तरोभौ[२]। इति।

अर्थात् कण्ठबिलं यदा नातिविवृतं नवातिसंवृतं जायते तदा समानकोटावेतस्य श्वासनादानुप्रदानस्यानुप्रवेशो भवेदिति सूत्रादेशः।

वैखरीवाक्प्रकृतयः।

कृतवर्णपरिग्रहा वैखरी वाक् प्राक् प्रोक्ता। तत्र प्रातिशाख्यकारमते वर्णानां तिस्रः प्रकृतयो भवन्ति। केचन हि तत्र श्वासप्रकृतयः, अपरे नादप्रकृतयः, इतरे श्वासनादोभयप्रकृतयो वर्णा जायन्ते। तथा च सूत्राणि :

श्वासोऽघोषाणाम्,
इतरेषान्तु नादः,
सोष्मोष्मणां घोषिणां श्वासनादौ[३]। इति।

अत्र श्वासानुप्रदाना अघोषा, ह चतुर्था उभयानुप्रदानाः, अवशिष्टाः सर्वे नादानुप्रदाना इति तट्टीकायाम्। अत्रोक्तोऽयं नादो वायुजन्यो वैखर्या वाच उत्पादकः, पूर्वोक्तात् तन्त्रशास्त्रप्रतिपादितान नादाद् विलक्षणो बह्वचरज इति विज्ञेयम्।

प्रातिशाख्यं चेदं परिष्कृतं भट्टोजिदीक्षितेनः—

खर्या यमाः खयः क पौ विसर्गः शर एव च।
एते श्वासानुप्रदाना अघोषाश्च विवृण्वते॥

---

१. ल० कौ० संज्ञाप्रकरणम्। २. ऋक्० प्रा० १३. २.
३. ऋक्० प्रा० १३. ४. ६.

कण्ठमन्ये तु घोषाः स्युः संवृता नादभागिनः ।
अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः[1] ।। इत्यादिपदैरिति ।

अर्थाद् वर्गेषु प्रथमद्वितीयवर्णा अपि च तेषामेव यमाः, जिह्वामूलीयोपध्मानीयौ विसर्गः शषसाश्चैते श्वासानुप्रदाना भवन्ति, अवशिष्टाश्च नादानुप्रदानाः। तत्र विवारः श्वासोऽघोषश्चेति विभज्य प्रातिशाख्येनोक्तः। तथापि व्यापारस्य सूक्ष्मभेदविवक्षया क्रमोऽत्र परिलक्ष्यत एव, तथाहि वर्गाणां प्रथमद्वितीयवर्णाः शषसाश्च यदा प्रादुर्भवन्ति तदा पूर्वं कण्ठबिलं विवृतं भवति तदनु च श्वासो जायते, घोषश्च तत्र नानुभूयते। एवं वर्गाणां तृतीयचतुर्थपंचमवर्णास्ततोऽवशिष्टा ये खलु स्वरादयः ते यदाभिव्यज्यन्ते तदा कण्ठच्छिद्रं संवृतं भवति, संवृतादेव च घोषः, ततश्च नादः स्वाभाविक इति मतम् ।

अस्ति चात्र सूक्ष्मसन्वेषणं यच्छौनकः मिश्रितमेकं श्वासनादात्मकम् अनुप्रदानमतिरिक्तं मन्यते। तत्र घोषिणां वर्गचतुर्था झभघढधाः, ऊष्मणां च घोषो हकार इत्युभयम् उभयात्मकमनुप्रदानं भवति। एतेषां वर्णानां प्रभवे कण्ठे नासिकायां च न तादृशः संकोचः विकासो वानुभूयतेऽतोऽतिरिच्यत इति भावः। अत एव च "श्वासादीनि त्रीण्यनुप्रदानानि वर्णकालस्थानानि भवन्ति नाधिकानि न न्यूनस्थानानीति भाष्यं संगच्छत इति।"

प्रातिशाख्यव्याकरणयोर्मतभेदः

एवमेतास्तिस्रः प्रकृतयः श्वासनादोभयात्मिकाः प्रातिशाख्ये उक्ताः। पाणिनीये व्याकरणे चैते श्वासनादाद्याः बाह्यप्रयत्नशब्देन परिभाष्यन्ते। बाह्यत्वं चैषां कण्ठतात्वादिस्थानेभ्यो बहिः कार्यकरणात्।

शब्देन्दुशेखरे नागेशभट्टास्तु श्वासनादादीनां बाह्यप्रयत्नानां वर्णोत्पत्तेरनन्तरभावित्वमाहुः।

तदुक्तम् :—

एवं च शब्दप्रयोगेच्छयोत्पन्नयत्नाभिहताग्निना नाभिप्रदेशात् प्रेरितो वायुर्वेगान्मूर्धपर्यन्तं गत्वा प्रतिनिवृत्तो वक्त्रंप्राप्य उक्तयत्नसहकारेण तत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकं तत्तत्स्थानान्याहत्य वर्णानभिव्यनक्ति। ततो यत्नविशेषेण गलविवरविकासादीन् करोति, तत्र ये तत्तत्स्थानाभिघातका यत्नाः ते आस्यान्तर्गततत्तत्कार्यकारित्वादाभ्यन्तरा इत्युच्यन्ते। गलविवरविकासादिकराश्चास्यबहिर्भूतदेशे कार्यकरत्वाद् बाह्या इति। मात्रा-

१. सि० कौ० संज्ञाप्रकरणम् ।

कालिकत्वादिरूपह्रस्वत्वादिकन्तु वाय्वल्पत्वमहत्वकृतमिति नाभिप्रदेशात्प्रेरक-यत्न एव कश्चिद् विलक्षणोऽल्पं वायुं प्रेरयति कश्चिदधिकमिति तस्य वायु-प्रेरणारूपं कार्यमास्यबाह्यदेशमिति तदपि बाह्यमेव ।[१] इति

तदेतत् प्रातिशाख्यविरुद्धमिव प्रतीयते । प्रातिशाख्ये हि श्वासनादादीनां वर्णप्रकृतित्वमाख्यातम्, इह तु वर्णोत्पत्तेः पश्चाद्भावित्वमिति । अनुभवसिद्धं च प्रातिशाख्योक्तमेवेति विभावयन्तु सुधियः ।

कैयटाद्युक्तमुदात्तादिस्वरूपं शिक्षाद्यसंमतम्

एवम् उदात्तानुदात्तस्वरितविषयेऽपि शङ्कितं नागेशभट्टैः, यदेषां स्थानेष्वेव कार्यकरत्वात् कुतो बाह्यत्वमिति तस्य च सवर्णसंज्ञानुपयुक्तत्वात् पारिभाषिकमेव बाह्यत्वमित्युत्तरमभिहितम् ।

किंच सर्वाणि वर्णस्थानानि त्र्यवयवकानि, तत्रैक उच्चैर्भागः, अपरो नीचैर्भागः, तृतीयश्च मध्यभाग इति । उच्चैर्भागजन्यः उदात्तः, नीचैर्भाग-जन्योऽनुदात्तः, मध्यभागजन्यश्च स्वरित इति कैयटादिभिरभिहितम् । तदेव च कौमुद्यादिष्वपि 'तालवादिषु स्थानेषूर्ध्वभागे निष्पन्नोऽनुदात्तसंज्ञः स्यात्' इत्युपवर्णितम् ।

वस्तुतस्तु वर्णस्थानं द्विविधम्, सवनस्थानं मुखस्थानं च, तत्राद्यम् पुनस्त्रिविधम्, उरःकण्ठशिरोरूपम् ।

तथा नारदीयशिक्षायामाह :—

उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये ।
सवनान्याहुरेतानि सन्ति चाप्यधरोत्तरे ॥ इति ।

तथा चात्रोदात्तानुदात्तस्वरितानां सम्बन्धः सवनस्थानैरेव नतु मुख-स्थानैः, पाणिन्यादिमुनित्रयस्य तथैवाभिमतत्वात् ।

तत्र पाणिनिर्व्याचष्टे :—

अनुदात्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः ।
स्वरितो वर्णमूलीयः सर्वास्ये प्रचयः स्मृतः ॥[२] इति ।

अपरं च :—

मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
प्रातः सवनयोगं तं छन्दो गायत्रमाश्रितम् ॥
कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्त्तीयसवनं शीर्षण्यं जागतानुगम् ॥[३] इति ।

---

१. ल० शं० शे० संज्ञाप्रकरणम् । २. पा० शि० ४८ । ३. पा० शि० ७, ८

किंच कदा केन स्वरेण ग्रन्थाभ्यासं कुर्यादिति जिज्ञासायाम्—

प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन ।
मध्यंदिने कण्ठगतेन चैव चक्राह्वसंकूजितसन्निभेन ॥
तारन्तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥[1]

इत्यादिभिः श्लोकैः स्पष्टमुवाच पाणिनिरिति ।

तात्पर्यन्तु :—

सिंहचक्रवाकमयूरा यथाक्रममुरसा कण्ठेन शिरसैव च वक्तुं प्रभवाः अर्थात् तत्तत्स्थानेषु विशेषबलमारोपयन्ति ते, तथैवोदात्ताद्युच्चारणे विनेयैर्भवितव्यमिति । अवगम्यते चास्यवाचि सिंहध्वनिः श्रूयतामित्युक्ते गाम्भीर्यम्, तच्चोरसैव भवितुमर्हति नान्यथेति शास्त्रेऽस्मिन्ननुदात्तत्वं तस्य जातम् ।

एवमुदात्तत्वादिकमपि सवनस्थानीयमेवेति विज्ञेयम् ।

कात्यायनेनापि वाजसनेयिप्रातिशाख्ये :—

'सवनक्रमेणोरःकण्ठभ्रूमध्यानि'
'आयाममार्दवाभिघाताः'
'उच्चनीचविशेषः'[2] ।

इति सूत्रैः पूर्वोक्तमेव व्यवस्थापितम् ।

किंच महाभाष्यकारः उच्चैरुदात्त इति सूत्रव्याख्यायामाह—सिद्धमेतत्, कथम्, समानप्रक्रमवचनात्, समाने प्रक्रम इति वक्तव्यम्, कः पुनः प्रक्रमः उरः कण्ठः, शिर [3]इति । अत्रोपक्रमापरपर्यायः प्रक्रम शब्दो विहितः । तथा च वक्तुः शब्दोच्चारणकालं यावन्नाभेर्मूलाधाराद् वा समुत्थितो वायुः उरसि कण्ठे शिरसि वा स्वीयं केन्द्रं प्रकल्पयतीत्युक्तं प्राक् ।

तान्येतानि सवनस्थानानि प्रक्रमस्थानानि चोच्यन्ते । तत्र येन पुरुषेण यादृश उपक्रमः कृतः, तस्मिन्नुपक्रमे यः उच्चैरुच्चार्यते स उदात्तः । यश्च नीचैः सोऽनुदात्तः, उभयोः समाहारस्तु स्वरित इति । दृश्यते हि वाग्धारां प्रवाहयन्नपि पुरुषः कस्मिंश्चित् स्वाभिप्रायाविष्करणपटौ शब्दे कंचिद्वर्णं स्वाभिप्रायाविष्करणाय प्रभावोत्पादनाय वा उच्चैर्ब्रवीति स उदात्त

---

१. पा० शि० ३६, ३७ । २. वा० प्रा० १. ३०. ३२ ।
३. व्या० महा० १. २. २९ ।

इत्युच्यते। कंचिच्च, उपेक्षाबोधनाय नीचैर्ब्रवीतीति सोऽनुदात्त इत्युच्यते। यस्तु न विशेषेणोच्चै र्नापि नीचैः प्रयुज्यते स स्वरितो भवतीति प्रकृति-सिद्धम्। तस्यैवास्य प्राकृतस्य वाग्व्यवहारस्य शास्त्रेण नियमः कृत इत्युच्चैः प्रयोक्तव्यः इति नीचैरित्यादिः।

तदित्थम् उदात्तानुदात्तस्वरितानां सम्बन्धः, उरःकण्ठशिरोरूप सवन-स्थानैरेवेह विवक्षितः, नतु तात्वादिस्थानानां सभागत्वकल्पनं भवतीति सिद्धम्।

वाचः प्राणमयत्वे श्रुतिविरोधमुद्भाव्य तन्निराकरणम्

वेदतत्त्वार्थान्वेषकैः विद्यावाचस्पतिश्रीमधुसूदनशर्ममैथिलैश्च 'वर्ण-समीक्षा' नामके निबन्धे वाग्विज्ञानम् उपदर्शितम् :—

तत्र हि पूर्वोक्तं वाचः प्राणमयत्वं वेदोक्तरीत्या प्रतिपाद्य 'अन्नमयं हि सोम्य मनः, आपो मयः प्राणः, तेजोमयी वाक् इति छान्दोग्यश्रुते[1]र्विरोधः शंकितः।

अर्थात् वाक्प्राणयोर्भिन्नोपादानकत्वात् कथं वाचः प्राणप्रभवत्वमिति। तत्रोच्यते :—

प्राण एव सर्वजगन्मूलभूतः, स च सदिति, तत एव सतः तेजः, आपः, अन्नमिति तिस्रो भूतदेवताः प्रादुर्भवन्ति, तथा चोक्तं शतपथब्राह्मणस्य षष्ठकाण्डे :—

'असद्वा इदमग्र आसीन्' किं तदसदासीत्, ऋषयो वावतेऽग्रेऽसदासीत् प्राणा एव ऋषयः इति।

नच पूर्वं सतः प्राणात्सर्वेषां प्रभव इति प्रतिज्ञातम्, श्रुत्याऽनया च प्राणोऽसद् इत्युच्यत इति स्वोक्त्या विरोध इति वाच्यम्, इन्द्रियादिभिः गृह्यमाणं वस्तुजातमिह सत्पदेन व्यवह्रियते, नच प्राण इन्द्रियग्राह्य इति तस्यासत्पदेनावबोध इति निर्देशात्। इदमेव च स्पष्टीकर्तुं छान्दोग्यश्रुतिः प्रक्रमते—तद्धैक आहुः, असदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायेत। कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीदिति[2] अनया च अन्यत्रासत्पदेनोक्तप्राण एव सदित्युक्तं भवति।

तथा च सतः प्राणात् तेजोऽबन्नानां क्रमशः प्रादुर्भावः। स एव च प्राणः तेजोमयः सन् वाग्रूपेण, आपोमयः सन् प्राणरूपेण अन्नमयश्च सन् मनोरूपेणाख्यायते।

---

१. छान्दो० उप० ६. ५. ४। २. छान्दो० उप० ६. २. २।

तदित्थं कारणात्मा कार्यात्मा चेति द्विविधः प्राणः, तत्र कारणात्मनो विवर्तो वागिति ज्ञायते ।

यदि पुनः 'अग्निर्वाग्भूत्वा मुखं प्राविशत्'[1] 'इत्यैतरेयोपनिषदा विरोधो जागरूक इति चेद्' उच्यते–अग्निरपि द्विविधः–कारणात्मा कार्यात्मा चेति । तत्र 'प्रजाकामो वै प्रजापतिस्तपस्तप्त्वा मिथुनमुत्पादयते, रयिं च प्राणं च । एतौ मे बहुधा प्रजाः करिष्यतः'[2] 'इति प्रश्नश्रुत्या प्राण एवाग्निः, रयिः सोमः, इत्यवगम्यते; ततश्च जगतो निदानमेताविति वाचः प्राणोपादानत्वं न विरुद्धम ।

किंच इन्द्रजन्यत्वप्रतिपादिकया 'वागैन्द्री' इति श्रुत्यापि न तद् विरुध्यते 'स योऽयं मध्ये प्राणः, एष एवेन्द्रः' इति वाजसनेयश्रुत्या प्रधानस्य मध्यम-प्राणस्यैवेन्द्रपदवाच्यत्वमिति स्वीकारात् ।

एवमन्यत्रापि; एतद्विषये श्रुतिषु विरोधाभास एवोपलभ्यते न तु विरोध इत्यवधेयम् । अलमिह पल्लवितेन, तस्याः प्राणोपादानत्वमाचक्षाणा श्रुतिः स्पष्टं श्रावयति :—

'एकः सुपर्णः ससमुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे । तं पाकेन मनसा पश्य मन्तितः तं माता रेढि स उ रेढि मातरम्'[3] इति ।

अत्र सुपर्णपदेन प्राणः, वाक् समुद्रः इत्यनुपदं स्फुटीकरिष्यते । तथा च 'तं माता रैढि स उ रेढि मातरम्' इत्यनेन प्राणो वाचं लेढि ; वाक् प्राणं लेढि, इत्युक्त्याऽनयोः परस्परपरिणामः स्फुटीकृतः ।

स्पष्टं च श्रुत्यन्तरेणायमर्थः श्रावितः—

यावद्वै पुरुषो भाषते, न तावत् प्राणितुं शक्नोति । प्राणं तदा वाचि जुहोति । यावद् वै पुरुषः प्राणिति, न तावद् भाषितुं शक्नोति, वाचं तदा प्राणे जुहोति ।[4]

इत्थं प्राण एव वाग्रूपेण विवर्त इति तदभिप्रायो विस्पष्टः ।

वाग्गुणाः सप्त

किंचोपलभ्यमानप्रातिशाख्येषु वाग्धर्मौ श्वासनादाख्यावेवोपलभ्येते इति प्रोक्तं प्राक् ।

विद्यावाचस्पतिमहाभागैस्तु तैजसप्राणः, वायुः, श्वासः, नादः, श्रुतिः, स्वरः, वर्णः, इत्येते सप्त वाचो गुणा व्याख्याताः । तत्र वागुपादानं प्राणः

---

१. ऐतरे० उप० १. २. ४ । २. प्रश्नोप० १. ४ ।
३. ऋक् सं० अष्ट० ८ अ० ३ वर्ग १६ । ४. कौषीत० उप० २. ५ ।

शरीरे ब्रह्मग्रन्थिस्थाने स्थितो वर्तते। स यदा जठराग्निना संयुज्योर्ध्वं वाति तदा वायुर्भवति। तदनु श्वासः, नादः, एवं नाभ्यादिस्थानं प्राप्य श्रुतित्वं स्वरत्वं च भजते। अपि च स क्रमशः मूर्द्धानं संगत्य परावृत्य च मुखं प्रविशन् तालवादिव्यापारेण वर्णत्वमुपैति। इत्थं प्राणोऽयमुक्तगुणैरेव वर्णरूपरुषितो भाषापदभाग भवतीति बोध्यते।

स्वरगुणविवेचनम्

प्रातिशाख्यप्रभृतिषु ग्रन्थेषु; इमे गुणा अपि स्वरः, मात्रा, स्थानकरणे बलम्, अनुप्रदानं चेति संज्ञाभिः पंचधा कथिताः। ते चेह निरूपिता प्राक्।

वर्णसमीक्षायां च स्वरगुणः, विशेषेण विचारितः। तत्र तावत् स नवधा प्रोक्तः श्वासलक्षणः, नादलक्षणः, विवारलक्षणः, स्थानलक्षणः, व्यक्तिलक्षणः, गेह्वलक्षणः, श्रुतिलक्षणः, सवनलक्षणः, भागलक्षणश्चेति।

प्रथमं श्वासलक्षणस्वरस्तत्रेत्थं व्याख्यातः, अयं विश्वकर्मा प्राणो द्विधा, बहिः प्राणः सूर्यो नाम, अन्तः प्राणः स्वरो नाम। तत्रामुष्माद् बहिःप्राणात् सूर्याख्यात् सर्वजगद्व्यापी कश्चिद् वाङ्मयो महासमुद्रः प्रवर्तते सरस्वान् नाम। अयमेव अन्तरिक्षरूपः समुद्रो निरुक्ते व्याख्यातः[1], स इन्द्रध्वेक, अथैतस्मादन्तः प्राणात् स्वराख्यात् सर्वशरीरव्यापिनी काचिद् वाङ्मयी महानदी प्रवर्तते सरस्वती नाम। सा च तेजोमयी वागैन्द्रीति वेदे श्रूयते तद्व्याख्यास्यतेऽनुपदमग्रे। इत्थं चात्र बहिः प्राणात्मकोऽयं सूर्यो जगदात्मा, अन्तः प्राणात्मकः स्वरश्च प्रतिशरीरसात्मेति सिध्यति। तत्र प्राणात्मकः स्वरः नासिकास्थानाभ्यां निश्वासप्रश्वासाभ्यां लक्ष्यत इत्यतः श्वासलक्षणोऽप्युच्यते। तत्र स्वर एव श्वास इति न भ्रमितव्यम्; मूलाधारादारभ्य ब्रह्मरन्ध्रपर्यन्तं मेरुदण्डसलग्नस्तदुत्तरतस्तद्दक्षिणतो वा संसज्यानवरतं ऊर्ध्वमधस्ताद् वा क्रममाणः शारीरं वायुं बहिर्निःसारयति, बाह्यं च विशुद्धमन्तः संचारयति, स निश्वासः प्रश्वासो वा भवति, यद् व्यापारानुरोधेन च तत्र वायुव्यापारो जायते स प्राणः स स्वर इति विवेचनात्।

प्राणो द्विधेति स्वरसूर्ययोर्नित्यसम्बन्ध इति बुद्ध्या श्रावयति श्रुतिरपि 'तावेतावन्योन्यस्मिन् प्रतिष्ठितौ, रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः प्राणैरयममुष्मिन्, तस्योपनिषद् अहम्' इति। तावित्यनेन स्वरसूर्ययोरेवात्र ग्रहणं भवति, ततश्च द्वैविध्यं तस्य जातमेव।

---

१. नि० अ० २ पा० ३।

किंचेदमपि ज्ञायते यद् बहिर्दृश्यं सर्वं बहिःप्राणजन्यम्, निमित्तवशाच्च तत्र नानात्वमिवाभाति। एवमन्तर्वर्तमानं च निखिलम् अन्तःप्राणजन्यम् तत्राप्यनेकत्वानुभवः, निमित्तविशेषसंयोगादेवेति वस्तुजातं विश्वकर्मप्राणमूलकमेव सिध्यतीति श्वासलक्षणस्वरविचारे जगदुत्पत्तिप्रकारश्च प्रकारान्तरेण समायातः। अस्तु, स्वरेणामुना कालज्ञानं शुभाशुभफलादिकं च विचार्यत इत्यन्यत्र विस्तरः।

नादविचारलक्षणस्वराविह प्रयत्नविशेषावेव व्याख्यातौ, स्थानलक्षणस्वरूपनिर्धारणे वर्णोत्पत्तौ त्रीणि स्थानानि कल्पितानि, तत्र उरोजिह्वामूलकण्ठनासाः प्रथमम्, तालुमूर्द्धदन्तनासा मध्यमम्, सृक्कोपध्मौष्ठनासा उत्तमम्। अतस्तेषां मते अ इ उ इत्येते त्रयः स्वराः प्रथममध्यमोत्तमस्थानाः क्रमेणोदात्तानुदात्तस्वरिता भवन्ति। तथा च अक इत्युदात्तः, इकि इत्यनुदात्तः, उकु इति स्वरितः, दीर्घप्लुताश्च नातिरिच्यन्ते, एतेष्वेव तदन्तर्भावात्।

तस्मात् त्रय एव स्वराः सिद्धा इति स्थानलक्षणस्वरः कथितः।

अथ व्यक्तिलक्षणस्वरः प्रक्रमते, अयं हि स्वरो व्यक्तिभेदाद् भिद्यते इदमाह्वानं देवदत्तस्य, इदं च यज्ञदत्तस्येति ज्ञानमनेनैव स्वरेण जायते; यतः प्रतिव्यक्ति यथागमनादिकं भिन्नं भिन्नं भवतीति प्रकृतिसिद्धं तथैवोच्चारणमपि। ततश्च स्वरभेदे व्यक्तिलक्षणस्वरः कल्पनीयः। तत्र महाप्राणाल्पप्राणप्रयोगाच्चोदात्तानुदात्तस्वरितानां व्यवस्थापि जायते। जनाश्च केचिदुदात्तभाषिणः केचिच्चानुदात्तभाषिणः, अपि चान्ये बहवः स्वरितभाषिणो दृश्यन्ते। तत्रापि व्यक्ति विशेषस्वर एवेति व्यक्तिलक्षणस्वरः सिद्धः।

गानपदबोध्यः सामिको हि गेह्यलक्षणस्वरो ज्ञायते; यतः

"आर्चिकं गाथिकं चैव सामिकं चेतिस्वरान्तरम्"

इत्यत्र त्रिविधः स्वरः ख्यातः, तत्र पद्यप्रपाठकाः आर्चिकं स्वरमङ्गीकुर्वन्ति। स च स्वरितस्वर एव। नच तत्रात्युच्चैर्नैवातिनीचैरुच्यते किन्तु मध्यममार्गेणोद्यते। अन्यथा ते पाठका हस्यन्ते इति। गद्यपाठकास्तु संभाष्यव्यक्तिश्रवणमात्रोद्देशेन नीचैरेवस्वरैः शब्दमुच्चारयन्ति, ततश्चानुदात्तः स गाथिको नाम स्वरः स्पष्टः।

गायकाश्च पुनः सामिकं स्वरमवलम्बन्ते, सच स्वभावत उच्चैः शब्दोच्चारणविषयस्ततश्चोदात्तोऽपि, तथा च त्रिषु स्वरेषु सिद्धेषु यः सामिकस्वरः स एव प्रकृते गेह्यलक्षणस्वर इत्याख्यायते। वेदेषूपलभ्यमाना ऋग्गाथा

सामेत्येते त्रयः शब्दा अपि क्रमेण पद्यगद्यगेयार्था एवेति गेह्यलक्षणस्वरः सिद्धः।

श्रुतिलक्षणस्वरः खलु संगीते प्रसिद्धः। "मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्" इत्युपदर्शितदिशा शरीराग्निना क्षुभ्यमाणो वायुरूर्ध्वं गच्छन् नादो भूत्वा तत्तत्स्थानमुपलभ्य श्रुतिसंज्ञं ध्वनिं जनयति। ततश्च सप्त शुद्धाः, विकृताश्च द्वादश स्वरा जायन्ते। तदुक्तम् :—

शारीरं नादसंभूतिः स्थानानि श्रुतयस्तथा।

ततः शुद्धाः स्वराः सप्त विकृता द्वादशाप्यमी, इति। तत्र षड्जः; ऋषभः, गान्धारः, मध्यमः, पंचमः, धैवतः, निषादश्चेति सप्त स्वरा विशिष्टैरेव गायकैः श्राव्यन्ते। अपि चैतेषां स्वरूपज्ञानं पशुपक्षिणां स्वज्ञानाज्जायते। पशवः पक्षिणश्च बहवः तत्तत्स्वरानुरूपमेव रुवन्ति। तथा च श्रूयते :—

षड्जं रौति मयूरो हि गावो रम्भति चर्षभम्।
अजा विरौति गान्धारं क्रौंचो नदति मध्यमम्॥
पुष्पसाधारणे काले कोकिलो रौति पंचमम्।
अश्वस्तु धैवतं रौति निषादं रौति कुंजरः॥

इत्यलमप्रकृतपल्लवितेन। विशेषजिज्ञासुभिः तत्संगीतशास्त्रतोऽवगन्तव्यम्।

एतच्छ्रुतिस्वरूपम् "रणद्भिराघट्टनया नभस्वतः, पृथग् विभिन्नश्रुतिमण्डलस्वरैः" इतिमहाकविमाघपद्यव्याख्यायां व्याख्यातं मल्लिनाथेनापि। तत्र श्रुतिर्नाम स्वरारम्भावयवशब्दविशेष इत्युक्त्वा प्रमाणे—

प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः।
सा श्रुतिः संपरिज्ञेया स्वरावयवलक्षणा॥ इति।

वचनमुदाहृतम्।

तथा च पूर्वोक्तश्रुतिलक्षण एवैतस्यापि तात्पर्यं सुस्पष्टम्।

अत एव च—

श्रुत्यन्तरभावीयः स्निग्धोऽनुरणनात्मकः।
स्वनो रंजयति श्रोतुश्चित्तं स स्वर उच्यते॥

इति तत्रस्थरत्नाकरवचनात् श्रुत्यारब्धमनुरणनं स्वर इति स्वरलक्षणमपि संगच्छते।

तदित्थं संक्षेपेण श्रुतिलक्षणस्वरो निरूपितः। अवशिष्टावत्र च सवनभागलक्षणस्वरौ प्रागेव विशदीकृताविति ततोऽवधेयम्।

एवं वागगुणेषु स्वरगुणो नवधा विवेचितः, अन्ये च गुणाः प्राग् व्याख्याता एवेति।

सिद्धान्ते किमात्मिका वाक्

प्रकृते वाचः प्राणप्रयत्नं वेदोक्तमार्गेणोक्तम्; प्रातिशाख्ये यद्यपि "वायुं प्रकृतिमाचार्याः शब्दस्तनू" इत्यादिपूर्वोक्तवचनैः वाग्वात्मकः शब्द इति ज्ञायते तथापि तत्र वायुरित्यस्य प्राणवायुरित्यर्थः; अत एव ऋग्वेदप्रातिशाख्ये "वायुः प्राणः कोष्ठ्यमनुप्रदानम्" इति सूत्रव्याख्यावसरे "य इमे शारीरा इह पञ्च वायवो नानाकर्माणः प्राणापानव्यानोदानसमानास्तेषां प्राणो हि नाभेरुपरिष्टाद् व्याप्यास्ये व्याचरति[1] इत्युक्तमुव्वटेन। तथा च प्राणात्मकवायोर्वाग् विवर्त इति साधु भवति।

विषयेऽस्मिंश्च शास्त्रेषु प्रचलितानि विभिन्नानि मतानि सन्ति, तत्सर्वं समग्राहि हरिणा।

तत्रादौ वायोर्विवर्तः शब्द इतीत्थमुच्यते—

लब्धक्रियः प्रयत्नेन वक्तुरिच्छानुवर्तिना।
स्थानेस्वभिहतो वायुः शब्दत्वं प्रतिपद्यते[2] ॥ इति।

इदं हि प्रत्यक्षं यत् प्रयोक्तुः प्राणाख्यवायुः ऊर्ध्वं गच्छन् तत्कण्ठादिस्थानमाहत्य शब्दात्मना विवर्तते। एतच्च शिक्षादिष्वप्युक्तं व्याख्यातमत्र बह्विति।

केचन परमाणुपरिणामः शब्द इत्याम्नन्ति। तदुक्तम्—

अणवः सर्वशक्तित्वाद् भेदसंसर्गवृत्तयः।
छायातपतमःशब्दभावेन परिणामिनः[3] ॥ इति।

अस्यायम्भावः, पृथ्वीजलतेजोवायुपरमाणवः सर्वोत्पादनशक्तिमन्तः परस्परं संमिलन्ति विभिद्यन्ते च क्रियाशीलत्वात्, तत्र संमिलितानां तेषां यथा छायातपतम आद्याः परिणामा भवन्ति तथा तेषां परस्परं मेलने विघटने च शब्दोप्युत्पद्यते, तदेव भगवता कणादेनोक्तम् "संयोगविभागशब्देभ्यः शब्दनिष्पत्तिरिति", अनयोक्त्या हरिणा छायातम आदीनामशब्दरूपता वैशेषिकोक्ता निरस्ता, किन्तु शब्दस्य संयोगविभागजन्यत्वं गुणत्वं च तदुक्तमङ्गीकृतमिति।

अग्रे मतान्तरमुच्यते—

स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः।
अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः[4] ॥ इति।

---

१. ऋग्० प्रा० १३. १। २. वाक्यप० १. १०९।
३. वाक्यप० १. १११। ४. वाक्यप० १. ११२।

अयमाशयः—

यथा पृथ्वीजलतेजोवायूनां परमाणवो वैशेषिकैरङ्गीकृताः, तथा आकाशस्यापि शब्दतन्मात्राख्यः परमाणुः सांख्यैरभ्युपगतः, ते वायोरप्यतिसूक्ष्माः सर्वत्रान्तरिक्षे परिव्याप्नुवन्ति तत एव अन्तरिक्षमपि सरस्वानिति समुद्र इति च परिभाष्यते वैदिकप्रक्रियायामिति स्पष्टं निघण्टुनिरुक्तप्रभृतिषु। दृश्यते हि यदननुभूयमानोऽपि वायुः व्यजनादिव्यापारैः प्रकटीक्रियते, तद्वदेव पार्थिवादिपदार्थानां संयोगविभागादिभिः ते शब्दतन्मात्राख्याः परमाणवः क्षोभेण लहरीरूपतामापद्य श्रोत्रग्राह्या भवन्ति, यथा आकाशे दृश्यमानानि सूक्ष्माणि मेघखण्डानि वृष्ट्युन्मुखानि घनीभावमापद्यन्ते तथैव शब्दतन्मात्राख्यपरमाणवः यन्त्रादिभिर्निःसृतेन मुखविनिःसृतेन वायुना क्षोभमापद्य घनीभावं गताः श्रोतॄणां श्रोत्रग्राह्या भवन्ति। तदित्थं परमाणुपरिणामः शब्दः, तस्य च द्रव्यत्वमभिव्यंजितमत्रेति।

आधुनिकाः केचन वैज्ञानिका वायोर्गुणः शब्दः, वायोर्विवर्तः शब्दो वेति प्रत्यक्षमनुभवन्तिस्म प्राक, तद्यथा यन्त्रद्वारा यस्मात् पात्राद् वायुः निःसार्यते तत्रानेकविधाघातेनापि शब्दो न जन्यते तस्माद् यत्र वायुर्नास्ति तत्र शब्दोऽपि नैवेति तेषामभिमानः।

वस्तुतस्तु नोत्पत्तिं प्रति वायुः कारणम् अपितु श्रुतिं प्रति, उत्पन्नो हि शब्दो वीचितरंगन्यायेन शब्दान्तराण्यपि उत्पादयतीत्युक्तं प्राक्। तस्य च शब्दजशब्दस्योत्पत्तौ वायुः सहकारी। नहि वायुना विना वीचितरंगन्यायेन शब्दा उत्पद्यन्ते, तथा च वायुविरहितेऽपि पात्रादौ शब्दाः प्रादुर्भवन्ति किन्तु श्रुतिगोचरतां न भजन्त इत्यवधेयमत्र। अत एव तत्रापि शब्दप्रचारक 'रेडियो इति प्रचलितनाम' यन्त्राविष्कारात् प्रागेव तन्मतं स्थितमासीत्। एतत्प्रादुर्भावे तु सदागतिना सह विरोधः स्पष्टः यतो यस्मिन् क्षणे विदेशे शब्द उच्चार्यते तस्मिन्नेव क्षणे स शब्दः भारतेऽपि श्रूयते, न तादृशी प्रबला गतिर्वायौ वर्तते।

एवं शब्दगुणकमाकाशमिति मतं च सर्वतो जागरूकं भवति। पाश्चात्त्यमनीषिणश्च 'इथर' 'स्फेम्' इति नाम्ना शून्यमाकाशमेवावगच्छन्ति। तदित्थमाधुनिकतमं पाश्चात्त्यमतं प्राचीनतमं च भारतीयमतं निरूप्य सामंजस्यमुभयोरुपदर्शितम्।

भगवतः पतंजलेर्मतमाश्रित्य शब्दो ज्ञानस्य परिणाम इत्यग्रे उक्तं हरिणा। महाभाष्ये हि 'आख्यातोपयोगे'[1] इति सूत्रव्याख्यायां कथमुपाध्यायादधीत

---

१. पाणिनि सू० १. ४. २९।

इति सन्देहमुद्भाव्य सन्ततत्वादित्याद्युत्तरमभिहितम् । तदभिप्रायस्तु 'उपाध्यायादधीते' इत्यत्रापादानत्वं तदैव सेत्स्यति यदा शब्दानामपक्रमणं भवेत् , किन्तु तत्र तथा न भवति । नहि वृक्षादपक्रान्तं फलं पुनर्वृक्षे भवतीति प्रत्यक्षम् । शब्दस्तु पौनःपुन्येन वर्तते तत्रेति सन्देहः, सन्ततत्वादित्याद्युत्तरेण च शब्दस्य व्यंजका ध्वनय एव उपाध्यायादपक्रान्ताः श्रोतुः-श्रोत्रदेशं गच्छन्तः स्फोटरूपं शब्दमभिव्यंजयन्ति, अथवा उपाध्यायस्य ज्ञानानि विभिन्न शब्दरूपतामासाद्य सन्ततानि भवन्तीति शब्दो ज्ञानस्य परिणामः । तत्रस्थकैयटोपि 'ज्ञानस्य शब्दरूपतापत्तिदर्शनमत्रभाष्यकारस्येति व्याचख्यौ । तदेव वाक्यपदीये :

यथेदमान्तरं ज्ञानं सूक्ष्मवागात्मना स्थितम् ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥[१]

इत्येवमुपवर्णितम् , इदं हि पूर्वं परवाग्निरूपणावसरे मया व्याख्यातम् ।

एवमण्वात्मको वाय्वात्मकः ज्ञानात्मकश्च शब्दः कथितः । तत्र अण्वात्मकश्च वाय्वात्मकश्च शब्दः चेतनाचेतनसाधारणः, वस्तुनोः संयोगात् पटपटेति विभागाच्च वेणोः चटचटेति शब्दनिष्पत्तिस्वीकारात् । नहि तत्र प्राणाख्यवायुः ज्ञानं वा यतस्तदात्मकः शब्दो भवेत् । प्राणाख्यवायोर्विवर्तः शब्द इति तु प्राणवतामेव संघटते, तत्रैव समानोदानप्राणादेः पंचविधवायोः संयोगविभागौ प्रसिद्ध्यतः । पशवः पक्षिणः मनुष्याश्च सर्वे प्राणे बलमारोप्य हुं कुर्वन्ति कूजन्ति भाषन्ते च । तत्रापि पशुपक्षिणां शब्दा अव्यक्ता एव श्रूयन्ते इति केवलं प्राणजन्याः । मनुष्याणान्तु व्यक्ता इत्यत्र ज्ञानं प्रधानम् । अत एव मनुष्यवागेव ज्ञानात्मिकेति हरेस्तृतीयं मतं वर्णात्मकं शब्दमेव विषयीकरोति ।

तदाह श्रुतिरपि :

'वाग्वै पराच्यव्याकृतावदत्' ते देवा इन्द्रमब्रुवन् , इमां नो वाचं व्याकुरु इति, सोऽब्रवीत् , वरं वृणै, मह्यं चैष वायवे च सह गृह्याता इति, तस्मादैन्द्रवायवः सह गृह्येत, तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुद्यते'[२] इति ।

अस्यायम्भावः ।

यथा पश्वादीनां वागसंस्कृता, अव्यक्ता, पदवाक्यादिविभागविरहिता श्रूयते, तथैव प्रकृत्या मनुष्याणामपि वाक् पदवाक्यादिविभागशून्येव, यथा

---

१. वाक्यप० १. ११३ । २. तैत्ति० सं० ६. ४. ७.

बालानाम्। तत इन्द्रो हि ज्ञानस्याधिष्ठाता, तां वाचं मध्यतः आक्रम्य व्याकरोति, पदवाक्यप्रकृतिप्रत्ययादिरूपेण विविनक्ति। तथा च मनुष्यवाचि योऽयं पदवाक्यादिविभागो दृश्यते स खलु इन्द्रकृतः ज्ञानकृत इति यावत्। पश्वादीनां तादृशज्ञानाभावात् न तथेति मनुष्याणां वाक् पश्वाद्यपेक्षया परिष्कृतेति। एतन्मूलकमेवेन्द्रो व्याकरणकर्तेति शास्त्रे लोके च विख्यातमस्ति।

यदि च पक्षिणां शुकादयोऽपि व्यक्तान् शब्दानुच्चारयन्तीत्युच्यते, तत्तु केवलम् अनुकरणशक्तिमत्त्वात्। अनुकरणे हि ते पटवः। वर्णितं च महाकविना बाणेनापि विलक्षणं तदनुकरणमेवम् :—

जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयैः
ससारिकैः पंजरवर्तिभिः शुकैः।
निगृह्यमाणा वटवः पदे पदे,
यजूंषि सामानि च यस्य शंकिताः[1] ॥ इत्यादि।

अस्तु! अस्यां ज्ञानात्मिकायामेव वाचि परा पश्यन्ती मध्यमा वैखरी रूपेण प्रविभाग क्रियते शास्त्रेषु नान्यत्रेति।

वागविभागे ऋग्वेदसंमतिः

एताश्चतुर्विधाः खलु ऋग्वेदेऽपि समुपलभ्यन्ते—

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥[2] इति।

अत्र "चत्वारि वाक्" इत्यस्य चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति महाभाष्यम्, तत्र कैश्चित् चत्वारिपदेन नामाख्यातोपसर्गनिपाता एव संगृह्यन्ते, किन्तु धीमता नागेशेन "पदजातानि परा पश्यन्ती मध्यमा वैखरी रूपाणीति, अतएवाग्रे निपाताश्चेति चकारः संगच्छते"[3]। इत्येवं वाग्विभागरूपेण व्याख्यातं तदेव च युक्तमिति चतुर्विधत्वं तत्समीचीनम्।

---

१. कादम्बरी श्लो० १२। २. ऋक सं० २।३।२२।
३. महाभा० पस्पशा० उद्द्यो०।

हरिस्तु योगिभिरप्यगम्या परावागिति मत्वा त्रिधा वागिति व्याचष्टे :—

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रया वाचः परं पदम्[1] ॥ इति ।

अत्र तीर्थपदेन क्रमशः आस्य हृदय नाभिस्थानविशेषा एव गृह्यन्ते । तथाचोक्तमन्यत्र—

परा वाग् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ॥ इति ।

तन्मते पश्यन्तीवाच्यपि प्रकृतिप्रत्ययविभागमनुभवन्ति योगिनः । ततः मध्यमा-वैखरी-वाचामेवात्र व्याकरणप्रकरणे व्याख्यानं युक्तम् । एतावता परावाग् नास्ति, तिस्र एव वाच इति न निश्चेतव्यम् ।

तदित्थं परा, पश्यन्ती, मध्यमा, वैखरीति चतुर्धा हि वागिष्यत इति प्रतिज्ञातं निष्पन्नम् । सोऽयं वाग्विस्तरः; अत्रत्यं वैज्ञानिकं तत्त्वं च, संस्कृत शास्त्रेष्वेव समुपलभ्यते नान्यत्र कुत्रापीति सुस्थिरं निधातव्यम् ।

---

१. वाक्यप० १. १४४.

पञ्चमोऽध्यायः

ध्वनिविमर्शः

तत्र ध्वनिशब्दार्थः

तृतीयचतुर्थाध्याये ध्वनेरुत्पत्तिप्रकारः प्रदर्शितः। अत्र च पुनस्तद्भेद-विकासादिकं परिचिन्त्यते। तत्र तावद् ध्वनति ध्वनयति वेति व्युत्पत्त्या-ध्वनिरितिपदेन शब्दो गृह्यते, ध्वन्यत इत्यनया निरुक्त्या चार्थोऽपि। यत्र ध्वनिपदेन शब्दो गृहीतः, तत्र स शब्दो व्यक्ताव्यक्तसाधारण-ध्वनिरूपः। यथा पदार्थयोरभिघाताख्यसंयोगात् 'पटत्' पटदि'ति, विभागाच्च-वेणोः 'चटचटेति', अव्यक्ता ध्वनयः प्रभवन्ति, तथैव सति सामर्थ्ये वक्तुरीहायां च, जिह्वाव्यापारेण ताल्वादिस्थानेषु वायोः संयोगाद् व्यक्ता वर्णरूपा ध्वनयः प्रादुर्भवन्ति। तत्रोभयत्रापि ध्वनिशब्दव्यवहारः प्रचलति लोके। तद्यथा अव्यक्तध्वनिषु कंकण-किंकिणी-नूपुरध्वनयः श्रूयन्त इत्युच्यते। व्यक्तध्वनयस्तु विकृताविकृतरूपेण जनैरुच्यार्यन्त एव। विकाराः खल्वपि व्यक्तध्वनिषु परिलक्ष्यन्ते, यतो हि ते वर्णरूपाः सन्ति। नहि निर्वर्णे अनाकृतौ विकारः संगच्छते।

अस्तु,

प्राणिनां ध्वनौ सर्वत्र संस्काररूपा प्रतिभैव भवति कारणमित्युक्तं वाक्यपदीये। तथाहि—

> अभ्यासात् प्रतिभाहेतुः सर्वः शब्दोऽपरैः स्मृतः।
> बालानां च तिरश्चां च यथार्थप्रतिपादने॥ [१]इति।

अर्थात् 'येऽप्यविदितसंकेता अमी बाला, जडप्राया वा तिर्यञ्चः, तेषा मप्यनादिवासनावशात्तदर्थः प्रतीयमानो दृश्यते शब्दः। तथा च जडानामपि प्राणिनां नियतपदः शब्दः संबोधनायोदीर्यते। तेन प्रतिनियतजात्यनुसारे-णैव नियतैव काचित् प्रतिभा बोध्यत इति तन्मूल एव सर्वः कश्चित् तेषां व्यवहारः' इति तद्व्याख्याने पुण्यराजः।

सारांशस्तु—यदि पश्वादिषु स्वाभाविकी प्रतिभा नान्वमंस्यत तदा मनुष्याह्वाने पशवः कथं प्रवृत्ता अभविष्यन्। दृश्यते च नियताह्वानशब्द-प्रयोगे त एव पशवः समागच्छन्ति यान्ति च। यथा 'आतु' 'तू' (आयातु)

---

१. कां० २, का ११८।

इत्युग्राह्वाने (गोहराना) पुच्छमान्दोलयन् श्वा क्षिप्रमायाति, 'दुर दुरे'ति उच्चारणे च पलायते सः। एवं गजप्रेरणे हस्तिपका 'गच्छ' 'गच्छ' इति ब्रुवते, गोपालाश्चाह्वाने गवाम् 'अही' 'अही' 'ही' (एहि) इति पदं प्रयुंजत एव।

अपि च यदा गावः 'हुँ कुर्वन्ति, वत्साश्च तत्क्षणमेव'म्बां' इति वदन्ति। तथा च तत्रापि वाचैव व्यवहारो लक्ष्यते। पशूनामपि वाचैव व्यवहार इति तु तैत्तरीयब्राह्मणे स्पष्टमुक्तम् –

वाचं देवा उपजीवन्ति विश्वे, वाचं गन्धर्वा पशवो मनुष्याः[1], इत्यादिना। तस्मात् प्रतिभारूपः संस्कारः स्वीकार्यः। तेन च—

स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः।
जन्त्वादयः कुलायादिकरणे केन शिक्षिताः[2] ॥

इत्यादीनामप्युक्तं समाधानं साधु। नहि संस्कारमन्तरेण तथा भवितुमर्हतीति निश्चितम्।

तदित्थं व्यक्ताव्यक्तध्वनिरूपः शब्दः प्राणिमात्रव्यवहारोपयोगी सिद्धः।

ध्वनिभेदः

तत्र ध्वनिभेदः शिक्षायामेवमुक्तः—

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ज्ञेयाश्चत्वारश्च यमाः स्मृताः ॥
अनुस्वारो विसर्गश्च ≍ क ≍ पौ चापि पराश्रयौ।
दुःस्पृष्टश्चापि विज्ञेयो लृकारः प्लुत एव च[3] ॥ इति।

अयम्भावः—'अ इ उ ऋ' इत्येते चत्वारः स्वराः ह्रस्व-दीर्घ-प्लुतभेदेन द्वादशरूपतां भजन्ते, लृकारस्तु ह्रस्व एवोपदिश्यते, अत एते त्रयोदश भवन्ति। 'ए ऐ ओ औ' इत्येतानि च सन्ध्यक्षराणि सन्ति। सन्ध्यक्षरेषु ह्रस्वो न भवति, तस्माद् दीर्घ-प्लुतभेदाभ्यामष्टावेतानि। ततश्च त्रयोदशभिः सह संख्याने एकविंशतिः स्वराः संकलिताः।

अतः परं कादयो मावसानाः स्पर्शाः पंचविंशतिः सन्ति। एते हि जिह्वा-मूल-तालु-मूर्ध-दन्तोष्ठादिभिः परस्परं स्पर्शैरभिनिष्पत्य आविर्भवन्तीति

१. अध्याय २, प्रपा० ८, अनु० ८। २. वाक्यपदीय, कां० २, का० १५०।
३. पाणि० शि० ३–५।

हेतोः स्पर्शा उच्यन्ते। 'य र ल व श ष स हा' इत्यष्टौ ध्वनयो यादिपदेनावगम्यन्ते। तदनु यमाः चत्वारः कथिताः। ते च प्रातिशाख्य एव प्रसिद्धाः। तत्र वर्गेष्वाद्यानां चतुर्णां पंचमे परे मध्ये यमो नाम पूर्वसदृशो वर्ण इत्युच्यते। तदुदारणानि च 'पलिक्क्नीः' 'चख्ख्नतुः' 'अग्ग्निः,' घ्घ्नन्तीत्येतानि। ततोऽनुस्वारः, विसर्गः, ≍क≍प, दुःस्पृष्टो लकारः, स च 'अग्निमीडे' इत्यादौ प्रसिद्धः। ल्ह' ध्वनिरपि वेदे श्रूयते–' पृतनासु साल्हा' (साढ्वा) इत्यादौ। किन्तु पाणिनिना स न संगृहीतः, दुःस्पृष्टपदेन तस्यापि संग्रहसंभवात्। केचित् लृकारोऽपि प्लुत इति वदन्ति। अतएव त्रिषष्टिश्चतुःषष्टिर्वेत्युक्तम्।

एषा हि ध्वनिसंख्या प्लुतयमादिविशिष्टा। तत्र यदि स्वरेभ्यो नव प्लुताः, व्यंजनेभ्यो जिह्वामूलीयोपध्मानीयौ चत्वारो यमाश्च निस्सार्यन्ते तदा 'एकोनपंचाशत्' वर्णा अवशिष्यन्ते। तत्र दीर्घलृकारस्य, संयुक्तवर्णप्रतिनिधिभूतस्य क्षकारस्य च योगे एकपंचाशद् वर्णमातृका आसमे प्रसिद्धा सिध्यति। यतो हि प्लुतो न कश्चिद् ध्वनिः, अपि तु 'आ' इति दीर्घध्वनेर्वितानमात्रम्। एवं च यमा अपि संयुक्तध्वनिरूपा एव सन्ति। न हि 'पलिक्क्नीरित्यस्योच्चारणे कश्चन नूतनो ध्वनिः श्रूयते, अपितु प्रसिद्ध एव। तथैव ≍क≍पावित्यत्रापि बोध्यम्।

तस्माद् येषां ध्वनीनां स्वरूपतोऽतिरिक्ता प्रतीतिर्भवति त एव ध्वनयः, तेषामेव लोके व्यवहारः, अतश्च शिक्षोक्तध्वनिभेदेन सह न कश्चन विरोधोऽपि।

साम्प्रतन्तु—वैदिकध्वनिसमूहे द्विपंचाशत्संख्येत्युद्घोषः प्रचलति। तत्र प्रातिशाख्यप्रसिद्ध 'ल्ह' ध्वनिरपि संनिविश्यते जिह्वामूलीयोपध्मानीयावपि संगृह्येते। अपिच हीयते दीर्घलृकारः, क्षकारश्च त्यज्यते। तथा च द्वयोः परित्यागः, त्रयाणां च सन्निवेश इत्येवं क्रमेण द्विपंचाशत्।

तत्रेदं सत्यं यद् यदा यस्यां भाषायां ध्वनीनां व्यवहारे उपयोगः परिलक्षितः, तावन्त एव ते तदा परिगणिताः। यथा पालिभाषायां दश एव स्वरा उपयुज्यन्ते, 'ऋलृ ए ओ' इत्येते चत्वारः स्वरा लुप्ता एव, व्यवहारे तेषा-

---

१. प्रातिशाख्ये–तत्प्रकार एवमुक्तः—

द्वयोश्चास्य स्वरयोर्मध्यमेत्य संपद्यते स डकारो लकारः।

ल्हकारतामेति स एव चास्य ढकारः सन्नूष्मणा–संप्रयुक्त इति। सोऽयम् 'साढ्ये साढ्वा साढेति निगमे (६–३–११३) इति पाणिनेः सूत्रव्याख्याने भट्टोजिदीक्षितेनाप्युपन्यस्तः।

मनुपयोगात्।[1] एवं व्यंजनेषु शषौ न संगृहीतौ, अपितु सकार एव केवलः संगृह्यते। विसर्गोऽपि तत्र नोपलभ्यते तत्स्थाने कदाचिद् ओकारः कदाचिच्च तल्लोप इति ध्वनिव्यवहारव्यवस्था। एवमेव आंग्लभाषायां ध्वनौ संकोचो देशभेदाल्लभ्यते। चीनीभाषायां च ध्वनिभेदः सर्वतोऽधिकः। इत्येवं सर्वासु भाषासु न्यूनाधिक्येन तत्र भेदो लक्ष्यते।

भवतुनामैवं भाषाभेदेन वर्णसंख्याभेदः, अस्माकं तु संस्कृतभाषापद्धतिरेव मुख्यतया विचार्येति तद्विशेष एव विव्रियते।

आगमे वर्णमातृका

आगमशास्त्रोक्तवर्णमातृकायान्तु एकपंचाशद्ध्वनिषु षोडश स्वराः, अनुस्वारविसर्गयोरपि स्वरेष्वेव गणनात्। व्यंजनानि च पंचत्रिंशत्।

तत्र स्वरेषु समानाक्षराणि षट्-अ आ इ ई उ ऊ इति।

सन्ध्यक्षराणि च दश—ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः इति। यद्यपि सन्ध्यक्षरत्वेन व्यवहारः चतुर्णामेव, तत एव पूर्वं शिक्षाध्वनिव्याख्याने दश समानाक्षराणि, अस्माभिरप्युक्तानि। परं तत्त्वपर्यालोचने ऋ ऌ इति वर्णावपि सन्ध्यक्षरत्वेन भासेते। व्याकरणेऽप्यनयोर्मध्ये र् ल् इति व्यंजने, अभितश्चाज्भक्तिरिति बहुधा घुष्यते। अं अः इत्यनयोस्तु, अनुस्वारविसर्गसंमिश्रणं स्फुटमेव। तस्मादत्र दशसन्ध्यक्षराणि गणितानि।

इदमप्यत्र बोध्यम्—सन्ध्यक्षरत्वादेव ओ औ अं अः इत्यत्र अकारलिपिः तत्तन्मात्रया संयोज्य प्रचलितास्ति। ये तु तन्निदर्शनेन इ उ इत्यादावपि अि अु इत्यादि लिखन्ति ते तु नितान्तं भ्रान्ताः। इ उ इत्येतयोः सन्ध्यक्षरत्वाभावेन तत्र अकारान्तभावस्य मात्रया योगस्य च सर्वथा असंभवात्।

व्यंजनेषु च पंचविंशतिः स्पर्शाः। तद्यथा—

कवर्गे	—	क ख ग घ ङ	पंच कण्ठ्याः
चवर्गे	—	च छ ज झ ञ	,, तालव्याः
टवर्गे	—	ट ठ ड ढ ण	,, मूर्धन्याः
तवर्गे	—	त थ द ध न	,, दन्त्याः
पवर्गे	—	प फ ब भ म	,, ओष्ठ्याः

येषां स्थानक्रमेणैव वर्णमात्रिकायां सन्निवेशः सिद्धः। मुखे हि सर्वोपरि कण्ठस्थानम्, तस्मान्नीचैस्तालु, ततोपि नीचैर्मूर्धा, यतो हि अत्र

---

१. संस्कृतेऽपि वाग्व्यवहारे लृकारस्थाने ऋकारस्यैवोपयोगो भवितुमर्हति सर्वत्रेति मत्वा लृकारध्वनिः प्रत्याख्यातो वार्तिककृता ऋ लृ क् सूत्रव्याख्याने।

मूर्धपदेन दन्तानामेव मूर्धा विवक्षितः, तस्मादेव ट ठ ड ढानामुच्चारणस्य सर्वानुभवसिद्धत्वात्। ततोऽनन्तरं दन्ता, ततोऽनन्तरं चौष्ठाविति।

स्वरेषु तु यदयं स्थानक्रमो नानुवृत्तस्तत्रायमेव हेतुर्यन्मूर्धदन्तस्थानोत्पाद्यौ ऋ ऌ वर्णौ सन्ध्यक्षररूपाविति तयोः समानवर्णेषु मध्ये प्रवेशो नोचित इति। तत एव ओष्ठ्यमुकारं समानाक्षरत्वेन हेतुना पूर्वं संयोज्य तदनु ऋ ऌ वर्णावुपात्ताविति तयोः सन्ध्यक्षरैः 'ए ओ' इत्यादिभिः साहचर्यं स्फुटीभूतम्।

यवर्गे यरलवा अन्तःस्थाश्चत्वारः समायान्ति। अत्रापि स्थानक्रम एवानुवृत्तः। शवर्गे श ष स हा ऊष्माणश्चत्वारः।

अत्र त्रयाणां स्थानक्रमेण सन्निवेशः, ओष्ठ्यस्तु ऊष्मा नास्त्येव। हकारस्य तु सर्ववर्णापेक्षया स्थूलभूतस्यात्यन्तमहाप्राणस्य सर्वान्ते सन्निवेशः समुचितः।

संयुक्तवर्णप्रतिनिधिभूतश्चैकः 'क्ष' इति। तस्य वर्णमातृकारूपायां मालायां मेरुत्वेन सन्निवेशः कृतः।

लकारस्तु व्याख्यातः प्राक्।

तदेवमुक्तध्वनिसंख्या सिद्धा। तदुक्तम्—हारितायनसंहितान्तर्गतमातृकास्तुतावपि—

अद्वयसंविन्मात्रशरीरं सद्वयभावे कलयन्ती,
जातानुत्तरमुखशरकिरणैर्मिथुनविभेदादपि दशधा।
आद्या तत्परपरसंयोगाद् भूयश्चापि चतुर्विधता,
अन्ते भेदाभेदविभेदादपि नृपसंख्या स्वररूपा॥
पंचविधं तत्पंचकमाद्यं व्यत्यययोगाद्वेदविधा,
तदनु चतुर्धा मध्यमहीना मिथुनद्वितयं कलयन्ती।
एवं भूशरमित भेदाढ्या..... इति श्लो० ४–५

अयं भावः—पश्यन्त्यां वाचि शब्दार्थप्रविभागरहितायां न वर्णभेदसंभावना। मध्यमायान्तु शब्दार्थयोर्विभागोऽपि शब्दस्फोटरूप इति न तत्रापि वर्णभेदः। परमग्रे सैव मध्यमा अद्वयशरीरापि वर्णभेदं क्रमेण विकासयति। तत्रादावनुत्तरशब्देन अकारो गृह्यते। तदाद्याः पंच किरणा वाच आविर्भवन्ति। पुनश्चाकारस्य इकारेण उकारेण संमिश्रणे 'ए ओ' रूपता। ए ओ वर्णाभ्यां पुनरकारस्य संमिश्रणे 'ऐ औ' रूपता। भिन्नाभिन्नयोरनुस्वारविसर्गयोर्मेलने तु अं अः रूपतेति षोडश स्वरा उक्ताः।

व्यंजनानि च पंचानां पंचानां पंचवर्गाः इति पंचविंशतिः। चत्वारोऽन्तःस्थाः, चत्वार ऊष्माणः। द्वौ च 'ल क्ष' इति मिथुनरूपौ संयुक्तवर्णाविति एकपंचाशद् वर्णा निरुक्ताः। अत्र ल्ह इति व्यंजनस्यापि मिथुनरूपत्वं स्वीकृतम्, तत्र हकाररूपोष्मसम्बन्धात्।

स्वरेभ्यो व्यंजनोत्पत्तिः

मातृकाचक्रविवेके तु व्यंजनानां स्वरेभ्य उत्पत्तिरिति स्फुटीकृतम्—

यद्वर्णपंचकमपूर्वकमादिवर्ग्यं—
मन्तःस्थतां भजति संकुचिते तदीषत्।
तत्कादिवर्गतनुसंकुचितं नितान्त—
मूष्मात्मकं च दधतेऽङ्कुरिताभिपूर्ति, इत्यनेन। (खण्ड ४ श्लो. २)

अस्यायमाशयः—तत्र मातृका अष्टवर्गात्मिका भवति। ते चाष्टवर्गाः अ क च ट त प य शादयः, तत्र आदिवर्गः स्वरवर्गः, तत्रापि अपूर्वकं वर्णपंचकम् अ इ उ ऋ लृ इति। एतद्धि ईषत्स्पृष्टताप्रयत्नविषयतया ईषत् संकुचितं सत् अन्तःस्थतां यकारादिरूपतां भजते। तत्र क्रमशः इकारस्येषत् संकोचो यकारः, उकारस्य वकारः, ऋकारस्य रेफः, लृकारस्य लकार इति व्याख्यातम्। अत एवेषत् स्पृष्टमन्तःस्थानामित्युच्यते। मन्ये च 'महर्षिपाणिनिरपि संकोचक्रमेणैव ध्वनिविकासमुररीकृत्य 'इग्यणः सम्प्रसारणम्' १-१-४५, इति इकः सम्प्रसारणसञ्ज्ञामुक्तवान्। अपिच वर्णसमाम्नाये पूर्वं स्वराणां तदनु च हयवरलानां संविवेशं कृतवान्। तत्र यद्यपि मातृकाचक्रविवेकव्याख्यात्रा अकारस्य संकोचता नादर्शि अन्तःस्थवर्णेषु, परं महर्षिपाणिनिस्तु 'ह य व र ल' इति वर्णपंचकमुक्त्वा तत्र अकारस्य संकोचो हकार इत्यभिव्यंजितवान्। शिक्षापि "अहौ" कण्ठ्याविति वदति। तत्राप्यकारोच्चारणे यथा विकासस्तथा न हकारोच्चारणे कण्ठस्येत्यनुभूयत ईषत्संकोचः।

तथा च 'ह य व र ट्, ल ण्' इति सूत्रक्रमोऽपि सुसंघटित एव पाणिनेराचार्यस्य। एवं रीत्या च हकारस्य द्वैविध्यं प्रतिभाति। एकस्तावद् अकारसंकोचरूपः, अपरस्तु कवर्गस्येषत् पूर्णताप्राप्तरूपः योऽग्रे ऊष्मसु वक्ष्यते। सोऽयं विकासो यो हल् सूत्रेऽन्त्ये सन्निवेशितः, परं व्याकरणप्रक्रियायामुभयोरेकरूपतैव व्यवह्रिते इति हकारस्य द्विरुक्तता कात्यायनपतञ्जलिभ्यां विचारिता। अस्तु।

अकारस्य संकोचः कवर्गः, इकारस्य चवर्गः, ऋकारस्य टवर्गः, लृकारस्य तवर्गः, उकारस्य संकोचः पवर्ग इति।

एवं संकुचितस्याकारादिवर्णपंचकस्य कवर्गादिपंचरूपतां प्राप्तस्य पुनरीषत्पूर्णतायामूष्माणो भवन्ति। तत्र चवर्गस्येषत् पूर्णत्वं शकारः। टवर्गे-

स्येषत् पूर्णत्वं षकारः। तवर्गस्येषत्पूर्णत्वं सकारः, कवर्गस्येषत् पूर्णत्वं हकार इति। तदेवमकारादिवर्णपंचकस्यैव ध्वनिप्रपंच इति सिद्धं भवति। अत्रोभयत्रापि स्वर पंचकं मूलतया स्वीकृतम्।

अकार एव सर्वा वाक

श्रुतौ तु—अकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति" इत्युक्त्या मूलरूपता एकस्याकारस्यैव स्वीकृता। अकार एवास्यगतेषु विभिन्नस्थानेषु निक्षिप्तः पंचरूपतां भजते। यो वायुः कण्ठे अकारं जनयति स एव तालुनि व्यापृतः इकारम, दन्तमूर्धसु व्यापृतश्च ऋकारम्, दन्तेषु लृकारम, ओष्ठयोस्तु स एव उकारम् जनयतीति अ इ ऋ लृ उ इति पंचाप्येकस्यैव किरणाः मातृकास्तुतावुक्ताः। एषु ऋ लृ वर्णयोः सन्ध्यक्षरत्वात् समानाक्षरत्वेन ततो भेदं ख्यापयितुमुकारस्ताभ्यां प्राक् वर्णमालायां निर्दिष्टः। तेभ्यश्च यथा सर्ववर्णोत्पत्तिस्तथा दर्शितमेव मातृकाचक्रव्याख्याने। अत्र वर्गेषु पंचानां वर्णानां यः परस्परं भेदो जायते तस्यापि हेतुः 'स्पर्शोष्मभिर्व्यज्यमाना' इति श्रुत्या निर्दिष्टः। तत्रोष्मणां हकारस्य मूलरूपम, तद्योगेन प्रथमवर्णानां द्वितीयत्वम्, तृतीयानां च चतुर्थत्वं जायते। तृतीयेषु नासिकाव्यापारयोगे च पंचमत्वं भवति। तदुक्तम् भाष्यकृता—

'यथा तृतीयास्तथा पंचमा आनुनासिक्यमेषामधिको गुणः[1]' इति। प्रथमतृतीययोस्तु वैलक्षण्यं प्रयत्नभेदादेव भवति। वर्णाभिव्यक्तौ हि—आभ्यन्तरो बाह्यश्चेति द्विविधः प्रयत्नः, तत्राभ्यन्तरे आस्ये—स्पृष्टः, ईषत् स्पृष्टः, ईषद्विवृतः, विवृतः, संवृत इति पंच[2] प्रयत्नाः। तत्र कादयो मावसानानां पंच-

---

१. व्याकरणमहा० १-१-९

२. याज्ञवल्क्यशिक्षायाम्—संवृतम्, विवृतम्, अस्पृष्टम्, स्पृष्टम्, ईषत्स्पृष्टम्, अर्द्धस्पृष्टमिति षड्विधमास्यप्रयतनमुक्तम्। तत्र—

अकारः संवृतो ज्ञेय इतरे विवृता स्वराः
सर्वे ते च स्युरस्पृष्टाः स्पर्शाः स्पृष्टा भवन्ति हि।
ईषत्स्पृष्टास्तथान्तःस्था ऊष्माणोऽर्द्धस्पृशः स्वराः॥ इति श्लो० २०९।

अत्र नामाधिक्यमेव प्रतिभाति न ततोऽतिरिक्तं किमपि।

कौमुदीकारस्तु पाणिनीयमतमनुसृत्य विवृतमूष्मणां स्वराणां चेति कृत्वा ईषद्विवृतं न गणयतिस्म। पंचप्रयत्नाभ्युपगमे नाञ्झलाविति सूत्रं व्यर्थं स्यात्। परं नोचितमिति, यतो हि ऊष्मणां स्वराणां चाभिव्यक्तौ भवति प्रयत्नकृतो भेद इत्यनुभवन्तु तत्र भवन्तो ध्वनिविदः। आगमशास्त्रेचोष्मणाम् ईषत् पूर्णत्वमुक्तम्, तदपि ईषद् विवृतत्वमेव गमयति।

विंशतिवर्णानां स्पृष्टं प्रयतनं नियतम्। यतो हि ते ताल्वादिभिः परस्परं स्पर्शैर्जन्यन्ते। एवम् ईषत् स्पृष्टमन्तःस्थानाम्। ईषद् विवृतमूष्मणाम्। विवृतं स्वराणाम्। ह्रस्वस्यावर्णस्य प्रयोगे संवृतमित्याभ्यन्तरप्रयत्नानुकूलो वर्णविभागः संपद्यते।

बाह्यप्रयत्ने तु विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितश्चेत्येकादश प्रयत्ना भवन्ति। तत्र प्रथमं विवारश्वासाघोषेषु वर्गाणां प्रथमद्वितीयौ शषसाश्चायान्ति। संवार-नाद-घोषेषु तु वर्गाणां तृतीयचतुर्थपंचमा य र ल व हाश्चेति। यद् वर्णाभिव्यक्तौ कण्ठविवृतिस्तत्र श्वासो घोषमन्तरेण निःसरतीति हेतोः क्रमो विवारश्वासाघोषाणाम्। एवं यद्वर्णाभिव्यक्तौ संवृतिः कण्ठस्य तत्र नादः स्वाभाविकः, अतएव घोष इत्ययमपि संवार-नाद-घोषाणां क्रमो वैज्ञानिको वै। अल्पप्राण-महाप्राणप्रयत्नाभ्यामुभाभ्यां चातोऽपि सूक्ष्मतया वर्णविभागः संघटितः। तत्र हि वर्णाभिव्यक्तौ केषुचिद् वर्णेष्वल्पप्राणः (अल्पवायुः) अपेक्ष्यते अन्येषु च महाप्राण इति तद् रहस्यम्। तथा च वर्गाणां प्रथमतृतीय पंचमा यणश्चाल्पप्राणा भवन्ति, वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणा इति। वर्णानां वर्गीकरणमिदं गुह्यतमम्। ऋते संस्कृताद्ध्येवं विधमन्यत्रोपलभ्यत इति निश्चितम्।

तदेवमकारात् सर्ववर्णोत्पत्तिर्व्याख्याता।

अकारप्रभृतीनां सर्वेषां ध्वनीनां मूलकारणमपि—आगमशास्त्रे विचारितम्। तत्र वसुविधशक्तयः[1], ताभ्यश्च नवविधनादाः[2], तेभ्यश्च वर्गनवक[3]-मिति क्रम उपलभ्यते।

तत्र

शान्ताम्बिकयोः शक्त्योः सामरस्यरूपा परा वाक्।
इच्छावामाशक्त्योः सामरस्यरूपा पश्यन्ती वाक्।
ज्ञानज्येष्ठयोः सामरस्यरूपा मध्यमा वाक्।
क्रियारौद्रीशक्त्योः सामरस्यरूपा वैखरी वाक्।

---

१. वामा, ज्येष्ठा, रौद्री, शान्ता, अम्बा, इच्छा, ज्ञानरूपा, क्रिया, इत्यष्टौ शक्तयः।

२. अविकृतः, शून्यः, स्पर्शः, बिन्दुः, ध्वनिः, नादः, शक्तिः, बीजाख्यः, आरब्धाख्य इति नवविधनादाः।

३. अवर्गः, कवर्गः, चवर्गः, टवर्गः, तवर्गः, पवर्गः, यवर्गः, शवर्गः, क्षवर्गः। 'क्ष' इति सर्वसंयुक्तवर्णप्रतिनिधित्वेन तस्यापि वर्गत्वमायाति।

इत्येवं योगिनीहृदयादौ स्पष्टं विवृतम्। अत्रायं निष्कर्षः—

सर्वेषां शब्दानामर्थानां च मूलकारणन्तु बिन्दुः, यस्माद् द्विविधा धारा-प्रचलति—ज्योतिर्धारा नादधारा च। तत्र ज्योतिर्धारायां कलाः तत्त्वानि भुवनानि चोत्पद्यन्ते। नादधारायान्तु वर्णाः मन्त्राः पदानि चेति। येषां च द्विविधधारापदार्थानां घनिष्ठः सम्बन्धः। कलानां वर्णैः, तत्त्वानां मन्त्रैः, भुवनानां पदैश्चेति। नादश्चायं ज्ञानस्यैव प्रसर इति ज्ञानाच्छब्दोत्पत्ति[1] र्या वाक्यपदीये हरिणा विवृता सा एतन्मूलैव।

आगमशास्त्ररहस्यमिदमाधिक्येन व्याख्यातुं न शक्यत इति दिङ्मात्रं प्रदर्शितम्। इत्थं चात्र ध्वनिक्रमोऽपि सिद्धः।

---

१. अथेदमान्तरं ज्ञा.. सूक्ष्मवागात्मना स्थितम्।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तत इति॥ ब्रह्मकाण्डम्। श्लो. ११३

षष्ठोऽध्यायः

भाषा-निष्पत्तिः

तत्र व्यवहारः प्रधानम्

शब्दानामुत्पत्तिरेतदवधि चिन्तिता। इदानीं तत्सन्निवेशरूपा भाषा विचार्यते। परस्पराभिप्रायप्रकटनसाधनीभूतः शब्दसमूहो भाषेत्युक्तं प्राक्। तत एव जगतः सर्वे व्यवहाराः प्रचलन्तीत्यप्युपदर्शितं तत्प्रत्यक्षम्। तस्माद् व्यवहाराय भाषा निष्पाद्यत इति प्रतीयते।

अयं च भाषया प्रचलितो व्यवहारप्रवाहो गतानुगतिकः। यथा कश्चिद् गृहीतशक्तिकः 'अस्माच्छब्दादयमर्थो बोध्य इतिवृत्तिको वृद्धः; गृहीतशक्तिकमन्यं युवानमादिशति "घटमानय" इति, स सत्वरं घटमानयति, तथा कुर्वन्तं तं पुनः स आदिशति घटमत्र स्थापय, पटं चानय' इति स तथा करोति। एतत्सर्वं तत्रस्थः कश्चिद् बालकः पश्यति; अन्वयव्यतिरेकाभ्यां च घट इत्यस्य कम्बुग्रीवादिमानर्थः; आनय, इत्यस्य च आहरणमर्थ इत्येवं निश्चिनोति। तदाप्रभृति यदा कश्चिद् "घटमानय" इत्युच्चारयति तदा स बालकः शीघ्रं घटमानेतुं प्रयतते। एवं व्यवहारतः सर्वत्र शक्तिं गृह्णाति सः, स्वाशयं च भाषया प्रकाशयतीति दृश्यते।

ईश्वर एवादिव्यवहर्ता

तत्रेदं जिज्ञास्यते यत् सर्गादौ व्यवहर्ता कः? यतोऽय भाषात्मको व्यवहारः प्राचलत्। यं च वयमद्याप्यनुसराम इति। तत्र पुराणैरिदं निर्णीयते यत्, स्वयम्भूरेवादिव्यवहर्ता; तेनैव भाषा प्रकटितेत्यादि। तथा चोक्तं महर्षिव्यासेन—

> अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
> आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः[1]॥ इति।

पुराणे स स्वयम्भूः शब्दब्रह्माख्यया समाख्यायते, यथा :—

> पूर्वस्यादौ परार्धस्य ब्राह्मो नाम महानभूत्।
> कल्पो यत्राभवद् ब्रह्मा शब्दब्रह्मेति यं विदुः[2]॥ इति।

---

१. महाभारतशान्ति० २३१. ५६।

२. श्रीमद्भाग० स्क० ३ अ० १२ श्लो० ३४।

हरिणापि तत एव शब्दब्रह्मणो जगतः प्रक्रियोद्घोषिता । तथाहि :—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ इति ।

एवमुपलभ्यमानवचनैः स्वयम्भूरेवादिव्यवहर्ता सिद्ध्यति । स एव स्वेच्छया जगत्पटमिमं प्रसारयति संकोचयति च ।

अतएव कर्तुमकर्तुमन्यथा कर्तुं समर्थः स इत्युच्यते ।

तद्व्यवहारप्रकारश्च ऋक्तन्त्रव्याकरणे शाकटायनेन स्पष्टमुक्तः । तद्यथा—

"इदमक्षरच्छन्दो वर्णशः समनुक्रान्तं यथाऽऽचार्या ऊचुः—ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्रायेन्द्रो भरद्वाजाय, भरद्वाजः ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यस्तं खल्विममक्षरसमाम्नायमित्याचक्षते । न भुक्त्वा न नक्तं प्रब्रूयाद् ब्रह्मराशिरिति[1] ।"

तदेवं यथाक्रममनुकुर्वन्ति सर्वे मनुष्या इत्यवगतं पुराणादिभिः । भाषाविज्ञानविवेचकोऽस्माकं यास्कश्चेत्थमब्रवीत् :—

साक्षात्कृतधर्माण ऋषयो बभूवुः, तेऽवरेभ्योऽसाक्षात् कृतधर्मभ्यः उपदेशेन मन्त्रान् संप्रादुः"[2] इति ।

अस्यायं भावः—

सृष्टिप्रलयौ हि यथाकालमत्र भवतः, तत्र प्रलये नहि सर्वात्मना सर्वं विलीयते, किन्तु बीजरूपेण किंचिदवतिष्ठते । तदुक्तं शतपथब्राह्मणे :—

'स होवाच अपीपरं वै त्वा, वृक्षे नावं प्रतिबध्नीष्व, तं त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीद् , यावद् यावदुदकं समवायात् , तावत् तावदन्ववसर्पासि इति, सह तावत् तावदेवान्ववससर्प, तदप्येतदुत्तरस्य गिरेर्मनोरवसर्पणमिति, औघो हताः सर्वाः प्रजाः निरुवाह, अथेह मनुरेवैकः परिशिशिष इति ।[3]

पुराणादावप्येवमेवोपलभ्यते । अस्तु, सुप्तप्रबुद्धस्येव ऋषीणां स्मरणं तत्राप्यनुमीयते । त एव चावरकालिकेभ्यो विज्ञानशक्तिविहीनेभ्यो मनुष्येभ्यो मन्त्रार्थान् प्रदत्तवन्तः । तत एव क्रमशः सर्वत्र भाषात्मको व्यवहारः प्राचलत् प्रचलति चलिष्यति चालयमिति वेदपुराणमर्मज्ञा जात्वपि श्रद्धावन्तः स्वीकुर्वन्ति ।

---

१. ऋक्तन्त्र० १. ४ । २. निरु० १. २० ।
३. शत० ब्रा० १. ८ ।

ईश्वरेच्छैव शक्तिः

अतएव जरन्नैयायिकाः ईश्वरसंकेतः शक्तिरिति मन्यन्ते। तन्मते 'अस्माच्छब्दादयमेवार्थो बोद्धव्यः' इत्यत्रेश्वरसंकेत एव कारणम्, नहि तत्संकेतं विना घटपटादस्य कम्बुग्रीवादिमानेवार्थ इति स्थिरीकर्तुं शक्यते। पित्राद्युच्चारिते पुत्रनाम्नि यद्यपीश्वरस्य संकेतो नास्ति साक्षात्, तथापि—

'एकादशेऽहनि पिता नाम कुर्यात्' इति श्रुतिस्वारस्यात् तत्रापि ईश्वर-संकेत एव, श्रुतयश्चेश्वरनिश्वासरूपा इति तदाशयः।

एवम् ईश्वरेच्छैव शक्तिः, तयैव च भाषात्मको व्यवहारो लोके सूपपद्यते।

वेदे एवेश्वरेच्छाशक्तिः

तत्र प्रत्ननैयायिकोक्तमीश्वरेच्छाशक्तिस्वरूपं खलु शास्त्रकारादिभिः संकेतितं नदी-वृद्धयादिपदम्, अपभ्रंशात्मकं गावी गोणी गोपोतलिकादिपदं च नाङ्गीकरोति, यतः साधुशब्द एवेश्वरेच्छाया विषयः न त्वसाधुशब्द इति तन्नसिद्धान्तः। तथा चार्थप्रतीतिरपि साधुशब्द एव सुलभा, असाध्वप-भ्रंशादिभ्यस्तु साधुशब्दस्मरणात् शक्तिभ्रमाद् वा बोध इति तेषां सुदृढो निश्चयः। तथा च तन्मते :—

ढोल्ला मइँ तु हुँ वारिया माकुरु दीहा माणु,।
निद्दए गमिहि रत्तडी दडवड होइ विहाणु॥

इत्यपभ्रंशश्लोकतः साक्षाद् बोधो न भवति, अपितु दुर्लभादिसाधुशब्द-स्मरणद्वारैव। एवं सति बालकानां कृषीवलानां च नापभ्रंशतोऽर्थप्रतीति-र्भविष्यति, यतो नहि तैः साधुशब्देषु व्यवहारतः शक्तिर्गृह्यत इति; किन्तु तथा न भवति, बोधश्च तत्राप्यपभ्रंशादनुभवसिद्ध एव।

एवं केवलमाङ्गलभाषाभाषिणः पाश्चात्त्याः मातृपितृस्वस्त्रादिसाधु-शब्दानजानन्तोऽपि मदर-फादर-सिस्टरादिशब्देभ्यस्तानेवार्थानवगच्छन्ति, तत्र कदा कथं शक्तिभ्रमः, साधुशब्दस्मरणं वा यतो बोधः? किं च सन्मात्रवि-षयिणी भगवदिच्छा कथमपशब्दान् जहाति साधुशब्दान् गृह्णाति चेत्यस्य न किमपि समाधानं युक्तियुक्तं मिलति। अतएव नव्यनैयायिकाः—इच्छैव शक्तिरिति मन्यन्ते। सा च शक्तिः वेदे ईश्वरेच्छात्मिका, आधुनिकसंकेते नाम्नि तु संकेतकर्त्रिच्छात्मिकेत्युभयविधा। तथा चैतन्मते ईश्वरेच्छैव शक्ति-रिति प्राचीनोक्तं वेदे सुरक्षितं भवति। सत्यमस्ति यद् वेद एव भगवतो मुखान्निःसृतः, तत एव सर्वेषां शास्त्राणां प्रभव इत्यभियुक्तव्यवहारात्।

ऐतिहासिकदृष्ट्यापि वेदस्यैव प्राचीनतमत्वं सिध्यति। संसारेऽस्मिन् ऋग्वेद एव सर्वस्मिन् पुस्तकमाण्डागारे सर्वप्रथम इत्युक्तमन्वेषकैः। तस्मात् ईश्वरेच्छात्मिका शक्तिस्तत्र सर्वतः सुसंगता भवति। अन्यत्र तु शिष्टव्यवहारात् तत्तच्छब्दानां तत्तदर्थेषु यथा शक्तिग्रहो जायते तथैव च बोधोऽपि। एक एव शब्दो देशभेदेन शक्तिभेदं प्रयोजयति। तदुक्तं महाभाष्यकृता—

शवतिर्गतिकर्म्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते 'शव इति, हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुंजते। दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु' इति।[१]

तदेवं 'घड़ा' गगर्यादिशब्देभ्योऽपि घटरूपार्थस्य बोधस्तथागृहीत शक्तिकानां जनानां भवत्येव। नहि तत्र साधुशब्दस्मरणस्यावसरः, नापि घटरूपार्थबोधके गगरीशब्दे शक्तिभ्रमः कस्यापि भवितुमर्हति स्वप्नेपि, साधारणधर्मविरहात्।

तस्मादाधुनिक भाषातोऽर्थबोधे आधुनिकाः शिष्टा एव प्रमाणम्, तद्व्यवहारत एव तत्तच्छब्देषु तत्तदर्थानां शक्तिग्रहो निश्चीयते।

वेदे तु भगवादिच्छैव प्रधानम्, तदिच्छयैव तथा बुध्यन्ते महर्षिभिः। तदुक्तं वाचस्पतिना—

सोऽयं वृद्धव्यवहारः साम्प्रतिकानां संकेतग्रहोपायः, सर्गादिभुवां तु महर्षिदेवतादीनां परमेश्वरानुग्रहाद् धर्मज्ञानवैराग्यैश्वर्यातिशयसम्पन्नानां परमेश्वरेण सुकर एव संकेतः कर्तुम्, तद्व्यवहाराच्चास्मदादीनामपि सुग्रहः संकेतः[२]" इति न्यायवार्तिकतात्पर्यटीकायाम्। तदेवं नव्यैर्मतं समीचीनमेव। वेदभाषैव पूर्वं जगति प्रादुर्भूता, अन्यास्तु भाषाः तदपभ्रंशरूपाः क्रमेण प्रवृत्ता इति भारतीयशिष्टैः परिगृहीते मते ईश्वरेच्छानुसरणेनैव क्रमेण सर्वो व्यवहारः सिध्यतीति सुनिष्पन्नमेव। तेन सर्वादिभूते शब्दव्यवहारे न काप्यनुपपत्तिरिति।

अपभ्रंशादपि साक्षादर्थबोधः

शाब्दिका अपि नवीननैयायिका इव विनापि साधुशब्दस्मरणात् शक्तिभ्रमाद् वा अपभ्रंशाद् बोधमनुभवन्ति। तदुक्तं पस्पशाह्निके भगवता पतंजलिना—

"समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते, शब्देनैवार्थोऽभिधेयो नापशब्देनेति; एवं क्रियमाणमभ्युदयकारि भवतीति"

---

१. पस्पशाह्निकमहाभाष्यम्। २. न्या० वा० तात्पर्य० २. १. ५५।

एतेन साधुशब्दप्रयोगे धर्मः अभ्युदयश्च भवति, असाधुशब्दप्रयोगे चाधर्मः, बोधस्तूभयत्र समान इति सूच्यते। साधुशब्दप्रयोगात् पुण्यम्, असाधुशब्दोच्चारणाच्च पापमित्युक्तं वैयाकरणभूषणसारेऽपि। तद्यथा—

वाचकत्वाऽविशेषेऽपि नियमः पुण्यपापयोः[1]। इति

तदित्थं शाब्दिकनैयायिकयोरपभ्रंशात् साक्षादर्थबोधे मतैक्यमुपवर्णितम्।

पदार्थान्तरं शक्तिः

शक्तिस्तु शाब्दिकमते पदपदार्थयोः संबन्धान्तरम्, न क्लृप्तपदार्थान्तर्भूतेति शेषः। इच्छायाः शक्तित्वस्वीकारे सम्बन्धत्वं तस्या न स्यात्, सम्बन्धपदभाक् स एव भवति य आधाराधेयभावनियामकत्वेन दृष्टः स्यात्। उक्तं हि सम्बन्धविषये "सम्बन्धो हि सम्बन्धिभ्यां भिन्न उभयाश्रितः" द्विष्ठः सम्बन्धः विशिष्टबुद्धिनियामकश्चेति। यथा घटवद् भूतलमिति संयोगरूपसम्बन्धः सम्बन्धिभ्यां भिन्नः, घटभूतलेत्युभयनिष्ठः; घटनिरूपितसंयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकश्च, इच्छाया आश्रयस्तु समवायसम्बन्धेनात्मैव, यद्यपि विषयतासम्बन्धेन शब्दे अर्थे च शक्तिस्तिष्ठतीति आश्रयत्वमुपपादयति, तथापि विषयताया वृत्तिनियामकत्वं न क्वापि व्यवहारे दृष्टम्, ज्ञानवान् घट इत्यादिव्यवहारस्य क्वाप्यदर्शनात्। अत एव च अयं शब्दः, अयमर्थो वा इच्छावानिति प्रतीतिरपि न कदाचित्।

तस्मात् शब्दार्थोभयनिष्ठवाच्यवाचकभावरूपसम्बन्ध एव शक्तिः सिद्ध्यति। सा च नित्यैव, तदुक्तं महाभाष्ये: 'सिद्धे शब्दार्थसम्बन्धे'[2] इत्यादिना।

'तस्य वाचकः प्रणवः'[3] इति पातंजलसूत्रभाष्ये—स्थितोऽस्य वाच्यस्य वाचकेन सम्बन्धः, संकेतस्तु ईश्वरस्य स्थितमेवार्थमभिनयति, यथाऽवस्थितः पितापुत्रयोः सम्बन्धः संकेतेनावद्योत्यते 'अयमस्य पिता अयमस्य पुत्रः' इत्युक्तम्।

एतेनापि ईश्वर एव प्राथम्येन व्यवहारकर्तृत्वं निष्पन्नते। अस्तु, शक्तिर्नित्या वा अनित्या, इच्छारूपा, बोधजनकतारूपा वेति नेह विस्तरेण विचार्यते अप्रकृतत्वात्। अथ यदि स्वयम्भुवो ब्रह्मणः साक्षाद् मनुष्यसम्बन्धः व्यवहारप्रवर्तनं च न बुद्धावुपारोहतीत्याक्षिप्यते, तर्हि तदर्थं श्रीमदुदयना-

---

१. वैयाकरणभू० शक्तिनि० का० ३८। २. पस्पशाह्निकमहाभाष्यम्।
३. पात० सू० २७।

चार्येणापि कुसुमाञ्जलाविदं प्रतिपादितं यत् स्वशक्त्या जगदीश्वरः स्वयं प्रयोजकवृद्धप्रयोज्यवृद्धरूपेणाविर्भूय स्वकीयेन व्यवहारेण मनुष्यान् शिक्षयतीति।

तदित्थम् ईश्वरवादिनां भारतीयशिष्टानां सिद्धान्त उपदर्शितः।

भाषासिद्धौ विकासवादः

ये तु जगत्कारणतया ईश्वरं नाभ्युपगच्छन्ति, अभ्युगच्छन्तोऽपि वा लोकव्यवहारे सर्वमीश्वरशिरस्येव पातयितुं न संनद्धा भवन्ति; तेषाम्मतेनापि भाषाव्यवहारारम्भः चिन्त्यते।

तत्र शब्दाः खलु प्रकृतनियमानुसारेण प्रादुर्भवन्तीति परादिनिरूपणे निरूपितम्। प्रकृतनियमाङ्गीकारेऽपि संस्कारविशेषाद् ज्ञानाधिक्यादेव वा मनुष्याणां शब्दा व्यक्ताः वर्णरूपा जायन्ते, अन्येषां पक्षिपश्वादीनां तु अव्यक्ता एव, नहि तत्र वर्णाः स्पष्टं श्रूयन्ते। अतएव मनुष्यास्तेभ्योऽर्थानवबोद्धुं न प्रयतन्ते। अर्धबोधस्तु वर्णात्मकशब्देभ्य एव समीचीनं भवतीति दृश्यते। यद्यपि पश्वादीनां परस्परं व्यवहारस्तेभ्य एवाव्यक्तशब्देभ्यो जायत इत्यपि सत्यम्, परं स चेष्टादिभिरेव केवलं नानुमानेनैव। अतीतानागतवर्तमानप्रवृत्तिनिवृत्त्यादिविचारकाश्च मनुष्या एवेति। भाषाविचारयोश्च नित्यसम्बन्ध इत्यविस्मरणीयमेव, अतएव स्वविचारप्रकटनाय भाषैवालम्ब्यते जनैरित्येवं विचारमनुगच्छति भाषा, विचारा एव च भाषारूपेण परिणमन्तीत्युपदर्शितं प्राक्।

इयं च विचाराणां भाषारूपेण परिणतिः विकासवादसिद्धान्तानुसारेण क्रमेण भवति। आधुनिका अपि परस्पराभिप्रायप्रकटनलालसया जनाः हर्षशोकादीनां सूचकान् ध्वनीन्, पक्ष्याद्यनुकरणशब्दान् वा वक्तुमारभन्ते, तदेव भाषाबीजं भवतीति मन्यन्ते। तथाहि—

डा० मङ्गलदेवशास्त्रिप्रभृतिभिः स्वकीये भाषाविज्ञाने भाषोत्पत्तिप्रकरणे भारतीयमतं पाश्चात्त्यविभिन्नमतं च समालोचितम्। तत्र सिद्धान्तितमिदमेव यत् यथा वस्तूनां क्रमिको विकासः, तथैव भाषाया अपीति। नहि सहसा सदननिर्माणं वस्त्रनिर्माणं वा अभूत् प्राक्, किन्तु कन्दरां गुहां, कुंजं वाऽधिवसन्तः वल्कलानि धारयन्तश्चादिमानवा यथाक्रमं सदनानि मन्दिराणि, वस्त्राणि च रचयामासुः, एवं बहुदिनं यावत् तेषां भाषां विनैव व्यवहारः, पश्चाच्च भाषयेति। तत्र 'काक-इति शब्दानुकृतिस्तदिदं शकुनिषु बहुलम्' इति मतमनुसृत्य अनुकरणाद् भाषा निष्पाद्यते। एतादृशा एव शब्दाः पूर्वं बभूवुः, ततश्च भाषेति।

अपि च 'हाहा' 'अहह' इति हर्षोद्वेगाभ्यां स्वभावतः प्रथमं केचन ध्वनयः प्रादुर्भूताः, तदनु तेभ्यो वर्णात्मकशब्दसमूह इति । अस्तु प्राथमिकात् शब्दानुकरणात्मकशब्दाद् मनोरागव्यंजकाद् वा भाषा, पुनरपि पारस्परिको व्यवहारस्तत्राप्यपेक्ष्यते; नहि 'काउ' 'काउ' इति पक्षिणः शब्दान् श्रुत्वा 'अहह' 'हाहा' वेति शब्दानुच्चार्य पुरातनमानवा विरता बभूवुः, किन्तु तथैव पौनः पुन्येन परस्परं व्यवहारं चक्रुस्ततश्चाभ्यासाद् भाषानिष्पत्तिरित्येवमनुमातुं शक्यते ।

तत्रेदं मतम्

परं यावत् प्राकृतं साधनं किमपि पश्वादिवैशिष्ट्येन नाभ्युपगम्यते तावदिदमनुकरणादि निरालम्बमेव तिष्ठति, न च भाषोत्पत्तिः सुसुखं हृदयमारोहति । तत एव परा-पश्यन्त्यादिवागनुक्रमणे यत् प्राकृतं साधनं भारतीयेषु शास्त्रेषु निरूपितं तदभ्युपगन्तव्यमेव ।

समुदायः पश्वादीनामपि भवति, तेऽपि मिलिताः संघशस्तिष्ठन्ति, परस्पराभिप्रायबोधनलालसा तेषां न भवतीत्यपि न वक्तुं शक्यते, तादृशलालसायाः प्राणिमात्रे जागरूकत्वादिति । अथापि तेषु शब्दव्यवहारो न प्रचलति, मनुष्येषु केवलं प्राचलदित्यत्र कोऽपि हेतुरवश्यं वक्तव्यः । ज्ञानविकास एव तत्र हेतुर्भवति नान्यः कोऽपि वक्तुं शक्यते । ईश्वरदत्ता, प्राकृतिकी वा ज्ञानशक्तिर्मनुष्येषु विकसति, सैव प्राकृतेन क्रमेण शब्दव्यवहारनिष्पादिका भवतीति न केनाप्यपलपितुं शक्यम्, अतएव भगवत्या श्रुत्यापि ज्ञानाधिष्ठातुरिन्द्रस्य वाग्व्याकरणकर्तृत्वं सम्यगुद्घुष्टमित्युपदर्शितं वागुत्पत्तिप्रकरणे । अतएव च पश्वाद्यपेक्षया मनुष्याणां वाक् संस्कृता मन्यते अर्थबोधोपयोगिसंस्काररूपस्य व्याकरणस्य तत्राहितत्वात् ।

यत्तु मनुष्यसमाजाद् बहिष्कृतः अरण्यपालितः कोऽपि बालः किमपि वक्तुं न शक्नोति, तेन प्राकृतिकत्वम् ईश्वरदत्तत्वं वा वाचो न सिध्यति, अपितु समाजस्य तत्र कारणता स्फुटीभवति इत्याक्षिपन्ति । तत्रेदानीन्तने युगे शक्तिग्रहस्य यानि कारणानि तानि तस्य बालस्यानुपस्थितानीत्येव समाधानं युक्तं स्यात्, नहि सृष्ट्यारम्भे यद्यथा भवति तत्तथाऽद्यापि भवतीति केनाप्यभ्युपगन्तुं शक्यम् । सृष्ट्यारम्भे वानरा गोरेलादिक्रमेण मनुष्यतामापद्यन्त इति विकासवादिनां सुप्रसिद्धो घण्टाघोषः । परं नाद्य कोपि वानर एवं मनुष्यतामाप्नुवन् दृष्टिचरो भवति, अन्येष्वपि पश्वादिषु यथा क्रमिको विकासो विकासवादिभिर्मन्यते, न तथाद्य कुत्रापि दृश्यते ।

तस्मात् सर्गादौ यथा विकासक्रमः स इदानीं व्यवहारबहुले जगति प्रकारान्तरतामापद्य तिरोहित इव भवतीति सर्वैरभ्युपगन्तव्यमेव। ईदृशा विकासा बहुकालसाध्या भवन्तीति अल्पजीविभिर्मनुष्यैर्न द्रष्टुं शक्या इत्यपि तुल्यमेव। यदि पद्यादिना बहुकालसाध्याः क्रमिका विकासा नाल्पजीविभिर्मनुष्यैर्द्रष्टुं शक्याः, तर्हि प्राकृतिकं वाग्विकासं कथमनेनैव कालेन अरण्यस्थे बालके द्रष्टुमिच्छन्तीति स्वयमेव विचारयन्तु।

तस्मादिदानीन्तु उपायसाध्य एव शक्तिग्रहः। तथा च उपायः शास्त्रेषु प्रदर्शितः—

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।

वाक्यस्य शेषाद् विवृतेर्वदन्ति सांनिध्यतः सिद्धपदस्य वृद्धाः। इति; तत्र 'भू सत्तायाम्' 'वर्तमाने लट्' इत्यादि वचनैः धातुप्रत्ययादीनां शक्तिग्रहो व्याकरणात्, पुष्पवन्तशब्दस्य च सूर्यचन्द्रे 'एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ 'इति कोषात्, एवमुपमानाप्तवाक्यादिभिरपि। तत्रापि प्रथमं व्यवहारत एव शक्तिग्रहो जायते तदपेक्षयैव—व्याकरणादिभिरित्यवधेयम्। तदुक्तं शब्दशक्तिप्रकाशिकायामपि :—

संकेतस्य ग्रहः पूर्वं वृद्धस्य व्यवहारतः।
पश्चादेवोपमानाद्यैः शक्तिधीपूर्वकैरसौ ॥[1] इति।

तदेवं सुप्तप्रबुद्धन्यायेन सर्गादावुत्पन्नानां जनानां पूर्वकल्पव्यवहारस्मरणेन भाषादिव्यवहाराः प्रवर्तन्त इति भारतीयानां मतम्।

उत्पन्ना मनुष्याः स्वयमेव व्यवहारेषु दक्षा भवन्ति, क्रमेण च शब्दानप्युच्चारयितुं प्रगल्भन्त इत्याधुनिकानां मतम्।

उभयत्रापि ईश्वरदत्ता प्राकृतिकी वा ज्ञानशक्तिः समानरूपेणाभ्युपगन्तव्यैव भवति, अन्यथा व्यवस्थानोपपद्यत इति संक्षेपः।

तदेवमीश्वरवादिनां व्यवहारे ईश्वरसम्बन्धमनभ्युपगच्छतां च मतेन भाषानिष्पत्तिक्रमश्चिन्तितः।

---

१. नामप्रकरणम् कारि० २०।

सप्तमोऽध्यायः

भाषाभेदः

तत्रार्वाचीनरीतिः

परापश्यन्तीमध्यमावैखरीरूपेणान्तरिको वाग्भेदः प्राङ् निरूपितः। अस्मिन्नध्याये भाषाभेदः अर्थाद् वैखरी वाग् विभेद उपस्थाप्यते। परस्परमाशयविनिमये भाषणे चेयमेवाधिकमुपयुज्यत इति भाषापदं साक्षाल्लभते। अस्तु! भाषाः संसारेऽस्मिन् साम्प्रतमनेकधा समुपलभ्यन्ते। एकस्मिन्नेव देशे भाषाबाहुल्यमुपलभ्यते। तत्रापि प्रान्तोपप्रान्तस्थानादिभेदेनैकस्या एव भाषाया विभाषोपविभाषारूपेण बहवः शाखाः संभवन्ति। तासां सर्वासां भाषाणामस्मिन् निबन्धे विवेचनमनपेक्षितम्, अप्रकृतत्वात्। अतः केवलमर्वाचीनभाषाविचारकाणां मतमाधारीकृत्य संक्षेपतस्तावत् तद् भाषावर्गव्यवस्था विचार्यते। तत्र आकृतिमूलकं पारिवारिकं चेत्युभयथा वर्गीकरणं बोभूयते। एकत्र समानपदसन्निवेशविशेषरचनापेक्ष्यते, अपरत्र च मनुष्यगोत्रवद् भाषागोत्रम्, भाषामूलमिति यावत्।

आकृतिमूलकं वर्गीकरणम्

तत्र समानपदसन्निवेशविशेषरचनाद्वारा भाषाः वर्गद्वये विभज्यन्ते। तत्र काश्चिदयोगात्मिकाः, अन्याश्च योगात्मिका इति। अयोगात्मिकासु भाषासु तावदिदं दृश्यते यत् सर्वे शब्दाः सर्वत्र स्वार्थबोधने स्वतन्त्रा भवन्ति। नहि शब्दान्तरसन्निवेशे वाक्यस्थः कश्चिच्छब्दो जात्वापि विकृतिं लभते। क्रियासंज्ञादिशब्दानां परिचयो वाक्य एव भवति नान्यत्र। किं चेदमपि दृश्यते यदेक एव शब्दः कदाचित् संज्ञारूपेण कदाचिच्च क्रियारूपेणाप्यवतिष्ठते। अत्र चीनी, तिब्बतीप्रभृतयो भाषा एव समायान्ति। तथाहि चीनीभाषायाः 'न्गोतानी' इत्येकं वाक्यमस्ति। एतदर्थस्तु क्रमशः संस्कृतवाचि 'अहं हन्मि त्वाम्' इति भवति। इदमेव वाक्यं यदि व्यत्ययेन 'नीतान्गो' रूपेण पठ्यते तदा 'त्वं मां हंसि' इत्यर्थोऽपि तेभ्य एव परिगणितशब्देभ्योऽवगम्यते। न च प्रत्ययः नवा काचिद्विभक्तिरत्रार्थान्तरे दृश्यते। सर्वे शब्दा यथापूर्वं सन्ति, केवलं व्यत्यासमात्रम्।

तथा च नहि विभक्तिप्रत्ययादीनां योगः सम्बन्ध इत्ययोगात्मकभाषावर्गः कथितः।

योगात्मकभाषावर्गे सामान्यतः समासप्रधानाः प्रत्ययप्रधाना विभक्तिप्रधाना इति त्रिधा भाषाः संमिलन्ति, तत्र समासप्रधाना भाषा अतीव संश्लिष्टाः संलक्ष्यन्ते। तद्वाक्येभ्यः पदानां पृथक्करणं दुःसाध्यं भवति। अत्राधिक्येन अमेरिकाख्यदेशस्य सर्वा भाषा अन्तर्भवन्ति। उदाहरणार्थमेकं वाक्यमत्र प्रस्तूयते—'नाधोलिनिन्' इति। एतदर्थो हि 'अस्माकं कृते नावमानय' इति। डा० बाबूराम सक्सेनामहाशयानां विवेचनानुसारेणात्र पदविभागस्तु "नतेन्", "आमोखोल्" "निन्"[1] इत्येवं भवति। क्रमशः "नतेन्" इत्यस्यानयनमर्थः "आमोखोल्" वाचकश्च नौशब्दः "निन्" इत्यस्यास्माकं नः अर्थ इति।

तदेवं समासप्रधानभाषावर्गो विवेचितः।

प्रत्ययप्रधानभूतभाषा अश्लिष्टा भवन्ति। अत्र प्रकृतिप्रत्ययभागः सदा प्रत्यक्षरूपेणैव विराजते। एतद्वर्गान्तर्भूताः तुर्की-द्राविड़प्रभृतिभाषा विद्यन्ते। तत्र तुर्कीभाषाया गृहवाचकः 'एव' शब्द एवोपर्युक्तमर्थं प्रमाणयति। तथाहि बहुत्ववाचकात् "लेर" प्रत्ययसंसर्गात् "एवलेर" इति दशायां गृहबाहुल्यं ब्रवीति। पुनश्च "इम" प्रत्ययसन्निवेशात् "एवलेरिम" इत्येवंभूतः शब्दो 'मम गृहा' इत्येतदर्थं ददाति। एतत्सर्वं च प्रत्ययप्रत्यक्षदशायामेव भवति न तु प्रत्ययाप्रत्यक्षदशायामिति। तदेवंघटकीभूतभाषाः प्रत्ययप्रधानवर्ग एव निपतन्ति।

विभक्तिप्रधानाः खलु भाषाः श्लिष्टाः संजायन्ते। प्रकृतिप्रत्यययोः पूर्णतः समाहार एवैतद्वैलक्षण्यमालक्ष्यते। नहि प्रत्ययप्रधानभाषावद् विभक्तिरूपप्रत्ययानां सर्वतः पृथगदर्शनमत्र। संस्कृतभाषा, "अरबी" प्रभृतयो वा भाषा एतद्वर्गे संगच्छन्ते। संस्कृते कुत्रचित् प्रत्यया एव प्रकृतिमाचामन्ति, यथा "अधुना" 'इयान्' इत्यादौ। प्रकृतयश्च प्रायः सर्वत्र प्रत्ययान् क्रोडीकुर्वन्ति, नहि "नमः शिवाय" इत्यत्रोपर्युक्त "एवलेर" शब्दवत् प्रत्ययः स्पष्टं संलक्ष्यते।

एवम् अरबीभाषाया लेखनार्थक "कतब्" धातोः केवलं स्वरसंसर्गात् "किताब" "कुतुब्" "कातिब" इत्येवंविधाः शब्दा निष्पाद्यन्ते।

तदेवं विभक्तिप्रधानभाषावर्गो व्याख्यातः।

"अत्रान्तर्मुख-बहिर्मुख-विभक्तिप्राधान्यमिति भेदं कृत्वा" सेमेटिकादिपरिवारस्य भाषा अन्तर्मुखविभक्तिप्रधानभाषावर्गे समायान्ति। "भारोपीय" परिवारस्य च बहिर्मुखविभक्तिप्रधानभाषा भवन्तीति

१. सा० भाषावि० पृ० १२२।

विविनक्ति। पारिवारिकवर्गे चानुपदमेतत् पारिभाषिकं नामरहस्यमुद्घाटयिष्यते।

तदित्थं संक्षेपेणाऽऽकृतिमूलकं वर्गीकरणं विवेचितम्।

पारिवारिकं वर्गीकरणम्

अथ पारिवारिकवर्गीकरणस्यापि परिचयो यथा संक्षेपमिह दीयते। तत्र समुपलभ्यमानसमस्तभाषाणां कानिचिदेवादिस्रोतांसि सन्तीति तैः साकं तासां सम्बन्धः स्थाप्यते। सम्बन्धस्थापने तच्छब्दार्थसारूप्यं यथा संभूतं स्थानसामीप्यमपेक्ष्यते। यथा च यत्र यासां भाषाणामेवंभूतः सम्बन्धो जागरूको दृश्यते तत्र तासां मूल एकैव भाषा, तत एव समयानुसारेण विभिन्नभाषाः समुदपद्यन्त इति विचार्य परिवारद्वारा भाषा विभज्यन्ते। तत्र भाषासारूप्यमहिम्ना जगतश्चत्वार्येव खण्डानि भवन्ति। तत्रैकम् अमेरिकाखण्डम्, द्वितीयं प्रशान्तमहासागरखण्डम्, तृतीयम् अफ्रीकाखण्डम्, तुरीयं च यूरोप–एशियाखण्डम्, एतत् प्रचलितन्नामोच्चारणलाघवाद् "यूरेशिया" खण्डमिति। एषु चतुर्षु खण्डेषु सापेक्ष्यशब्दार्थसारूप्यमपेक्ष्यानेकविधोऽवान्तरपरिवारः परिकल्प्यते। तत्रापि पूर्वोक्तभाषोपभाषास्थानीयभाषाभेदेन बहवो भेदाः क्रियन्ते। तत्रोक्तामेरिकादिखण्डत्रयपरिवाराणां विवेचनमत्र केवलं निबन्धपरिवर्धनं प्रयोजयिष्यतीत्युपेक्ष्योदाहरणायैकं यूरेशियाखण्डमेव संगृह्यते। इदं हि खण्डं सर्वतः परिपूर्णम्। प्राचीनतमं वाङ्मयस्वरूपं च सुरक्षितं समुपलभ्यतेऽस्मिन्नेव खण्डे। विपश्चितां भाषाविषयकमनुसन्धानं सर्वतः प्रथममत्रैव जातम्। तत् प्रमुखपरिवारास्तु "यूराल–अल्ताई" चीनी, द्राविड़, काकेशस, सेमेटिक, भारोपीय-नाम्ना सुप्रसिद्धाः। तत्र "यूराल-अल्ताई" वर्गस्य प्रत्ययप्रधानभाषा भवन्तीति तुर्कीभाषायाः "एवलेर" प्रभृतयः शब्दा एव प्रमाणमिति प्रागुपात्तम्। "चीनीवर्गस्य" द्वितीयं नाम "एकाक्षरवर्ग" इति। अत्र "अनामी" 'स्यामी" तिब्बती, चीनी, प्रभृतयो भाषा अन्विताः सन्ति। एतद्वैशिष्ट्यमपि "न्गोतानी" इत्युदाहरणद्वारा परिलक्षितं पूर्वम्। नह्येतद् वर्गीयशब्दा अर्थप्रत्यायनाय प्रत्ययकुलं गच्छन्ति, अपितु मूलभूतैकाक्षरशब्देन स्वार्थान् जनयन्ति। अतएव "एकाक्षरवर्ग" इति नामापि जातमिति ज्ञायते।

"द्राविड़वर्गस्य" च निखिला भाषा भारतस्य दक्षिणभागमध्यासते। एतद्वंशीयाः प्रायः प्रत्ययप्रधानभाषाः संजायन्ते। विशेष्यविशेषणवाचकपदयोः समानवचनकत्वनियमं नाङ्गीकुर्वन्तीमाः। अनेकाक्षरात्मकशब्दप्राधान्यमत्रेति।

पूर्वोक्तप्रत्ययप्राधान्यमावहन्ति किल "काकेशस"-कुलस्य भाषाः, अतश्च संयोगप्रधानाः। अस्मिन् कुले स्थानीयभाषाः ("बोली" इति हिन्दी भाषायां) बहु विद्यन्त इति।

'सेमेटिक' सामी वेति वर्गान्तर्भूतभाषा अरबीप्रभृतयः सन्ति। वक्ष्यमाणभारोपीयवर्गेण साकमस्य कुलस्य सम्बन्धः स्थाप्यते। वर्गयस्यैतस्याशेषा भाषा एकस्या एवादिभाषातो जनिमलभन्तेति। पुनरपि सामीवर्गे अक्षरत्रयात्मकधातूनां प्रचारः, भारोपीय कुले च न तथा। प्रायस्तत्रैकाक्षरात्मकधातवः समुपलभ्यन्ते। एवमन्तर्विभक्तिप्राधान्यं चोभयत्रभेदप्रतीतिमवगमयति। तदुक्तं प्राक् "कुत्व" धातोः "किताब" कुतुब इत्यादि शब्दनिष्पत्तिस्वरूपेण।

तदेवं वर्गद्वयव्यवस्थास्थापनं युक्तमिव भातीति भारत-यूरोपीय-बोधको भारोपीय-शब्दः। एतद्वर्गीयभाषाः परस्परं विशेषेण साम्यं दधति। सर्वत्र प्रत्ययाः परत्वेनोपयुज्यन्ते। एक एव शब्दोऽर्थवशादत्र प्रत्ययकुलं गत्वा विभिन्नरूपेणावतरति। यथा रामशब्दः प्रत्ययप्रभावादेव 'रामः रामौ रामाः' इत्येवंभूतानि नानारूपाणि धारयति।

किंचैतद्वर्गविशिष्टभाषाः संश्लिष्टाः प्राक्, क्रमेणाश्लिष्टा भवन्तीत्युच्यते। ततु "वाग्वै पराच्यव्याकृतावदत्" इति श्रुत्या प्रतिपादितमस्माभिः प्रागेव। वर्गश्चायं वर्णविशेषाद् द्विधा विभज्यते। तत्र "शतम्" वर्गः प्रथमः, "केन्टुम्" वर्गश्च द्वितीयः। प्रथमवर्गे ता एव भाषा आनीयन्ते यत्र शतसंख्यावाचकशब्दे शकार (सकार) ध्वनिः श्रूयते। एवं केन्टुम्-वर्गे ककारध्वनिः कवर्गध्वनिर्वेति। तथा च "आर्येरानी" प्रभृतयो भाषाः शतम्-वर्गे, यवनानी-जर्मनी-प्रभृतयश्च केन्टुम्-वर्गे संभान्ति।

तदित्थम् अर्वाचीनभाषाविवेचकानां मतमवलम्ब्य भाषाणां वर्गीकरणं विचारितम्।

एवमन्येऽपि बहव उपायाः कल्पिताः सन्ति। ते चेह नोपन्यस्यन्ते, एतन्निबन्धीयविषयत्वाभावात्। "संस्कृत-भाषाविज्ञानम्" इति निबन्धनाम, नहि संस्कृतवाङ्मये एवंभूतं वर्गीकरणं कुत्रापि समुपलभ्यते।

संस्कृते भाषाभेदः

संस्कृते तु भेदा एवमुपलभ्यन्ते। तत्र तावदिदं सर्वसंमतत्वेन निर्धारितं यज्जगति समुपलभ्यमानसमस्तप्राचीनतरग्रन्थेष्वतिप्राचीनतमो ऋग्वेद एव। तस्य कैश्चित् मन्त्रैस्तस्मिन्नेव काले भाषाभेदः प्रारंभः, किंवा विशुद्धभाषायां

तद्यथा—

इमे येनार्वाङ् न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः।
त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः ॥[1]

अस्यायं भावः—

इमे ये अविद्वांसः अर्वाक् अर्वाचीनमधोभाविन्यस्मिन् लोके ब्राह्मणैः सह न चरन्ति, ये परः परस्ताद्देवैः सह न चरन्ति, ते ब्राह्मणासो ब्राह्मणा वेदार्थतत्परा न भवन्ति, तथा सुतेकरासः "सोमं सुतमभिषुतं कुर्वन्तीति सुतेकरा" ऋत्विजः तेऽपि न भवन्ति, अप्रजज्ञयः अविद्वांसः त एते मनुष्याः वाचं लौकिकीम् अभिपद्य प्राप्य, तया पापकारिण्या वाचा युक्तास्ते सिरीः सीरिणः कर्षका भूत्वा तन्त्रं कृषिलक्षणं, तन्वते विस्तारयन्ति। तथा च कृषीवलानां वाचि मन्त्रवागपेक्षया किंचिन्न्यूनत्वमुपलक्ष्यते। तेषां सम्यगुच्चारणं नाजायत, अतोऽपशब्दबाहुल्यमिति। अतएव च—

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते, भद्रेषां लक्ष्मीर्निहिताधिवाचि ॥[2]

इति मन्त्रेण विद्वांसोऽपशब्देभ्यो विविच्य सुशब्दादेव ब्रुवतेस्मेत्युच्यते। यथाहि दृश्यते लोके सतुषं सक्तुं तितउना—चालिन्या विशोध्यते, एवमत्रापि मनीषिभिः अपशब्देभ्यः सुशब्दाः पृथक्क्रियन्ते।

तदेवं विशुद्धवाचि दोषप्रसक्तिरवगम्यते तदेति।

दैवीभाषा मानुषीभाषा च

इदं च ब्राह्मणग्रन्थेष्वप्युपलभ्यते स्पष्टरूपेण। तत्र हि दैवी मानुषीभेदेन भाषाभेदः क्रियते' तद्यथा—"शर्मासीति मन्त्रस्य ब्राह्मणे" चर्म वा एतत् कृष्णस्य तदस्य तन्मानुषम् शर्मदेवत्रा तस्मादाह शर्मासीति।[3]

किंच "स यदिदं पुरा मानुषीं वाचं व्याहरेत्, तत्रो व्वैष्णधीमृचं वा यजुर्व्वा जपेत्[4] इत्येवमादिभिर्वैदिकवचनैः प्राक्काले भाषाद्वयसत्तेति ज्ञायते। सहैवेदमप्यवगम्यते यदेकस्या देवभाषाया यज्ञादिकाले व्यवहारो नतु मानुष्या वाच इति। यदि प्रमादात् कश्चित्तत्र मानुषीं भाषां व्यवहरेत् तदा दोषभाग् भवेदिति। अत्र विचारेणेदं प्रतीयते यद्वैदिकी भाषा, दैवीभाषेत्युच्यतेस्म या तु ततः किंचिद्भेदमापन्ना व्यावहारिकी भाषा "यामद्यत्वे संस्कृत-

---

१. ऋग्वे० अ० २ व० २४ म० १० सू० ७१।
२. ऋग्० अ० २ व० २३ मं० १० सू० ७१।
३. शत० ब्रा० कां० १ ब्रा० ४। ४. शत० ब्रा० कां० १ ब्रा० ४।

मिति व्यवहरन्तिस्म लोकाः" सा मानुषी भाषेत्युच्यतेस्म । अद्य तु द्वयीमपि वयं देवभाषेत्येव वदाम इत्यन्यदेतत् ।

अथ प्रकृतिसिद्धादुच्चारणदोषात् तत्रोभयत्रापि अपभ्रंशा आपतन्तिस्म । तदेतदुच्यते—महाभाष्योद्धृतश्रुतिभिः—

"तेऽसुरा हेलयो हेलय इति कुर्वन्तः परा बभूवुस्तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै, म्लेच्छोहवा एष यदपशब्दः[१] । इति ।

तदेवमतिप्राचीनकालादेवोच्चारणभेदाद् भाषाभेदः समुपलभ्यते ।

वस्तुतस्तु भेदोऽयमवान्तरः, न तु मौलिकः । न हीदानीं यथा संस्कृत, ग्रीक, लेटिन, प्रभृतिषु भाषासु पारस्परिको भेदो दृश्यते तथा तयोर्वैदिक-लौकिकयोर्भाषयोरिति । इयमेव भाषाद्वयीधारा निरुक्तकृत्यास्कपर्यन्तम् पाणिनिपर्यन्तं च प्रवहन्ती दृश्यते । तदेतद् भूयसा आह यास्कः "नेति प्रतिषेधार्थीयो भाषायाम्" "उभयमन्वध्यायमित्यादि" । अत्राध्यायपदेन वैदिकी भाषा गृहीता, "भाषा" पदेन च लौकिकी । किंच प्राह पाणिनिरपि-"चतुर्थ्यर्थे बहुलं छन्दसि[२] "प्रथमायाश्च द्विवचने भाषायाम्"[३] भाषायां सद-वशश्रुवः[४] इत्यादि । तदेवं छन्दस्त्वं भाषात्वं चेति वाचोभागद्वयं जातम् ।

उभयोर्भाषयोरेकत्वम्

इदं च भागद्वयं न वस्तुतो भाषाभेदप्रयोजकम्, अपितु एकस्या एव भाषाया अवान्तरौ द्वौ विभागाविति स्पष्टं शक्यते वक्तुम् । यथा ह्यद्यत्वे-ऽपि एकैव हिन्दी भाषा विभिन्नेषु देशेषु बहून् भेदान् विगाहते । यथा वा पद्येषु निबद्धा हिन्दी भाषा, व्यवह्रियमाणहिन्दीभाषापेक्षया किंचिद्वै-लक्षण्यं भजत एव । आङ्ग्लभाषादिष्वपि पद्यभाषापेक्षया गद्यभाषायाम्, ग्रन्थभाषापेक्षया च परस्परव्यवहारभाषायां वैलक्षण्यं स्पष्टमनुभूयत एव । तथापि न भाषाभेदो व्यवह्रियते, अपितु एकस्यामेव भाषायां तेऽवान्तरभेदा संमान्ति । तथैव पूर्वस्मिन्नपि काले वैदिकव्यावहारिकभाषयोरवान्तरं वैलक्षण्यं भवतु नाम, तथापि न तद् भाषाद्वयमिति गणयितुमुचितम् । अत-एव भगवान् पाणिनिरुभयोर्भाषयोरेकमेव व्याकरणं निबबन्ध । तेन हि भगवता निर्मितायां सूत्राणामासन्नचतुस्साहस्र्यां केवलं "२६३" मितानि सूत्राणि विशुद्धछन्दोभाषाविषयाणि, 'षट्' मितेषु च सूत्रेषु भाषायाम् इत्यु-पलभ्यते । अवशिष्टानि तु "३७१४" मितानि सूत्राणि समानरूपेणोभयविष-

---

१. महा० पस्पशा० २. पाणि० सू० २-३-६२ ।
३. पाणि० सू० ७-२-८८ । ४. पाणि सू० ३।२।१०८ ।

याणि। एतावत्साम्यमालोकमानोऽपि को नाम विद्वान् भाषयोरुभयोर्मौलिकं भेदं स्वीकरोतु ?

तस्मादेकस्यामेव भाषायामवान्तरा विभागाः पूर्वं प्रचलिता आसन्। उच्चारणभेदकृतास्ते ते विभागा अपि तत्रैवैकस्मिन् महासमुद्रे नद्य इव प्राविशन्।

इदं तु प्रतीयते यद् विभिन्नेषु देशेषु ते ते धातवः शब्दाश्च क्रमेण प्रतिनियता अभूवन्। तथाहि उक्तं निरुक्ते—

"शवतिर्गतिकर्मा कम्बोजेष्वेव भाष्यते, विकारमस्यार्येषु भाषन्ते शव इति, दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु।[1]

इदमेव किंचित् प्रवृद्धस्वरूपं महाभाष्यकारेणाऽप्युद्धृतम्—

"शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति, विकार एनमार्या भाषन्ते "शव" इति, हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु" इति।

अथ भगवता पाणिनिना नियतीकृतायां मर्यादाबद्धायां भाषायाम् उच्चारणादिदोषकृताः शब्दभेदाः पृथक् पृथक् भाषास्वरूपं निर्मातुमारब्धाः। यदि भगवता पाणिनिना भाषास्वरूपं न नियतीकृतमभविष्यत् तदा प्राकृतेन क्रमेण जाते अपभ्रंशबाहुल्ये भाषास्वरूपमेव पर्यवर्तिष्यत, अद्यत्वे च केनापि प्राचीनग्रन्थाः, लेटिन-ग्रीकभाषाग्रन्था इव न बोद्धमपारयिष्यन्त।

तस्माद् भगवतः पाणिनेरेवं प्रसादोऽयं यद् व्यासवाल्मीकिग्रन्था अप्यद्यत्वे सम्यग बुद्ध्यन्त इति।

भाषाबाहुल्यम्

भवतु नाम! प्राकृतस्तु प्रवाहो न केनापि रोद्धुं शक्यः, तदुच्चारणभेदकृता भाषाभेदा बाहुल्येन प्रववृतिरे। तदुक्तं हरिणा—

देवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः[2] इत्यादिना।

महाभाष्यकाले हि बहवो भाषाभेदाः प्रवृत्ता इत्यनुमीयते, तदुक्तमसकृन्महाभाष्यकृता—

"भूयांसोऽपशब्दाः, अल्पीयांसः शब्दाः, इति, एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः, तद्यथा—गौरित्यस्य शब्दस्य—गावी, गोणी गोता गोपतलिकेत्यादयो बहवोऽपभ्रंशाः" इति। इदमपि चोक्तम्—

"समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते—शब्देनैवार्थोऽभिधेयो नापशब्देनेति"[3]।

---

१. निरु० २।१।४। २. वाक्य प० १।१५६।

३. म० भा० पस्पश०।

एतेन स्पष्टमिदं प्रतीयते यदपशब्दघटितयापि भाषया व्यवहरन्तिस्म लोकाः। तयापि च प्रकटीकृतस्वाभिप्रायोऽन्येन बुध्यतेस्म।

स एष भाषाभेदप्रवाहः क्रमेण बाहुल्यमापेदे। तत एव "संस्कृतम्" "प्राकृतम्" इति नामभेदः प्रवृत्तो भाषासु। प्राकृतमपि च देशभेदेन बहून् भेदानवाप्तम्।

तदुक्तं परमाचार्येण भरतेन—

मागध्यवन्तिजा प्राच्या शौरसेन्यर्धमागधी।
बाह्लीका दाक्षिणात्या च सप्त भाषाः प्रकीर्तिताः[1] ॥ इति।

व्यवहारे च तत्तद्भाषाणां तत्तद्देशेषु वर्णविशेषप्राधान्यमालोच्य त्वेवमुक्तं तेन—

गङ्गासागरमध्ये तु ये देशाः संप्रकीर्तिताः।
एकारबहुलां तेषु भाषां तज्ज्ञः प्रयोजयेत्॥
विन्ध्यसागर मध्ये तु ये देशाः श्रुतिमागताः।
नकारबहुलां तेषु भाषां तज्ज्ञः प्रयोजयेत्॥
सुराष्ट्रावन्तिदेशेषु वेत्रवत्युत्तरेषु च।
ये देशास्तेषु कुर्वीत चकारबहुलामिह॥
हिमवत्सिन्धुसौवीरान् ये जनाः समुपाश्रिताः।
उकारबहुलां तज्ज्ञस्तेषु भाषां प्रयोजयेत्॥[2] इत्यादि।

किंचाह रुद्रटोऽपि—

प्राकृत-संस्कृत-मागध-पिशाचभाषाश्च शूरसेनी च।
षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः॥[3] इति।

अस्तु!

विनैव शिक्षां प्रकृत्या या समुच्चारिता आसीद् भाषा, सा प्राकृतमित्युच्यतेस्म। या तु प्राप्तशिक्षासंस्कारैर्विद्वद्भिरुच्चार्यतेस्म सा संस्कृतमिति नाम्ना व्यवह्रियतेस्म। स एष मध्यमः कालः।

प्राकृतशब्दं हि द्वेधा व्युत्पादयन्ति समीक्षाचणाः। प्रकृतिः संस्कृतम् तत आगतं प्राकृतमिति प्राकृतव्याकरणकर्तार आहुः। प्रकृत्योच्चारितं प्राकृतमिति तु ऐतिहासिकाः।

अनेन व्युत्पत्तिद्वयेन सुस्पष्टमिदं सिद्धं यत् प्राकृतमिति प्रसिद्धा भाषा संस्कृतादुत्पन्ना विनैव शिक्षां व्यवहारेण गृह्यमाणा चासीदिति।

---

१. नाट्य शा० १७।४८। २. नाट्य शा० ५७-६०।
३. काव्यालंकार २।१२।

पुनरपि प्रकृतिसिद्धं परिवर्तनं प्रचलदेवासीत्, तेन प्राकृतमपि दूरे नीतम्। अपभ्रंशभाषास्तु व्यवहारे प्रतिष्ठापिताः। पुनश्चापभ्रंशभाषा अपि दूरीभूताः, हिन्दी, मराठी, बंगला, मैथिलीत्याद्यास्तु साम्प्रतमुपलभ्यन्ते। अत्रापि च प्रचलत्येव प्राकृतपरिवर्तनक्रम इति न तिरोहितं समीक्षादक्षाणाम्।

तदेवं तामिलतेलगुनामिकाः काश्चिद् भाषा विहाय भारतीयाः सर्वा अपि भाषा वैदिकभाषात एव संस्कृतादिक्रमेण समुदपद्यन्त इति तु सर्वतन्त्रसिद्धान्त एव। परं भारताद् बहिः यूरोपादिदेशेषु प्रचलिता अपि भाषा वैदिकसंस्कृतभाषाया एव समुत्पन्ना इति बहूनामन्वेषकाणां विश्वासः।

कल्पितभाषा :

या हि चीनी-तिब्बतीप्रभृतयो भाषाः पूर्वमुदाहृताः, तास्तु कृत्रिमरूपेण तत्र समाजे कल्पिता इति तत्स्वरूपेणैव व्याख्यातप्रायम्। अतश्च तन्त्रवार्तिके कुमारिलभट्टमहाभागाः द्राविड़ादिभाषायाः चोर्, अतर, पाप, माल, वैर, इत्येतेषां शब्दानां यथाक्रमम्—ओदन, मार्ग, सर्प, सत्य, उदररूपेष्वर्थेषु कल्पनप्रकारमुद्भाव्य बर्बरादिभाषासु किं विकल्प्य किं प्रतिपत्स्यन्त इति न विद्म इत्याहुः।

तद्यथा—ओदनं चोरित्युक्ते चोरपदवाच्यं कल्पयन्ति, पन्थानमतरित्युक्तेऽतर् इति कल्पयित्वाऽऽहुः—सत्यं दुस्तरत्वादतर् एव पन्था इति, तथा पाप् शब्दं पकारान्तं सर्पवचनमकारान्तं कल्पयित्वा सत्यं पाप इवासाविति वदन्ति। एवं मालशब्दं स्त्रीवचनं मालेति कल्पयित्वा सत्यमित्याहुः, वैर्शब्दं च रेफान्तमुदरवचनं वैरिशब्देन प्रत्याम्नायं वदन्ति, सत्यं सर्वस्य क्षुधितस्याकार्ये प्रवर्तनादुदरं वैरिकार्ये प्रवर्तत इति, तद्यदा द्राविडादिभाषायामीदृशी स्वच्छन्दकल्पना तदा पारसी–बर्बर–यवन–रोमकादिभाषासु किं विकल्प्य किं प्रतिपत्स्यन्त इति न विद्मः[1] इति।

एवंविधसंकेतकरणं प्राक्तनेऽपि काले समुपलभ्यते। यथा महाभारते पाण्डवानां लाक्षागृहदाहप्रसङ्गे धर्मात्मना विदुरेण धर्मराजो युधिष्ठिरः विचित्रया संकेतभाषया समुद्बोधितः।

तथाहि—

प्राज्ञः प्राज्ञप्रलापज्ञः प्रलापज्ञमिदं वचः।
प्राज्ञं प्राज्ञः प्रलापज्ञः प्रलापज्ञं वचोऽब्रवीत्[2]॥

तत्र समाजे तदनर्थकं वचो न कैरपि किंचिदपि बुद्धम्। अतएवानुपदं कुन्ती युधिष्ठिरं प्राह—

---

१. तन्त्रवा० १।३।१०। २. म० भा० आदि० १४४।२०।

क्षत्ता यदब्रवीद् वाक्यं जनमध्येऽबुवन्निव ।
त्वया च स तथेत्युक्तो जानीमो न च तद् वयम्[१] ॥ इति ।

अपि च विभिन्नेषु देशेष्वेवंविधामन्यैरबोध्यां संकेतभाषां कल्पयन्ति वंचकाः । एवमेव तिब्बत-चीनप्रभृतिदेशेष्वपि कस्मिंश्चित् काले कैश्चित् पटुभिस्तथाविधा भाषाः कल्पिताः स्युः । अत्र विस्तरस्तु इतिहासान्वेषकैरेव लभ्यः ।

वैदिकभाषैवादिभाषा

तासां भाषाणां कथा तु पृथग्भूता, किन्तु प्रकृतिप्रत्ययादिसन्निवेशविशिष्टा नामक्रियादिभेदवत्यो याः ग्रीक–लैटिन–अंग्रेजीप्रभृतयः प्रचलन्ति, तास्तु बहुतरं सम्बन्धं वैदिकभाषया संस्कृतभाषया वा वहन्तीति क्रमेणाधिकाधिकं प्रत्ययभाजो भवन्त्यन्वेषका विद्वांसः । सम्बन्धिशब्दास्तु एकमूला एव बहुत्र प्रचलन्तीति बहोः कालात् प्राङ् निर्धारितं गवेषकैः ।

तद्यथा—

संस्कृतम्	ग्रीक	लैटिन	जर्मनी
पितृ	पैटर	पैटर	पैटर
मातृ	मैटर	मैटर	मिटर
भ्रातृ	फ्रैटर	फ्रैटर	फ्राटर
दुहितृ	दुगेटर	दुगेरट	टाख्टर

संस्कृतम्	अंग्रेजी	पारसी (फारसी)
पितृ	फादर	पीदर
मातृ	मदर	मादर
दुहितृ	डाटर	दुख्तर
भ्रातृ	ब्रदर	बिरादर
स्वसृ (समक्षीरा)	सिस्टर	हमसीरा
सूनु (पुत्र)	सन्	पिसर
विधवा	विडो	बेवा
अन्तःकुल	अंकिल	

इत्यादि ।

परमितोऽन्येऽपि बहवः शब्दाः संस्कृतभाषात एव निःसृताः प्रतीयन्त इति दिङ्मात्रेणानुपदं प्रदर्शयिष्यते विकृतिप्रकरणे ।

---

१. म० भा० आदि० १४४।३० ।

ततः पूर्वमपि प्राकृतमिति केचन

यूरोपीयास्तदनुयायिनश्च केचन विद्वांसोऽत्र विप्रवदन्ते। तेऽद्यानुमिन्वते यत् संस्कृतवैदिकभाषा न सर्वतः प्रथमा शक्याऽभ्युपगन्तुम्, किन्तु ततोऽपि पूर्वमासीत् काचन प्राकृतमिति सम्याख्याता भाषा, ततएव समुत्पन्ना वैदिकी भाषा संस्कृतभाषा च। नाटकेषूपलभ्यमाना विविधाः प्राकृतभाषा अपि तत एव समुदपद्यन्त। अन्या अपि च यूरोपीयादिभाषास्तस्या एव सन्ततीभूताः। तस्याः किमासीत् स्वरूपं कियांश्च प्रसिद्धायाः संस्कृतभाषाया अपेक्षया, वैदिकभाषापेक्षया वा तत्रासीद् भेद इति तु न केनाप्यद्यावधि निर्णेतुं पारितम्, परमासीत् सेति सर्वेऽपि रारटन्ति। स्वभाव एवैष यूरोपीयाणां यत्ते प्रसिद्धं परित्यज्याप्रसिद्धमूलं परिकल्पयितुं भवन्ति संनद्धा इति। यथाहि मनुष्यादेव मनुष्योत्पत्तिरिति न ते क्षमन्ते, किन्तु मनुष्याणां मूलभूता काचन अप्रसिद्धा गोरेला जातिरिति प्रतिष्ठापयन्ति। तथैवात्रापि सुप्रसिद्धायाः संस्कृतभाषाया भाषान्तराणामुत्पत्तिर्न तेभ्यो रोचते, अपितु मूलभूता काचिदन्यैवासीद् भाषेतिकल्पनं तान् प्रीणयति।

अत्र च युक्तिरेषा समुपन्यस्यते यत् "प्राकृतम् संस्कृतम्" इति च भाषयोर्नामैवैकस्याः कृत्रिमत्वम् अपरस्याश्च सर्वादित्वं ख्यापयति। संस्कृतमिति कृतसंस्कारां वाचमाचष्टे पदम्। नहि संस्कारेण विना संस्कृतमिति केनाप्युच्यते। संस्कारश्च मनुष्यक्रियया निष्पाद्य इति स्पष्टं कृत्रिमत्त्वं संस्कृतभाषायाः।

किंच वैदिकभाषायाः शब्दा अपि मूलभूतैः शब्दान्तरैर्निष्पादिता इति श्रुतिष्वेव सुस्पष्टमुपलभामहे। तद्यथा—

इन्द्रः

१—"स योऽयं मध्ये प्राणः, एष एवेन्द्रस्तानैषप्राणान् मध्यत इन्द्रियेणैन्द्धत तस्मादिन्ध, इन्धो हवै तमिन्द्र इत्याचक्षते परोक्षम, परोक्षकामा हि देवाः।"

(शत० ब्रा० ६, १, १, २२)

२—"इन्धो वै नामैष योऽयं दक्षिणेऽक्षम् पुरुषस्तं वा। एतमिन्धं सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः।"

(शत० ब्रा० १४, ६, ११, २)

३—"इदमदर्शमितीइँ तस्मादिन्द्रो नामेदन्द्रो हवै नाम, तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः।"

(तैत्तिरी० ब्रा० २, २, १०, ६३)

अङ्गिराः

१—"संतप्तस्य सर्वेभ्योऽङ्गेभ्योरसोऽक्षरत्सोऽङ्गारसोऽभवत्तं वा एतमङ्गारसं सन्तमङ्गिरा इत्याचक्षते परोक्षेण, परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः।"

(गो० ब्रा० १।१।७

२—"अङ्गिरसोऽङ्गानां हि रसः।

(शत० ब्रा० १४।४।१।८)

३—"अतो हीमान्यङ्गानि रसं लभन्ते तस्मादङ्गिरसः।"

(जैमनी० उप० २।४।२।८)

अन्तरिक्षम्

१—"यदस्मिन्निदं सर्वमन्तस्तस्मादन्तरिक्षम् अन्तयक्षं ह वै नामैतत्, तदन्तरिक्षमिति परोक्षमाचक्षते।"

(जैमनी० उ० १।२०।४)

२—"अन्तरेव वा इदमिति तदन्तरिक्षस्यान्तरिक्षत्वम्।"

(ताण्ड्यमहाब्रा० २०।१४।२)

३—"पुरान्तरा वा इदमीक्षमभूदिति तस्मादन्तरिक्षम्।"

(शत० ब्रा० ७।२।२३)

अग्निः

स यदस्य सर्वस्याग्रमसृज्यत, तस्मादग्निरग्निर्हवै तमग्निरित्याचक्षते।

(शत० ब्रा० ६।१।१।११)

हिरण्यम्

"देवाः तस्माद्धिरम्यां हिरण्यं हवै तद्धिरण्यमित्याचक्षते।"

(शत० ब्रा० ७।४।१।१६)

स्वेदः—"तस्मात्सुवेदोऽभक्तं वा सुतं सुवेदं सन्तं स्वेद इत्याचक्षते।"

(गो० ब्रा० १।१)

स्वप्नः—"प्राणं स्वा अपयन्ति तस्मात्स्वाप्ययः स्वाप्ययो ह वै तं स्वप्न इत्याचक्षते।"

(शत० ब्रा० १०।३।६)

मानुषम्— "यद्ब्रुवन् भेदं प्रजायते रेतो दुषदिति तन्मादुषमभवत्तन्मादुषत्वं मादुषं हवै नामैतद्यन्मानुषं तन्मादुषं सन् मानुषमित्याचक्षते।"

(ताण्ड्य महा ब्रा० ८।२।१०)

स्वपितिः—'यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति, स्वमपीतोभवति तस्मादेनं स्वपितीत्याचक्षते, स्वं ह्यपीतो भवति।"

(छान्द० उप० ६।८)

रथन्तरम्—"रसं तमं ह वै तद्रथन्तरमित्याचक्षते परोक्षम्।"

(शत० ब्रा० ९।१।२।३६।२)

पुरुषः

१—'प्राण एष स पुरि शेते इति पुरिशयं सन्तं प्राणं पुरुष इत्याचक्षते परोक्षेण।

(गो० ब्रा० १।१।३९)

२—"इमे वै लोकाः पूरयमेव पुरुषो योऽयं पवते सोऽस्यां पुरि शेते तस्मात्पुरुषः।"

(शत० ब्रा० १३।६।२१)

३—"पूर्वमेवाहमीहाऽऽसमिति तत्पुरुषस्य पुरुषत्वम्।"

(तैत्ति० आ० २३।१।२)

मघवान्—"तत इन्द्रो मखवानभवन् मघवान् ह वै तं मघवानित्याचक्षते परोक्षम्।

(शत० ब्रा० १४।१।१।१३)

वरुणः—"यच्च वृत्वाऽतिष्ठत्तद् वरणोऽभवत्तं वा एतं वरणं सन्तं वरुण इत्याचक्षते परोक्षेण।"

(गो० ब्रा० १।७)

निरुक्ते च बह्वयो व्युत्पत्तयः समुपलभ्यन्ते। तद्यथा—

इन्द्रः—इरां दृणातीति वा, इरां ददातीति वा, इरां दधातीति वा, इरां धारयत इति वा, इरां दारयत इति वा, इन्दवे द्रवतीति वा, इन्दौ रमत इति वा, इन्धे भूतानीति वा, "तद्यदेनं प्राणैः समैन्धंस्तदिन्द्रस्येन्द्रत्वमिति" विज्ञायते, इदं करणादित्याग्रायणः। इदं दर्शनादित्यौपमन्यवः, इन्दते वा ऐश्वर्यकर्मणः, इन्दन्छत्रूणां दारयिता वा, द्रावयिता वा, आदरयिता च यज्वनाम्"।

(निरु० ७।१।८)

निघण्टुः—"ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्ते, अपि वा हननादेव स्युः समाहता भवन्ति, यद्वा समाहृता भवन्ति।

(निरु० [illegible]।१।१)

अन्तरिक्षम्—अन्तराक्षान्तं भवति, अन्तेरेमे क्षियति इति वा, शरीरेष्वन्तरक्षयमिति वा"।

(निरु० २।३।१०)

कुचरः—चरति कर्म कुत्सितम्, क्वायं न चरतीति।

(निरु० १।६।२०)

हिरण्यम्—ह्रियते आयम्यमानमिति वा, ह्रियते जनाज्जनमिति वा, हितं रमणं भवतीति वा, हर्यते वा स्यात् प्रेप्साकर्मणः।

(निरु० २।३।१०)

शृङ्गम्—श्रयतेर्वा, शृणातेर्वा, शम्नातेर्वा, शरणायोद्गतमिति वा, शिरसो निर्गतमिति वा।

(निरु० २।२।७)

दधिक्राः (अश्वः)—"दधत् क्रामतीति वा, दधत् क्रन्दतीति वा।

(निरु० २ अ० ७।२८)

वासरम्—वासराणि, वेसराणि[1], विवासनानि, गमनानीति वा।

(निरु० ४।१।७)

विंशतिः—द्विर्दशतः।

(निरु० ३।२।१०)

इत्यादि।

तथा च पुराणेऽपि—

प्रणवः—

"प्रो हि प्रकृतिजातस्य संसारस्य महोदधेः।
नवं नावान्तरमिति "प्रणवं" वै विदुर्बुधाः॥"
"प्र प्रपंचो न नास्ति वो युष्माकं प्रणवं विदुः।
प्रकर्षेण नयेद्यस्मान्मोक्षं वः प्रणवं विदुः॥"

(शिव पुराण १७।४।५)

पूजा—

पूर्जायते ह्यनेनेति वेदेष्वर्थस्य योजना।
प्रयोगफलसिद्धिश्च जायते तेन कर्मणा॥
मनोभावांस्तथा ज्ञानमिष्टभोगार्थयोजनात्।
पूजाशब्दार्थ एवं हि विश्रुतो लोकवेदयोः॥

(शिव पु० १६।२९–३०)

---

१. द्वाभ्यां शीतोष्णाभ्यां रात्रिंदिवमनारतं सरन्ति गच्छन्तीति वेसराणि सन्ति वासराणि भवन्ति, पृषोदरादित्वात् वे, वा भावौ स्तः।

जीवः—

जीर्यते जन्मकालाद्यत्तस्माज्जीव इति स्मृतः ।
जन्यते तन्यते पाशैर्जीवशब्दार्थ एव हि ॥

(शिव० पु० १६।९९)

इत्यादि ।

एवं च सुस्पष्टमिदमनुमीयते यत् "अङ्-गिरस्" शब्द एव पूर्वं प्रचलितः पश्चात् "अङ्गिरा" शब्दतां गतः । एवम् "इन्ध" (इदन्द्र) शब्द एव पूर्वं प्रचलितः पश्चाच्च इन्द्रशब्दतां गत इत्यादि ।

यथा हि अद्यत्वे (बीस) हिन्दीभाषादिषु प्रसिद्धः । तस्य मूलं च "विंशतिः" शब्द इति ख्याप्यते । एवमेव "विशतिः" शब्दस्यापि मूलं "द्विदशतिः" शब्दः स्पष्टमनुमीयते ।

अत्र युक्तिरपि श्री डा० मंगलदेवशास्त्रिमहाशयैः प्रदर्शिता यत् आङ्गल भाषायां संख्यावाचकाः शब्दाः प्रायेण संस्कृतशब्दैः संबद्धा एव प्रतीयन्ते । तद्यथा—

संस्कृतम्	अंग्रेजी	पारसी
एक	ए	एक
द्वि	टू	दो
त्रि (तिस्र)	थ्री	से
षष्	सिक्स	शश
सप्तन्	सेवेन्	हप्त
अष्टन्	एट	हश्त
नवन्	नाइन्	नौ
दशन्	टेन्	दह

इत्याद्याः ।

विंशतिशब्दस्थाने तु योऽयं ट्वेन्टी "शब्दः प्रयुज्यते, तत्रादौ टकारः कुत आगत इति न विज्ञायते । "द्विदशति" शब्दो मूलमिति स्वीकारे तु आदिभूतो दकार एव आङ्गलोच्चारणमाहात्म्यात्-टकाररूपतां गत इति स्पष्टीभवति ।[१] एवमन्यत्राप्यन्वेष्यम ।

तथा च मूलभूतशब्दघटिता काचिदन्यैवासीत् सर्वप्रथमा भाषा, यतो वैदिक-भाषायाः, संस्कृत-भाषायाः, विभिन्नानां प्राकृतानाम् , विदेशीय-

१. तु० भा० वि० परि० ७ ।

भाषाणां चोत्पत्तिरुपपत्तिमवगाहते। सन्ति च वैदिक-भाषायामपि तथाविधाः शब्दा ये संस्कृतशब्दप्रकृतिप्रतिकूला भवन्ति। यथा "तितउ" शब्दः। एकस्मिन्नेव पदे अव्यवधानेन द्वयोः स्वरयोः प्रयोगः संस्कृत भाषायाः प्रकृतेर्विरुद्धः, अन्यत्र तथानुपलब्धेः। प्राकृतेषु हि "अ अ" इत्यादौ बाहुल्येन व्यञ्जनाव्यवहितानां स्वराणां प्रयोग उपलभ्यते। तथैव मूलप्राकृतेपि संभाव्यत इति। तत एव "तितउ" पदं संगृहीतं स्यात्। तथैव "जर्फरी" "तुर्फरी" इत्यादिशब्दा अपि कुतश्चिद् भाषान्तरादेव गृहीता अनुमीयन्ते।

तदेवं वैदिक-भाषातः पूर्वमपि भाषान्तरसत्ताऽनुमीयते, तच्च प्राकृतपदेनाभिलप्यमिति।

अत्र वदामः—

संस्कृतशब्दरहस्यम्

संस्कृतशब्दमवलम्ब्य यदस्या भाषायाः कृत्रिमत्वमापादितम्, तदिदं सर्वथैव मूलशून्यम्, यतो हि अस्या भाषायाः "संस्कृत" मिति नाम न कुत्रापि प्राक्तनेषु ग्रन्थेषु दृश्यते। पाणिनिर्यास्कश्च भाषाशब्देनैवैतां व्यवहरत इत्युक्तं प्राक्। वैदिकभाषाकृते योऽयं छन्दःशब्दः पाणिनिना भूयसा प्रयुक्तः, स तावन्मन्त्राणां छन्दोमर्यादानिबद्धतामेवाभिलक्ष्य। "अध्याय" पदं च यद् यास्केन तत्प्रयुक्तं तदपि अध्येतव्यतामेव पुरस्कृत्येति, नैतौ शब्दौ कृत्रिमतामावेदयतः। संस्कृतशब्दो हि प्राचीनेषु ग्रन्थेषु वाल्मीकिरामायण एव प्रथमत उपलब्धः। तथाहि सुन्दरकाण्डे सीतादर्शनसमये हनुमतो विचाराः—

> अहं ह्यतितनुश्चैव वानरश्च विशेषतः।
> वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्॥
> यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृताम्।
> रावणं मन्यमाना मां सीता भीता भविष्यति॥[१] इति।

अत्र च प्रथमे पद्ये मानुष्या भाषायाः कृते संस्कृतामित्युक्तम्। तस्य तात्पर्यं पूर्वं निरूपितमेवास्माभिर्यत् पश्वादि-भाषापेक्षया मानुषी वाक् संस्कृतेत्युच्यते। पश्वादिभाषासु नार्थवाचकशब्दविभागो भवति, मानुष्यां तु वाचि स दृश्यते। एष एव संस्कारः, तत एव च इन्द्रस्य संस्कारकर्तृत्वं व्याख्यातं प्राग् वागविभागप्रकरणे।

---

१. वा० रा० सु० ३०।१७।१८।

तथा च सामान्यतया मनुष्यैरुच्चार्यमाणाया एव वाचः, पश्वाद्यपेक्षया 'संस्कृतमि'होक्तम्, न तु भाषाभेदस्तेन लभ्यते।'

द्वितीये च पद्ये "द्विजाति" पदं शिक्षितोपलक्षितं स्यात्। तेनायं हनुमत आशय उन्नीयते-न वानरादीनामिव अपभ्रंशबहुला वाङ् मयात्र प्रयोज्या, सीतायास्तद्बोधासंभवात्, अपि तु शिक्षिता जना यथा सुस्पष्टां साधुशब्दपरिष्कृतां वाचं वदन्ति तथैव मयापि व्यवहर्तव्यम्। वानराकारस्य तादृशीं साधुभाषां श्रुत्वा सीता मामपि रावण-सन्देहं करिष्यतीति।

एतदेवाग्रे स्पष्टीकृतम्—

अवश्यमेव वक्तव्यं मानुषं वाक्यमर्थवत्।
मया सान्त्वयितुं शक्या नान्यथेयमनिन्दिता॥[1] इति।

ततः संस्कृत-पदेन सुस्पष्टपदा, शिक्षितबोध्या वागेवात्र गृह्यते, न तु भाषाभेदस्तेनानुमातुं शक्यते। यदि भाषान्तरं तदात्वे प्राचलिष्यत् तर्हि कुतो हनुमान् तदेव नाभ्यधास्यत्, कुतः सन्देहे प्रापतिष्यत्, प्रचलितेन भाषान्तरेणापि सीताया बोधसंभवात्।

एतेनोक्त-रामायण-वचनमवलम्ब्य ये द्विजातीनामेव संस्कृतोच्चारणाधिकारं साधयन्ति, शूद्रांश्च संस्कृताध्ययनात् तदुच्चारणाद् वा बहिः कुर्वन्ति, तेऽपि भ्रान्ता एव सिद्ध्यन्ति। यदि द्विजातीनामेव संस्कृतोच्चारणं तदात्वे रूढमभविष्यत्, स्त्री-शूद्रौ च नाटकादिकाले एव प्राकृत-भाषिणावभविष्यताम्, तर्हि सीतायाः प्रबोधनाय प्रत्युत प्राकृतभाषैव समुपायोक्ष्यत्। स्त्रीणां प्राकृतभाषायामेव विशेषेण परिचयात्। ततश्च संस्कृत-भाषामुच्चार्य हनुमता स्वतः सन्देहस्थानं किमिति विरचितं स्यात्। कुतश्च वानरो हनुमान् शास्त्राज्ञाविरुद्धं संस्कृत-भाषां वक्तुं सनद्धो भवेत्।

तस्मात् संस्कृतैव तदात्वे मानुषबोध्या भाषा, वानरा अपि च शिक्षया तामधिगच्छन्तिस्मेत्येव स्पष्टं सिद्ध्यति।

तदेतत् स्पष्टीकृतं किष्किन्धाकाण्डे—

नानृगवेदविनीतस्य नायजुर्वेदधारिणः।
नासामवेदविदुषः शक्यमेवं विभाषितुम्॥
नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरताऽनेन न किंचिदपशब्दितम्॥[2]

---

१. वा० रा० ३०।१९।

२. वाल्मी० रा० कि० काण्डम् २८-२९।

इत्यादिना। (इयं हि हनुमतः प्रथमसमागमसमये रामस्य "लक्ष्मणं" प्रत्युक्तिः)।

तेन वानरादीनां वनेचराणामपशब्दबहुला भाषा तदात्वे प्रचलिताऽऽसीत्। शिक्षितानान्तु शुद्धेत्येव स्पष्टीभवति।

ततश्च प्राक्तने काले संस्कृतशब्दस्यैव प्रयोगादर्शनात् तन्मूलभूतः सर्वोऽपि भाषान्तरकल्पनाप्रासादो धराशायी भवतीति।

श्रुतिनिरुक्तितात्पर्यम्

या अपि च श्रुतिनिरुक्तादिषु बहूनां शब्दानां निरुक्तयः समुपलभ्यन्ते तासामपि नेदं तात्पर्यं भवितुमर्हति-पूर्वमेवंविधाः शब्दाः प्रयुक्ता आसन्, तदनु तु वर्तमानरूपं गता इति। अपि तु ये निरूढाः शब्दास्ते तमेवाभिप्रायमभिलक्ष्य प्रयुक्ता इत्येव ताभिः सिद्ध्यति। यदि हि तथाविधा एव शब्दास्स्युः तर्हि एकैकस्य शब्दस्यानेकव्युत्पत्तिप्रदर्शनं सर्वथैव नावकल्पेत। इन्द्रशब्दस्यार्थे पूर्वम् 'इदन्द्र' शब्दः प्रयुक्त आसीत् 'इन्ध' शब्दो वेति कथमवधार्येत। कथं चैवं सन्दिग्धमभिज्ञया श्रुत्या प्रतिपाद्येत।

तस्मात् इन्द्र, अङ्गिरा, शृङ्गम्, इत्याद्या एव शब्दा अनादेः कालात् प्रयुक्ता आसन्, ते चैते शब्दाः केनाभिप्रायेण प्रयुक्ताः कथं तेषामनुगतार्थता इत्येव विचारः श्रुतिनिरुक्तादिभिः क्रियते।

अत्र च हेतुः श्रुत्या भूयोभूयः समुद्घुष्यते—"परोक्षप्रिया ह वै देवाः" "परोक्षकामा ह वै देवाः" इत्यादिना। तत्र देवशब्दस्योभयथाप्यभिप्रायो भवितुमर्हति—देवाः प्राणविशेषा इति वा, देवा विद्वांस इति वा। इन्ध इति प्रतिपादने प्रसक्तेऽपि प्राकृतैः प्राणविशेषैः इन्द्र इत्येव प्रयुक्तम्, तदेव च निरूढिं गतम्। "अङ्गरस" इति प्रतिपादनप्रसङ्गे अङ्गिरस् इत्येव प्रकृतिसाहाय्येनोच्चारणमभूत्। शिरोनिर्गम इतिप्रसंगे शृंगमित्येव प्राणविशेषैरुच्चारितमित्यप्यभिप्रायो भवितुमर्हति। भाषाप्रवर्तकैरादिविद्वद्भिर्वा अनेकानभिप्रायानभिलक्ष्य परोक्षवृत्त्येव तथाविधाः शब्दाः प्रचालिता इत्यप्यभिप्रायो भवितुमर्हति। परं "परोक्षप्रिया ह वै देवाः" इति श्रुत्या पूर्वमिदन्द्रादिशब्दा आसन् पश्चात्तु इन्द्रादिशब्दाः प्रवृत्ता इति तु न कथमपि सिद्ध्यति देवानां कर्तृत्वाख्यानेन पूर्वमन्यादृशशब्दप्रयोगस्य दूरापास्तत्वात्।

पूर्वमपीह प्रयोक्तारो देवा एव भवेयुः, तेपि च परोक्षकामाः, परोक्षप्रिया वा-इति तैः कथं प्रत्यक्षशब्दाः प्रयुक्ताः स्युरिति स्पष्टं श्रुतिविरोधः स्यात्।

उक्तं चैतन्निरुक्तकृता सर्वेषां नाम्नां धातुजत्वं समर्थयमानेन—'सन्त्यल्पप्रयोगाः कृतोप्येकपदिका'[1] इति। प्रत्यया विकारश्चैकविधा एव सर्वत्रेति न नियमः, अपितु विभिन्नाः प्रत्यया विभिन्ना विकाराश्च तेषु शब्देषु दृश्यन्त इत्येव तदभिप्रायः। ते चैते प्रत्यया विकाराश्चाप्राकृतिका एव प्रकृत्यनुरोधेन व्याकरणेनान्वाख्याताः। ते तमनुगतार्थमपि सन्धायापि विभिन्नविधा एव शब्दाःप्रयोगविषयतां प्राप्नुवन्ति पाककर्त्रभिप्रायेण पक्ताऽभिप्रयुज्यते 'पाचक' इत्यपि, 'तण्डुलपाक' इत्यपि। ग्रहणकर्त्रभिप्रायेण तु 'ग्राही' इति, मेषग्राह इति वा, ग्रहीतेति वा, ग्राहक इति वा प्रयुज्यते। जागर्तीत्यभिप्रायेण च 'जागरूक' इति विलक्षणमेव प्रयुज्यते।

तदिदं सर्वं प्रकृतेकृतं वा, आदौ भाषानियामकैः समाजनेतृभिररचितं वा 'यथेच्छं कल्प्यताम, न तु ततः पूर्वमपि शब्दान्तरमप्यासीदिति कल्पना तत्र प्रसरति, मूलाभावात्।

विंशतिशब्दनिर्वचनम्

'वीस' शब्दः, विंशतिशब्दान्निष्पन्न इति प्रत्यक्षं भाषाद्वयदर्शनेन सुस्पष्टमनुमीयते। विंशतिशब्दोऽपि द्विदशतिशब्दान्निष्पन्न इत्यनुमाने तु हेतुं पश्यामः। द्विदशतिशब्दोच्चारणप्रसंगे आदावेव संक्षेपेण 'विंशति'रिति उच्चारणवैषम्येण 'विंशति'रिति च प्रयुक्तमित्यपि संभवति। आदौ द्विदशतिरित्युच्चार्य पश्चाद् विंशतिशब्द उच्चारित इत्यत्र न दृढं मूलमुपलभ्यते। अत एव सर्वेषां नाम्नां न धातुजत्वम, अपि तु निरूढान्यपि नामानि बहूनि प्रवृत्तानीत्यपि कल्पना वैयाकरणानां प्रवृत्ताः। यदि तु क्रमेणैव शब्दाः निष्पन्ना अभविष्यन् तर्हि निरूढत्वकल्पना नैव प्रसृता स्यात्। 'अश्व' शब्दो हि अश्-धातोरप्-प्रत्ययेन अश्नोत्यध्वानमित्यर्थे नैरुक्तैर्व्युत्पाद्यते। यदि शब्दोऽयम् अश्-धातोर्निष्पन्नः स्यात् किमिति पक्ता, गन्तेत्यादिसाधारण्येन 'अष्टा' इत्येव न प्रयुक्त इति निरूढवादिनो वैयाकरणास्तत्राक्षिपन्ति।

प्रकृत्यैव विभिन्नाकाराः प्रत्ययास्तत्र तत्र निहिता नानुयोक्तव्या इत्येव नैरुक्तानां तत्रोत्तरं भवति, न तु पूर्वमष्टा शब्द आसीत् ततश्चाश्वरूपतां गत इति कोप्येतत् संमनुते।

तस्माद् व्युत्पत्तिमात्रप्रदर्शनेन पूर्वं भाषान्तरकल्पनमिदं साहसमात्रम्। पूर्वं यदि द्विदशतिशब्दः प्राकृते न प्रयुक्तः, तर्हि 'ट्वेन्टी' इति

---

१. निरु० १।४।१४।

आङ्ग्लभाषायां टकारः कुतो लब्ध इति प्रश्नोपि वर्णोपजनेन शक्यते समाधातुम् ।

यथा हि—वर्णापायस्तत्र तत्र भवति तथा वर्णोपजनोपिभवतीति व्युत्पत्तिविदः स्वीकुर्वन्ति । तदेतदुक्तम्—

'भवेद् वर्णागमाद्ध्वंसः सिंहो वर्णविपर्ययात् ।
गूढोत्मा वर्णविकृतेर्वर्णनाशात् पृषोदरम् ॥' इति ।

दृश्यते च स्फुटं वर्णापायोपजनौ । अन्यथा—'एलेवन्'-'ट्वेल्व' शब्दे च लकारः कुत आगत इति प्रश्ने किमुत्तरं स्यात् । नहि लकारघटितः कश्चन शब्दः पूर्वमनुमातुं शक्यः । सप्तन्-सेवेन्, नवन्-नाइन, दशन्-टेन, इत्यत्र च नकारो दृश्यते, पंचन्-फाइव् , अष्टन्-एट, इत्यत्र तु न दृश्यते, अतोऽत्र वर्णापायातिरिक्तं न किमप्युत्तरं स्यात् । तस्मात् प्रकृत्या एवंविधा उपजनापाया भवन्त्येवेत्यकामेनाप्युपगन्तव्यं स्यात् ।

विकाराश्चापि विलक्षणा एव प्रकृत्या क्रियन्ते, न कोऽपि विशिष्य तत्र नियम इत्यपि स्वीकार्यमेव । 'चतुर' शब्दो हि फोररूपेण परिणतः, तचकारः फकाररूपतां गतः । 'पंचन्' शब्दे तु 'फाइव्' रूपतां गते पकारः फकाररूपतां यातः, चकारस्तु 'व्' रूपतां गत इति वैलक्षण्यं स्पष्टमुपलभ्यते ।

दृश्यते च टकारोपजनोऽन्यत्रापि । यथा 'ऋत्' शब्द एव सत्यवाचकः, 'रूत' इति 'रूथ' इति च भूत्वा टकारोपजनेन टूथ' रूपतां गत इति संभाव्यत ।

तस्माट्टकारमात्रदर्शनेन 'द्विदशति' शब्दस्य प्राक् कल्पने न दृढतरः प्रत्ययः समुदेति । द्विदशतिशब्दकल्पनेपि च शकारापायः, वकारोपजनश्च कल्पनीयः स्यादेव । तदपेक्षया 'विंशति' शब्दे 'सकारः' पूर्वमागत्य पकाररूपतां टकाररूपतां क्रमेणापेद इत्येव कल्पनं लघूभूतं स्यात् । मन्यतां वा विंशतिशब्दात्पूर्वं 'द्विदशति' शब्दप्रयोगः प्रचलित आसीदिति तथापि नास्माकं क्षतिः, द्विदशत्यादिशब्दघटिताया अपि भाषायाः संस्कृतसीमोल्लङ्घनाभावात् । सापि द्विदशत्यादिशब्दघटिता भाषा एतत्संस्कृतभाषा-सजातीयैवासीन्नान्येति वयमभिप्रेमः ।

'तितउ' शब्दनिरूपणम्

एवं शब्दानां विभिन्नप्रकृतिपर्यालोचनेन 'तितउ' प्रभृतयः शब्दा अपि भाषान्तरादेव लब्धाः स्युरित्यत्र न दृढतरं प्रमाणम् । विभिन्नयोः पदयोर्योगे

तु संस्कृतभाषायामपि स्वरयोरव्यवधानं दृश्यत एव 'अमू आसाते' इत्यादौ यत्र प्रगृह्यसंज्ञां विधाय पाणिनिना स्पष्टमन्वाख्यातम्।

तथा च 'तितउ' शब्दे पदद्वयमेव कल्प्यताम् तित-युरिति, तदेव च यकारापायेन 'तितउ' रूपतां गतमित्यपि संभाव्यते। व्युत्पादयति च निरुक्तकारस्तथैव रीत्या 'ततवद्वा' 'तुनवद्वा' इति। तेन 'तित युक्' इत्यनयैव व्युत्पत्त्या तितउ-शब्दः सिद्ध्यति। तां व्युत्पत्तिं स्मारयितुमेव तत्र स्वरयोरव्यवधानं प्रवर्तितमित्यपि शक्यते वक्तुम्। अप्रसिद्धभाषान्तरकल्पनापेक्षया च सा कल्पना लघीयसी स्यात्। 'जर्फरी' 'तुर्फरी' इत्यादिशब्दास्तु संस्कृतधातुभिरेव निरुक्तकृता व्युत्पादिता इति भाषान्तरकल्पना न दृढमूला।

तस्माद् वैदिकी भाषा तत्सहचरी संस्कृतभाषा च सर्वादिभूतेत्येव संस्कृतप्रणयिनां विचारनिष्कर्षः। अस्यां च भाषायां संस्कृतशब्दस्तदैव प्रवृत्तो यदा प्राकृतादिभाषाप्रवाहो बाहुल्येन प्रसृतः। तदैव हि भाषान्तरव्यावृत्तिबोधनाय संस्कृतशब्दस्यापेक्षा जाता। पाणिनिप्रभृतिभिः कृतसंस्कारत्वाच्च संस्कृतशब्द एव स्थाने मूलभूतभाषाबोधनाय जनैः प्रयुक्त इति।

सर्वस्यास्य निरूपणस्यायं सारः

उपलभ्यमानेषु ग्रन्थेषु वेदस्तावत् सर्वेभ्यः प्राचीन इति तु सर्वैरेवाभ्युपगम्यते। तथा चोपलभ्यमानासु भाषासु वेदभाषा सर्वतः पुरातनीत्यत्रापि न कश्चिदपि विवदितुमुत्सहेत। अयं च वेदो येषां मते अनादिरीश्वरप्रणीतः, तन्मते नापरमवशिष्यते वक्तुम्। ये तु वेदमनादिं नाभ्युपगच्छन्ति त एव कल्पयन्ति—वेदभाषातोऽपि प्रागासीत् काचन भाषेति। सा च प्रकृतिसिद्धत्वात् प्राकृतपदेनाभिधेया। तस्याः परिष्कृतं रूपं वेदभाषा, सैव च किंचिद् वैलक्षण्यमाप्ता संस्कृतभाषात्वमापेदे। तत्रेदमस्माकं वक्तव्यम्—

भवतुनाम वेदभाषातोऽपि प्राक्तनी काचन भाषा, भवतु च तदात्वे प्राकृतपदाभिधेया. किन्तु याऽस्माभिरिदानीं संस्कृतभाषेत्युच्यते. तदपेक्षयात्यन्तविलक्षणा सा भवत्कल्पिता प्राक्तनी भाषाऽऽसीदित्यत्र न किमपि प्रमाणमुपलभामहे। अद्यत्वेऽपि ग्रामीणानां नागरिकाणां च भाषासु भवति महान् भेदः। वाग्व्यवहारभाषापेक्षया च ग्रन्थभाषास्वप्यनुभूयत एव वैलक्षण्यम्। परं तावता वैलक्षण्येन भाषाभेदो न कुत्रापि व्यवह्रियते, अपि तु एकस्या एव भाषाया अवान्तरा भेदा इमे परिगण्यन्ते—ग्रन्थभाषा, नागरिकभाषा, ग्राम्यभाषा चेति। तथैवात्रापि द्रष्टव्यम्। न ब्रूमः कादम्बरीसदृशं गद्यं कदापि

व्यवहारे भाष्यतेस्मेति, परं यद्भाष्यतेस्म न तदितो विभिन्नभाषारूप-मित्येव वदामः ।

कालभेदेन देशभेदेन च तत्रापि संभाव्यन्त एव भेदाः, परं सर्वेऽपि एकभाषासीम्नो न बहिर्भूताः । यथा हि 'पृथ्वीराज रासो' ग्रन्थसमयमारभ्या-द्यावधि ग्रन्थेषु व्यवहारे च प्रयुज्यमानाः सर्वा अपि भाषा हिन्दीपदेनैव संगृह्यन्ते, तथैव वर्तमानप्राकृतोत्पत्तेः प्राक्तन्यः सर्वा अपि देशकालभिन्ना भाषा अद्यत्वे संस्कृतशब्देनैव संग्राह्या इति । भाषान्तरकल्पने प्रमाणा-भावात् । एतदेवावलम्ब्य वैदिकभाषानतिरिक्तसंस्कृतभाषैव सर्वादिभूता भाषेति वदामः ।

तत एव च प्रायेण सर्वासामपि भाषाणामुत्पत्तिं प्रतिजानीमहे । या अपि संकेतप्रधानाः 'चीनी'-'तिब्बती' प्रभृतयो भाषास्ता अपि कथंचित् संकेतान्तरविधयाऽस्या एव भाषाया निष्क्रान्ता इति भट्टपादोक्ततन्त्रवार्तिक-वचनेन दर्शितं प्राक् । अत्र तु यथा यथान्वेषणं प्रपद्येत, तथा तथास्य सिद्धान्तस्य पोषणं क्रमेण भवेदिति ।

अष्टमोऽध्यायः

भाषाविकृतिहेतवः

इह सर्वे पदार्था विपरिणामिन एव सन्ति, स्थायित्वमेकरसत्वं वा न कुत्रापि कथमपि। यत् प्राक् श्रुतं दृष्टं वा न तत्तथैवेदानीं श्रूयते दृश्यते च। तत्र परिवर्तनं प्रकृतिसिद्धम्। तदुक्तं कविभवभूतिना "उत्तररामचरित"नाटकस्य द्वितीयाङ्के—

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम्॥

इत्यादिना।

तच्च परिवर्तनं स्वाभाविकं देशकालादिप्रभावजन्यं वेति द्विविधं भवति। स्वाभाविकं यथाकालं प्रकृत्या जायते, अन्यच्च तत्तन्निमित्तविशेषादेव। दृश्यते हि लोके दोहदप्रभावादपि वा तद्देशभेदादसमयेपि वृक्षेषु फलोद्गमः, लतासु पुष्पकलिकेति। न च तत्र प्रकृतिः कारणं किन्तु निमित्तकारणमेव। एवं सर्वेषु भावपदार्थेषु वीक्ष्यते तत्। तथा च भाषायामपि परिवर्तनं निमित्तजन्यम्, स्वाभाविकं चावलोक्यत एव। अत्र च परिवर्तनानि देशकृतानि, कालकृतानि, व्यक्तिकृतानि, वर्णस्वभावकृतानि च बहुधा सम्भवन्ति।

देशकृतं परिवर्तनम्

तत्तद्देशीयजलवायुप्रभावात् क्वचित् कोमला वर्णा नोच्चारयितुं शक्यन्ते। क्वचिच्च कठोराः। यथा आंगलाः प्रायेण तकारदकारादिस्थाने 'टकार' डकारादिकमुच्चारयन्ति। हिन्दीभाषां वदन्तोऽपि "तुम्" शब्दस्थाने "टुम्" एवं "दूबे" इत्यस्य स्थाने "डूबे" इत्येवं प्रयुज्यमाना दृश्यन्ते। कठोरवर्णोच्चारणमेव तेषां प्रकृतिसिद्धम्। तेन त्रिशब्दोच्चारणप्रसंगे 'थ्री' इत्येव तेषामुच्चारणं भवति। केचिच्च सुकुमारदेशीया सुकुमारप्रकृतयो वा टवर्गान् महाप्राणांश्च सर्वथा वर्जयन्ति।

तदेतदुक्तं काव्यमीमांसायाम्—

"श्रूयते हि मगधेषु शिशुनागो नाम राजा, तेन दुरुच्चारानष्टौ वर्णानपास्य स्वान्तःपुर एव प्रवर्तितो नियमः टकारादयश्चत्वारो मूर्द्धन्यास्तृतीयवर्जमूष्माणस्त्रयः क्षकारश्चेति।"

श्रूयते च सूरसेनेषु कुविन्दो नाम राजा, तेन परुषसंयोगाक्षरवर्जमन्तःपुर एवेति समानं पूर्वेण।[१]

तत्र ट ठ ड ढ श ष ह क्षान् वर्णानपास्यान्ये ककारादयो वर्णा एव प्रयोक्तव्याः सर्वैरित्येवंरूपो नियमः सुकुमारस्वभावानां किल मगधराजानाम्।

एवंविधेनैव प्रकृतिभेदेन पर्यायेषु ते ते शब्दाः तेषु तेषु देशेषु परिगृहीताः। उत्पन्नेऽपि च भाषाभेदबाहुल्ये प्रकृतिभेदाद्, रुचिभेदाद्वा राजाज्ञया वा तत्तद्भाषापरिग्रहः तेषु तेषु देशेषु जात इत्यपि काव्यमीमासायामुक्तम्—

"गौडाद्याः संस्कृतस्थाः परिचितरुचयः प्राकृते लाटदेश्याः
सापभ्रंशप्रयोगाः सकलमरुभुवष्टक्कभादानकाश्च।
आवन्त्याः पारियात्राः सह दशपुरजैर्भूतभाषां भजन्ते,
यो मध्ये मध्यदेशं निवसति सकविः सर्वभाषानिषण्णः।[२] इति।

एवं देशभेदो भाषाभेदं बाहुल्येन प्रयोजयति।

कालकृतं परिवर्तनम्

प्रयुज्यमानाश्च त एव शब्दाः कालभेदेनापि विकृतिमापद्यन्ते। यथात्रैव संस्कृतं प्राकृतमपभ्रंशाः, देश्यभाषाश्चेत्यादिपरिवर्तनानीति प्रत्यक्षमेव सर्वेषाम्। कालेन प्रकृतिः विकृतिमेति सुकुमारप्रकृतयः कठोरप्रकृतयो भवन्ति, कठोरप्रकृतयश्च सुकुमारप्रकृतयः। रुचिभेदश्चापि प्रवर्तते, तेन कदाचित् संक्षेपप्रिया मानवा वर्णान् ह्रसयन्ति, कदाचिच्च विस्तरप्रिया वर्णान् वर्धयन्तीति स एव कालकृतो भेदः।

व्यक्तिकृतो विकारः

व्यक्तयोऽपि तथा दृश्यन्ते याः संयुक्ताक्षरादीनां ङकारणकारादीनां वा सम्यगुच्चारणं न कर्तुं शक्नुवन्ति। ततश्च कश्चित्तथाविधान् वर्णान् त्यजन्ति वा तत्साहाय्याय अपरान् वर्णानुपादधते, तत्तत्साधुशब्दाज्ञानवशाच्चापि विपरीतं भाषन्ते। तादृशव्यक्तिबाहुल्ये अनुकरणपरेषु वा जनेषु शब्दविपर्यासः स्फुटं दृश्यते। यथा "स्त्री" शब्दं संयुक्ताक्षरादि न सर्वे समुच्चारयितुं प्रभवन्तीति तत्साहाय्यायेकारमादौ संयोज्य 'इस्त्री' इति वदितुं प्रवृत्ताः। तत्रापि च सकारोच्चारणे क्लेशात् तद्विपर्यासे "इत्थी" इति प्राकृतं रूपं संपन्नम्। "तिय" "तिया" "तिरिया" इति क्रमेण हिन्दीभाषायाम्,

१. का० मी० अ० १०। २. का० मी० अ० १०।

"तीमी"ति पंजाब-प्रदेशे। तथैव आंगलभाषायाः "स्टेशन" शब्दोऽपि "इसटेशन" इति "सटेशन" "टेशन" इति च रूपान्तराणि गतः। "लेन्टेर्न" शब्द उच्चारणदोषादज्ञानाच्च "लाल्टेन" रूपतां सर्वत्रैव प्राप्तः। बहुत्र चापभ्रष्टान् शब्दान् पुनः स्वाभिमतशब्दरूपेण शुद्धीकुर्वन्तीत्यपि दृश्यते। यथात्रैव रक्तवाचक-लालपदं शुद्धं मत्वा नियोजितम्। स्वस्वरूपेण शुद्धा अपि शब्दाः अर्थान्तरे प्रयुक्ता असाधुतामुपयान्ति। तदेतद् भर्तृहरिणाप्युक्तम्—

शब्दसंस्कारहीनो यो गौरिति प्रयुयुक्षते।
तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनम्॥
अस्व गोण्यादयः शब्दाः साधवो विषयान्तरे।
निमित्तभेदात् सर्वत्र साधुत्वन्तु व्यवस्थितम्॥[१] इति।

एवं व्यक्तिगतेनासामर्थ्येनातितमां शब्दपरिवर्तनं भवति भाषासु। तथा चोक्तं तेनैव—

'दैवी वाग व्यवकीर्णेयमशक्तैरभिधातृभिः'[२]

इत्यादिनेति।

विचालिनो वर्णाः

वर्णा अपि केचन तथास्वभावा ये विपर्यासे साहाय्यं ददति। विपरिणामो विपर्यास एव वा तेषां स्वभावः, रेफ ऊष्माणो वर्णाश्च तेषु मुख्याः। श्रुत्याप्यूष्मणां भाषाजनकत्वे प्राधान्यमुक्तम्—

"अकार एव सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवतीति।"[३]

भगवान् पाणिनिरपि ऊष्मणां नानाप्रकृतित्वमाह—

ओभावश्च विवृतिश्च शषसा रेफ एव च।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥[४] इति।

अत्रोष्मणः—ऊष्मावलविशेषः तस्य प्राधान्येनाभिव्यक्तिर्विसर्गे भवति, स च विसर्गो विभिन्नेषु स्थानेस्वष्टाभिर्विधाभिः परिणमत इति पाणिनेराशयः। उपलक्षणमिदमूष्मप्रधानो हकारोऽपि बहुधा विपर्यस्यन् दृश्यते। एषां चाष्टानां विभिन्नाः संज्ञा अप्याह याज्ञवल्क्यः—

---

१. वाक्य प० १।१४९—१५०। २. वाक्य प० १।१५६।
३. वै० म० स्फो० निरूपणम्। ४. पाणि० शिक्षा १४।

ओभावमागता योष्मा तां तु केलिं विनिर्दिशेत् ।
विवृतिप्रत्ययादूष्मा विज्ञेया विकटाननाः ॥
पादादौ च पदादौ च संयोगावग्रहेषु च ।
लीढातिलीढा विबुध्यैव शपसेषु प्रकीर्तिता ॥
जिह्वामूले च रेफे च विज्ञेया विकटा शठा ।
उपध्मानीयसहितां पुष्पिणीं तां विदुर्बुधाः ॥
अन्यत्र या भवेदूष्मा सुलभां तां विनिर्दिशेत् ।
ऊष्मप्राधान्यमेतस्मात्तस्मात्तां यत्नतोऽभ्यसेत् ॥[१] इति ।

अस्तु ! तथैव शपसा अपि विपर्यस्यन्तो दृश्यन्ते । किंच वर्णानां प्रथम-तृतीयाश्च वर्णा एतदूष्मसंयोगे द्वितीयचतुर्थतां गच्छन्ति, द्वितीयचतुर्थाश्चोष्मापगमे प्रथमतृतीयतामूष्मकृतमेव महाप्राणत्वम् । एतद् वर्णघटितानां च पदानां प्रायेण शीघ्रं विपर्यासो दृश्यते । यथा "गृह" पदे हकारो यदा गकारोपर्यागच्छति, ऊष्मयोगे गकारो वकारत्वं गतः, ऋकारघटिता रेफश्च अऊष्मत्करनन्तरं गतस्सन् अकारेण संयुज्यते, तदा "घर" इति रूपं भवति । तथा "प्रस्तर" शब्दे सकारस्योष्मणस्तकारोत्तरं गतस्य स्वभावे "पत्थर" इति भवति, यत् "हिन्दी" भाषायामवश्यं प्रयुज्यते । "भवति" पदे च भकारघटकस्योष्मणः पृथग्भावात् वकारस्य च लोपात् "होदि" "होत" "होता" इत्यादि रूपाणि गच्छन्ति । कुम्भकार शब्दे भकारघटकस्योष्मणः पृथग्भावात् ककारस्य च लोपात् "कुम्हार" इति रूपं प्राप्नोतीत्यादि बहुतरमूष्मणो विपर्यायो दृश्यते ।

रेफस्तु संस्कृतात् प्राकृतनिर्माणे प्रायेणास्तमेव गच्छति—आर्य-अज्ज, पुत्र-पुत्त, मूर्ति मूर्ती, धर्म-धम्म, कर्म-कम्म, वर्म-वम्म, चर्म-चम्म, कर्ण-कण्ण, पर्ण-पण्ण, सर्प-सप्प, दर्दुर-दद्दुर इत्यादौ ।

मूर्धन्यश्च षकारः प्रायेण खकाररूपतां याति पुष्कर-पोक्खर, पोक्खर, रक्ष-रक्ख, राख, बुभुक्षा-बुहुक्खा, भूख, प्रत्यक्ष-पच्चक्ख, भिक्षा-भिक्खा, भीख, कुक्षि-कुक्खि, कोख, सदृक्ष-सारिक्ख, इक्षु-इक्ख, ईख, ऊख, वृक्ष-रुक्ख, रूख, इत्याद्या बहुशो द्रष्टव्याः ।

संस्कृते बहुशः श्रूयमाणानि संयुक्ताक्षराणि कोमलप्रकृतिषु भाषासु विलुप्यन्त एव, स्वापेक्षया पूर्वं च वर्णं दीर्घीकुर्वन्ति । यथा—

अद्य-अज्ज, आज, कार्य-कज्ज, काज, अष्ट-आठ, सप्त-सात, अक्षि-आँख, अग्नि-आग, कृष्ण-कान्ह, कर्ण-कान, पार्श्व-पास, चन्द्र-चन्द, चांद,

---

१. वर्णसमीक्षा पृ० ५० ।

पत्र-पत, पात चक्र-चक्क, चाक, चक्की, नग्न-नग्ग, नंगा, नागा, मौक्तिक-मोत्तिअ, मोती, सपत्नी-सवत्ती, सौत, इत्यादि ।

पदस्यान्ते श्रूयमाणानि च मन्ध्यक्षराणि क्वचिदन्येपि स्वराः साहाय्याय वर्णान्तरमुपाददानाः प्रायेण दृश्यन्ते । यथा गोशब्दस्य गावी, गोणी, गोतेत्याद्या अपभ्रंशा महाभाष्यकृतोदाहृता इति ।

एवं वैदिकीषु शिक्षासूष्मानिमित्ता एते ध्वनिविशेषाः प्राकृतिका विवृताः—विवृतिः, स्वरभक्तिः, यमः, अनुस्वारः, रङ्गः, हुंकारः, नादः, अन्तःस्था इति । ये हि वैयाकरणैरनुनासिकाः इत्युच्यन्ते, वर्णेषु प्रायेण न परिगण्यन्ते, तेऽपि शब्दपरिवर्तने बहुतरं भागं गृह्णन्ति । यथा हि "सहस्र-शीर्षा" इत्यत्र 'सहस्रशीर्षे' तिवाजसनेयिभिरुच्चार्यते । तथैव "ईर्षा" शब्दस्थाने स्वरभक्त्या ईरिषा, "तृषा" इत्यस्य स्थाने "तिरिखा", "श्लेष्म-शब्दस्थाने, सलेक्ष्म, "इन्द्र" इत्यत्र "इन्दर", "प्रसाद" शब्दस्थाने च "पसाद" इति भाष्यभाषायां प्रयुज्यते । एवं स्वरभक्तिसाहाय्येनैव क्रमेण पृथ्वी-पृथिवी-पृथवीरूपता प्राप्ता स्वर्णश्च-सुवर्णरूपमजत । किञ्च स्नान-अस्नान, सहान-अ-ह्नी, स्थान-अस्थान इत्याद्या नानाविधाः शब्दाः स्वरभक्तिसाहाय्यादेवोपलभ्यन्ते लोके । तथैव यमसन्निधानेन सिंह शब्दः सिंघल्लपतां गत इत्यादि बहुतरं भाव्यम् ।

वर्णदोषाः

"किंचैवं संस्कृते ये वर्णदोषाः परिगणिताः" संवृतः, कलः, ध्वातः, गुणीकृतः, अम्बृकृतः, अर्धकः, अस्तः, निरस्तः, प्रगीतः, उपगीतः, क्षिण्णः रोमशः[1] "इत्याद्यास्तेऽपि संस्कृतान्निरस्ता अपि भाषान्तरव्यवहारेषु प्रसरन्तीति तत्कृतानि परिवर्तनानि क्रमेण बहुशो जायन्ते ।

तत्र दीर्घोच्चारणावसरे मध्यक्षरे ह्रस्वस्योच्चारणं संवृतत्वम् । कलः—स्थानान्तरनिष्पन्नः, "ध्वातः"—श्वासभूयिष्ठतया ह्रस्वोपि दीर्घः, "गुणीकृतः"—अविशिष्टः सन्दिग्ध एवेत्यर्थः । "अम्बृकृतः—" यो व्यक्तो-प्यन्तर्मुख इव श्रूयते, अर्धकः—दीर्घोपि ह्रस्वः, अस्तः—जिह्वामूले गृहीतः, निरस्तः—निष्कृतः, प्रगीतः—विनालेनोच्चारितः, उपगीतः—समीपवर्णा-न्तर्गीतानुरक्तः, क्षिण्णः—कम्पमानः, रोमशः—गम्भीरः, इत्येतेऽर्थाः जायन्ते । ये तावद् वर्णलोप-वर्णोपजनादयो विकृतिहेतवोऽग्रे उदाहरिष्यन्ते ते प्रायेणैतेभ्य एव दोषेभ्यः सम्पद्यन्ते । अन्तत्वदशायां क्रमेण लोपो भवति ।

१. म० भा० पस्पशाह्नि० ।

यथा—खलु इत्यस्य 'खो' इति, लोकशब्दस्य 'लो अ' इति 'भवति' पदस्य च होदि. होई इति वा, तथैव प्रगीतत्वादिभिर्वर्णोपजनो जायते। यथा 'मुख' शब्दस्य 'माउथ' रूपता आंगल भाषायां 'नवन्' शब्दस्य च 'नाइन' रूपतेत्यादि।

एवं रीत्या वर्णानामपि केषां विपर्यासस्वभावोऽस्तीति सोयं भाषान्तर निर्माणे हेतुत्वमुपयाति।

पाणिनेर्नियमस्य व्यापकत्वम्

भाषासु शब्दविपर्यासस्य केऽपि स्थिरा नियमा अद्यावधि न केनापि निरूपिताः। केवलं संस्कृतशब्दनिर्माणे प्रकृतिप्रत्ययादियोगे, पदस्य पदान्तर-योगे वा ये भवन्ति विकारास्तेषां नियमाः संस्कृतव्याकरणे प्रदर्शिताः। प्राकृतशब्दनिर्माणे च ये ये विकारा भवन्ति तेषां नियमाः प्राकृतव्याकरणेषु दर्शिताः, परं सर्वभाषानिर्माणोपयुक्ताः साधारणनियमास्तु न कुत्रापि संगृहीता दृश्यन्ते। वस्तुतो विचार्यमाणे स्थिरनियमनिर्माणमत्र दुष्करमेव प्रतीयते। प्रकृतेर्नियमानां मनुष्येण परिच्छेदासंभवात्।

इदन्तु दृश्यते ये नियमाः पाणिन्यादिभिः सन्ध्यादिषु प्रदर्शितास्ते व्यापकरूपेण तत्तत्सूत्रप्रदर्शितानुपाधीन् विहाय स्वातन्त्र्येणापि भाषानिर्माणे साहाय्यमादधाना दृश्यन्ते। तेन प्राकृता एव विकारा यावदुपलम्भं सूत्रकारै-र्निर्दिष्टा इत्यपि सिद्ध्यति। यथा 'उदः स्थास्तम्भोः पूर्वस्य'[1] इति सूत्रेण उद्-उपसर्गात् परः स्थाधातोः सकारो न तिष्ठतीति पाणिनिना प्रदर्शितम्, परमुदुपसर्गाविरहेऽपि स्थाधातुसकारलोपो दृश्यते—"पादस्थलम्-पत्थली, वनस्थलम्-वन्नथली, स्थानम्-थाना, ठांउ इति पंजाबीभाषायाम्, पार-स्थान-पथान, पठान, स्थिर-थिर, स्थाली-थाली, स्थल-थल, स्थापना-थापना, कायस्थ-कायथ, कैथ इत्यादि।

तथैव "झयो होऽन्यतरस्याम्"[2] इति वर्णविशेषेभ्यः परस्य हकारस्यैव चतुर्थवर्णत्वं पाणिनिना विहितम्, परं वर्णान्तरेभ्यः परस्यापि हकारस्य चतुर्थवर्णता बहुशो दृश्यते, द्वितीयवर्णत्वमपि चान्यत्रापि दृश्यते, यथा गुहा-गुफा, सिंह-सिंघ, इत्यादि।

यत्तु आधुनिकैर्भाषाविज्ञानविद्भिर्हकारस्य चतुर्थवर्णरूपा, द्वितीय-वर्णरूपा वा विकृतिर्नैव भवतीत्युद्घुष्यते, तत्त्वपर्यालोच्यैवेत्युदाहरणैरेभिः सुस्पष्टीभवति।

---

१. पाणि० सू० ८।४।६१। २. पाणि० सू० ८।४।६२।

विसर्गस्योकारत्वं च पाणिनिः उपाधिविशेष एवानुशास्ति, परं संस्कृत-शब्दानामन्तिमो विसर्गस्तत्तदुपाधिविरहेऽपि प्राकृतशब्देषु-ओकाररूपतां गतो बाहुल्येनोपलभ्यते। यथा—

देवः-देवो, तमः-तमो, गर्तः-गढ्ढो, चन्द्रः-चन्दो, दण्डः-डंडो, चैत्रः-चइत्तो, जीवः-जीओ, पारदः-पारओ (पारा), वृश्चिकः-विच्छुओ, तैलिकः-तैल्लिओ, घोटकः-घोड़ओ, (घोड़ा), इति हिन्दी भाषायामित्यादि।

एवं सन्ध्यक्षराणामेकारादीनाम् 'अय्' 'अव्' इत्यादिरूपता क्रमेण स्वरे पर एव च "एचोऽयवायावः"[1] इति पाणिनिना सूत्रिता, परं पदान्ते स्थितानामपि सन्ध्यक्षराणां यकारवरादिरूपा विकृतिक्रमेण दृश्यते। यथा—

नौ-नाव, गो-गाय, गाव इति फारसीभाषायाम्।

एवं च संस्कृतभाषाशब्देषु ये नियमाः पाणिनिप्रभृतिभिराख्याता-स्तएव व्यापकक्रमेण भाषान्तरनिर्माणप्रक्रियामपि बोधयितुमर्हन्ति विचार्य-माणाः। प्राकृतव्याकरणकृतामेवंविधा नियमास्तु विचार्यमाणा भाषा-विज्ञानस्य बहुतरमुपकारका भवितुमर्हन्ति।

शब्दपरिवर्तने यास्कमतम्

सर्वेऽपि शब्दपरिवर्तननियमाश्चतुर्धा विभज्य प्राक्तनैः शिष्टैः प्रदर्शिताः—"वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ" इति। एभिरेव चतुर्भिः प्रकारैः शब्दानां परिवर्तनं भवति। एतांश्च भाषाविज्ञानस्य जीवातुभूतान् तद्विज्ञानाचार्यो यास्कमहाभागो विशिष्य दर्शयति निरुक्तस्य द्वितीयाध्यायारम्भे। तत्रादिवर्णलोपः प्रथमो हेतुरुपात्तः "स्त" "सन्ति" इत्यादौ। अयमेवादिलोपः वर्णलोपो वा वर्णसमूहलोपो वा भाषान्तरीभावे बहुत्रालोक्यते। यथा—

संस्कृतम्		अंग्रेजी
गृहाः	हास	हाउस
आकाश	काश	स्काई[2]
सूर्य (सूर्य)		सन्
पृथ्वी	ऋथ	अर्थ
होरा	ओवर	आवर[3]

---

१. पाणि० सू० ६।१।७८।

२. शकारस्थानविपर्यासे सकाररूपतायाम् च 'स्का' उच्चारणभेदेन 'स्काई' इति जातः।

३. अद्यापि हकारलोपो लेखे 'एच्' वर्णविन्यासेन तत्र ख्याप्यते।

संस्कृतम्		फारसी
क्षपा		शब
क्षीर		शीर
		हिन्दी
क्षेत्र		खेत
वृक्ष	रक्ख	रूख
स्नेह	सनेह	नेह
अभ्यन्तर		भीतर
एकादश		ग्यारह
द्वादश		बारह
अपि		भी
अतसी		तीसी
आदित्यवार		इतवार

इत्याद्याः

अन्तलोपोऽपि द्वितीयो हेतुरूपान्तः "गत्वा" गतमित्यादि च तत्रोदाहृतम्। अयमपि च नियमः सार्वत्रिको दृश्यते, भाषान्तरशब्दा अनेन क्रमेण बहवो निष्पाद्यन्ते। यथा—

संस्कृतम्		अंग्रेजी
यूयम्		यू
वयम्		वी
मनुज	मनु	मेन
एक		ए
द्वि	द्व	टू
दिन	दे	डे
सूनु		सन
रश्मि		रे

संस्कृतम्		फारसी
हर्म्य		हरम
लोहित		लहू
सर्प	हर्प	हर
सूर्य		हूर
पाद		पा
द्वि		दो
त्रस		तो

इत्यादि ।

		हिन्दी
अभवत्	हुवीअ	हुआ
उत्तिष्ठ	उट्ठेहि	उठ
वर्द्धतास	वढहु	बढो
धान्य		धान
बलिवर्द	बइल	बैल
मौक्तिक		मोती
कपर्दिका	कवड्डिआ	कौड़ी
कण्टक	कन्ट ओ	काँटा
पश्चात्	पच्छा	पीछे
पार्श्व		पास

इत्यादि ।

एवमुपधायामर्थान्मध्ये लोपो वर्णलोपो द्विवर्णलोपो विकारो वा परिवर्तनहेतुतया यास्केनोक्तः, तस्य च जग्मतुः—राजा, याचामि (यामि) तृच इत्याद्युदाहरणान्युपात्तानि, सोऽपि विचार्यमाणो भाषान्तरेषु बहुधा लभ्युपलब्धः स्यात् ।

तद्यथा—

संस्कृतम्		अंग्रेजी
अष्टन्		एट
दशन्	दस्	टेन
नवन्		नाइन
त्वम्		दाउ
विधवा		विडो

इत्यादि ।

संस्कृतम्		फारसी
अहम्		अम
चत्वारि		चहार

इत्यादि ।

		हिन्दी
विज्ञप्ति		विनती
कपित्थ		कैथ
सार्थ		साथ
द्विगुण		दूना
चतुर्थ		चौथा
स्वर्णकार		सुनार
काष्ठ		काठ
पृष्ठ		पीठ
फाल्गुन		फागुन
कोकिल		कोइल
पादोन		पौन
ज्ञातिगृह	नाइहर	नैहर

इत्यादि ।

भट्टपादैरपि तन्त्रवार्तिके आद्यन्तांशलोप उपधालोपश्च भाषान्तरेषु बहुधोपलभ्यत इति सुस्पष्टमुक्तम्—

पदान्तराक्षरोपेतं कल्पयन्ति कदाचन ।
न्यूनाक्षरं कदाचिच्च प्रक्षिपन्त्यधिकाक्षरम् ।। [1]इत्यादिना ।

उदाहृतं च द्राविडभाषाया 'ओदनचोरित्युक्ते चोरपदवाच्यं कल्पयन्तीत्यादिकं संक्षेपेण, तदेतत्सर्वमुक्तमस्माभिः प्राग् भाषाभेदप्रकरणे ।

अथ आदिवर्णविपर्ययोऽपि शब्दविपर्यासहेतुतयोपन्यस्तो यास्केन । तस्य च ज्योतिः, घनः, बिन्दुः, वाट्यः इति चतुरुदाहरणान्युपात्तानि । अयमपि नियमः सर्वभाषासाधारणो दृश्यते । तत्र च तत्तद्देशप्रतिनियमोऽपि दृश्यते । उक्तं हि पूर्वम्–आंगलाः तवर्गस्थाने टवर्गमेव प्रायेणोच्चारयन्ति, तथैव जिन्दभाषायां सकारस्थाने हकारमेव प्रयोजयन्ति ।

यथा—

---

१. तंत्रवा० १।३।१० ।

संस्कृतम्		पारसी
सिन्धु	हिन्दु	हिन्दू
सप्ताह		हप्ता
सोम		होम
सूर्य		हूर
समक्षीरा		हमशीरा

इत्यादि ।

	अंग्रेजी
पितृ	फादर
भ्रातृ	ब्रदर
दुहितृ	डाटर
दन्त	टूथ
गौ	काउ
तरु	ट्री
ज्ञान	नालेज
पोत	बोट

इत्यादि ।

	हिन्दी
वाष्प	भाप
गृह	घर
यष्टि	लाठी
दोलिका	डोली
षष्ठी	छठ
महिषी	भैंस
मेष	भेड़

इत्यादि ।

एवमन्तविपर्यासोऽपि शब्दविपर्यासहेतुतया यास्केनोक्तः, तस्य च "ओघः, मेघः, नाधः, गाधः, बधूः" इत्याद्युदाहरणान्युपात्तानि। अयमपि च नियमो भाषान्तरेषु बहुधा समुपलब्धः स्यात्। यथा—

संस्कृतम्		अंग्रेजी
हृद्		हार्ट
पाद्		फूट
बन्ध		बाइण्ड
अद्रि		इट
निकट		नियर इत्यादि
		पारसी
अश्व		अस्प
मेष		मेश
पृष्ठ		पुश्त
अहि		मार
नाभि		नाफ
मास		माह
अप्		आब
पंच		पंज
गृभ		ग्रिफ्त
बाहु		बाज़
नमः	नमह, नमज,	नमाज़ [1]इत्यादि
		हिन्दी
कृष्ण		कान्ह
मेह		मेघ
मुख		मुह
नाथ		नाह
दधि		दही
छाया		छांह
साधु		साहु
जिह्वा	जिब्भा	जीभ
भिक्षा	भिक्खा	भीख
शय्या	सेज्जा	सेज
पुरुष		पुरुखा इत्यादि

१. विसर्गस्थाने प्रथमं हकारध्वनिः तदनु पारसीभाषानियमानुसारेण हकारो जकाररूपतां गतो बाहुबाजूवत्, ततश्च 'नमज' एव 'नमाज' इति वितानेनोच्चारितत्वादवगम्यतेऽत्र ।

यथा च वर्णापायाः बहुधोदाहृताः, एवं वर्णानामुपजनोपि दृश्यते। तदुदाहरणतया यास्केन-आस्थत्, वारः, भरूजेत्युपात्तानि। सोऽयमपि नियमो भाषान्तरनिर्माणे बाहुल्येन दृश्यते। यथा—

संस्कृतम्		अंग्रेजी
स्थान		स्टेशन
बन्ध		बाइन्ड
तारा		स्टार[1]
इङ्ग[2]		थिङ्क
वारि		वाटर
विंशति		ट्वन्टी
	इत्यादि।	
		फारसी
तारा		सितारा
भ्रू		अब्रू
चर्म		चिरम
कृमि		किरम
दंत		दंदान
भ्रम		वहम
ज्मा		जमीन
	इत्यादि।	
		हिन्दी
धर्म		धरम
स्वर्ण		सुवर्ण
शाप		श्राप
स्त्री	तिय	तिरिया
महिला		महिरारू मेहरारू
गुंजा	गुंगची	घुंघची
	इत्यादि।	

१. केचित्तु ताराशब्दार्थे स्तृ-शब्दोऽपि वैदिकेषु मन्त्रेषु दृश्यते तद् बहुवचनं 'स्तार'' इति 'स्टार' रूपतां गतमिव रान्ति।

२. इङ्गितेन चेष्टितेनाभिप्रायो बोध्यत इत्यादौ इङ्ग-धातुर्मनोव्यापारेष्वपि :श्यते प्रयुक्तः।

किंच यत्र स्वरसन्तानन्तरम् अन्तस्थवर्णा भवेयुस्तत्र तेषामन्तःस्थानां सम्प्रसारणं भवतीति यास्केन निरूप्यते। ऋतिः, मृदुः, पृथुः, इत्याद्याश्च शब्दास्तत्रोदाह्रियन्ते। अयमपि नियमो भाषान्तरीकरणे दृश्यते।

यथा—

संस्कृतम्	अंग्रेजी	संस्कृतम्	फारसी
द्वि	टू	द्वि	दो
विधवा	विडो	यव	जौ
		त्वम्	तो

संस्कृतम्		हिन्दी
ध्वनि		धुनि
स्वर		सुर
त्वरित		तुरन्त
स्वर्णकार		सुनार
द्विगुण	दुउण	दूना
स्वभाव		सुभाउ
विद्या		विदिआ
व्यञ्जन		विजन
व्यथा		विथा
व्यतीत		वितीत
प्रत्यक्ष		पतिछ
कल्याण		कलिआण, इत्यादि।

किंचान्यद् यास्केन निदर्शितं यत् पर्यायेषु केचिच्छब्दाः क्वचिद्देशे प्रसिद्धा भवन्ति। तत्रापि क्वचन मूलधातुर्व्यवह्रियते, क्वचित्तु धातोरव्यवहारेऽपि तज्जन्यानि नामानि व्यह्रियन्ते। तत्रोदाहरणं च तेनोक्तम्—गमनार्थक "शव" धातुः कम्बोजेष्वेव भाष्यते। आर्यास्तु मूलधातुमप्रयुज्यमाना अपि तद् विकृतिभूतं नाम "शव" इति मृतार्थे व्यवहरन्ति। एवं "दा" धातुश्छेदनार्थः प्राच्येष्वेव व्यवह्रियते। तद् दात्रमिति नाम तु उदीच्येषु प्रयुज्यते। स एव नियमोऽपि विचार्यमाणो भाषान्तरेषु बहुलतरशब्दनिष्पत्तये समुपयुक्तो भवति। यथा रात्रिवाचकः क्षपाशब्दो यत्र प्रयुक्त आसीत तत्र तदपभ्रंशभूतः ककारलोपेन षकार-पकारविपर्यासेन "शब" इति फारसी शब्दो रात्रिवाचकत्वेन प्रसिद्धिं गतः।

यत्र "नक्त" शब्दः प्रचलित आसीत् तस्मिन् देशे तदपभ्रंशभूतः "नाइट"[1], शब्दः प्रसिद्धिं गतः।

एवं भगिनी वाचकः स्वसृशब्दो यत्र प्रासिध्यत् तत्र तज्जन्यः "स्वसा" "सिस्टर"[2] इति शब्दः प्रयुज्यते। यत्र तु भगिन्यर्थे "समक्षीरा" शब्दः प्रासिध्यत् तत्र तज्जन्यः "हमशीरा"[3] "शब्दः प्रचलितो दृश्यते। यद्यपि समक्षीरा शब्दोऽद्यत्वे संस्कृतभाषायां न प्रयुज्यते, परं यौगिकार्थस्तस्य सुसंगत इति कदाचित् तत्प्रसारोऽनुमीयते।

एवम् अन्यविधा अपि नियमविशेषा यास्केन संसूचिताः, यथा 'अस्मिन् द्यवि' इति पदद्वयस्य संक्षेपेणाद्याक्षरमात्रव्यवहारे मध्ये व्यवह्रियमाणस्य विन्दोः कालवशेन विलोपे "अद्य" इत्येकं पदं निष्पन्नम्। एवं बहोः कालात् "शुक्ल दिवस" इति पदद्वयस्य स्थाने केवलमुभयोः पदयोराद्यक्षरमादाय व्यवहरन्ति "सुदि" इति संक्षेपक्रिया लोकाः। अपि नाम वहुल (कृष्ण) दिवसं ब्रवीति तथैव "वदि" इति संक्षेपः। इयं हि रीतिरद्यापि— आंगल-संस्कृतेरनुयायिषु दृश्यते यत्ते जी, पी। एस, के। आर, एन। ए, एन मिश्रा इत्यादि लघुशब्देनैव व्यवहरन्ति वहलतरमिति।

एवं क्वचिदनर्थकोऽभ्यासो भवति, प्रकृतिवशेनैव शब्दो द्विः प्रयुज्यत इत्यपि नियमो यास्केन दर्शितः, "कद्रा" इत्यस्य 'चकद्र', "ख्या" इत्यस्य 'कक्ष' इत्यादीनि चोदाहरणानि तेन दर्शितानि। अयमपि नियमः पर्यालोच्यमानो भाषानिर्माणे बहुतरमुपकुर्यात्।

एकं चेदं महद् वैलक्षण्यं निरुक्ते प्रदर्शितं यत् कश्चिच्छब्दः कांचित् प्रवृत्ति-निवृत्तिमादाय क्वचिन् प्रयुज्यते। स तु सम्बन्धवशादन्यत्रान्यत्र क्रमेण बहुदूरं गच्छति। यथा—उत्साहार्थको दक्ष धातुः संस्कृते सुप्रसिद्धः। तेन सव्येतर-स्मिन् बाहौ दक्षिणशब्दः प्रवृत्तः उत्साहशीलत्वात्। सूर्याभिमुखं तिष्ठन् स हस्तो यस्यां दिशि भवति सा दिक् तत्सम्बन्धेन दक्षिणदिगित्याख्याता। परिभ्रामन् पुरुषः यदा स्वदक्षिणं हस्तमेवोपास्यदेवदिशि गच्छति सा प्रद-क्षिणेत्यपि तेनैव सम्बन्धेनोक्ता, प्रदक्षिणाक्रमेण यज्ञे ऋत्विजामागमनं

---

१. ककारस्य वा गकारस्य लोपख्यापनं "जी" "एच" वर्णविन्यासेनाद्यापि तस्मिन् शब्दे दृश्यते।

२. टकारेकारोपजनोऽत्र सुस्पष्टः।

३. सकारस्य हकाररूपता क्षस्य तु ककारलोपेन ष श रूपतानेकत्र दर्शिता।

भवतीति तत्सम्बन्धेन ऋत्विग्भ्यो दीयमानं धनमपि दक्षिणाशब्दाभिधेयम-भूदिति।

अनेन क्रमेण यदि शब्दानां दूरतरगतिमन्विष्येत् तदा तत्तद्भाषा संधानं करतलामलकायितं स्यादिति सुस्थिरं विभाव्यम्।

शब्दविकृतिकारणानि

श्रीमन्तो विद्यावाचस्पतिमधुसूदनशर्ममहाभागाः स्वीयायां वर्णसमीक्षायां अन्यान् विकृतिहेतून् विवृण्वते।

तत्र हि लेखसादृश्यम्, उच्चारणसादृश्यम्, प्रयत्नदोषः, उच्चारण-नियमानिश्चयः, भेदकरणविवक्षा, अप्रसक्तिः, वाग्व्यवहारलाघवं चेति सप्त वर्णानां स्वावस्थापरिभ्रंशकरणान्युपात्तानि। एभिर्निमित्तैर्वर्णापत्ति–वर्ण-विपर्यय–वर्णागम–वर्णनाशा जायन्त इति भावः।

लेखसादृश्यम्

तत्र लेख (लिपि) सारूप्यम्—नागरीलिपौ थधयोः, मभयोः, यमयोः, यपयोरित्यत्र समुपलभ्यते। अत एवैतेषां वर्णानामुट्टंकने मुद्रणे वा सावधा-नेन भवितव्यमित्युच्यते। तत्र तावत् "थधयोः" अन्योन्यरूपेण विपर्यय-स्त्वेवं दृश्यते। तथाहि वेदप्रसिद्धानां गाथि-विथुरादिशब्दानाम्-गाधि-विधु-रादिरूपेण परिवर्तः संस्कृते। किंच पूजार्थकातिशब्दोपसृष्टाद्दधातेः "अतिधि" शब्दः प्रतिविधिनिध्यादिशब्दवत् साधु भवति। स खलु लिपिसारूप्यम-वाप्य "अतिथि" रूपतां यातः। मभयोर्लिपिसादृश्यात् कदाचिन्मङ्गल-शब्दो भङ्गलतां याति, भद्र-शब्दश्च मद्रतामिति। एवं यमयोः सादृश्यात् ज्याशब्दएव ज्मारूपतां गतः। पुष्यरागशब्दस्य पुष्परागभावस्तु यपयोरक्ष-रयोः साम्यादिति।

उच्चारणसादृश्यम्

अयमपि हेतुः शब्दविपर्यासे विपरिणामे वा विशेषेणोपलभ्यते। एतत् प्रभावादेव वेश-मशीत्यादीनां शब्दानां "वेष" मषीत्यादयः, कोशस्य कोषः, वेदप्रद्धिस्य नक्षत्रविशेषवाचकस्य "श्रोणी" शब्दस्य श्रवणरूपेण, "ऋक्थ" शब्दस्य च "रिक्थ" रूपेण विपर्यासः। किंचोच्चारणसारूप्येण वर्णानां जात्य-न्तरेऽवतारो द्वेधा प्रवर्तते-उपचारदोषात्, मातृकादोषाच्च। तत्रास्पष्टोच्चा-रणविरहाभावाच्छ्रोतुरन्यथाग्रहो भवति, तद्व्यवहारपरम्परया च रूपान्तरता जायते स उपचारदोष इति प्रोच्यते। एतदुदाहरणं चोपर्युक्त "कोश-कोप" इत्यादिकमेव।

अथ यत्र भाषान्तरशब्दो भाषान्तरे कथञ्चिदुपनीयते, तत्र यदि भाषायां तस्यां तदुपयुक्ता लिपिर्नोपलभ्यते। तदा तल्लिपिसम्बन्धात् तदुच्चारणानुवृत्त्या कालान्तरे तत्र विकारः स्वाभाविको भवति। यथा वैदिकभाषायाः शब्दाः, संस्कृतभाषामातृकयोपनिबध्यन्ते। तदुपयुक्ताश्च सर्वा लिपयो न पुनरत्रोपलभ्यन्ते। अतएव अकारस्य संवृतस्य, दुःस्पष्टान्तःस्थानां वर्णानाम्, हुंकारस्य रंगस्य, कतिपयसन्ध्यक्षराणां च संस्कृत-प्राकृतयोरुच्चार्यमाणानामपि वैदिकशब्दानां संस्कृतलिपिप्रभावाद् विपरिणामो दृश्यते। यथा "मूढैरमूढान्" इत्यस्योष्मणो दुःस्पष्टस्य उकारस्य सोष्मरेफत्वे प्राप्ते तल्लिपेरभावाद् रेफस्यैव लिपिप्रवृत्तौ "मूरैरमूरान्" इति श्रूयते।

एवम् आंगलादिभाषासु तवर्गलिपेरभावात् तत्स्थाने टवर्गध्वनिरेव संश्रूयते। यद्यपि (टी) इत्यनेन तकारटकारयोर्बोधः, तथापि टकारस्यैव प्राधान्यं तत्रेति 'ड्रबे' 'टिवारी' पदादवगम्यते।

यत्नदोषः

शील संरक्षते यस्मिन् कर्मणि तदिदं जीवनोपाधिभूतं कर्तव्यं "शीलपम्" (पातेरक्षणार्थादालोपकरणेऽकारः प्रत्ययः) इति रूपं भवति, परं यत्नदोषात् शिल्पमिति प्रयुज्यते।

एवं काचभाजने नासामले वा वाच्ये सिंहाण-सिंघाण-शिंघाणशब्दाः प्रायेण वर्तन्ते संस्कृते। तथा सिंह इति वक्तव्ये सिंघ इति हिन्दीभाषायाम्, संहार इति प्राकृते। तथा च समानप्रतिपत्तिकयोरपि कस्यचित् संस्कृतभाषायां प्रवेशः कस्यचिन्नेत्यत्रोपचारविच्छित्तिरेव कारणमवगम्यते। "आवा मन्नूतनायकम्" इत्यादि ऋग्मन्त्रेषु श्रूयमाणस्य मन्नुशब्दस्य लोके मङ्नुरूपता दृश्यते। "द्राग मङ्नु सपदि द्रुते" इत्यादौ। एवं द्योतिरशब्दस्य ज्योतिरिति, शुक्रस्य शुक्ल इति, जया शब्दस्य जवा इति, पृथ्वी शब्दस्य पृथवी-पृथिवीभावौ, प्रत्नं-नूत्नयोः-प्रतन-नूतनभावः, स्थिरशब्दस्य "शिथिर शिथिल" भावौ चोच्चारणसामान्यात् प्रयत्नदोषाद्वा भवतीति ज्ञायते।

किंच "कश्यपो वै कूर्मः" इति शतपथब्राह्मणे कमठार्थकतया प्रसिद्धस्य तालव्यशकारघटितस्य कश्यपशब्दस्यैव शययोः परिवर्तनेन, यस्य जकारोच्चारणात् शस्य छत्वमिति कच्छपशब्दः संपद्यते। तदनुरोधाच्छरीरावयववाचकोऽपि "कश्य" शब्दः कच्छरूपेण परिणतः। एवम् ऋषिः-ऋष्यः-ऋश्यः-ऋच्छ इति परिवर्तनक्रमोऽपि ज्ञेयः।

अपि च श्रयतेः श्रिरसिति प्राप्तौ कालात् प्रयत्नदोषादिकारदीर्घत्वम्—श्रीरसिति। पुनश्च कालात् प्रयत्नदोषादेव शरयोर्मध्येऽकारसंनिवेशः, ततश्च शरीरशब्दसिद्धिः, निरुक्तकारा यास्कास्तु हिंसाकर्मणः शृधातोः शरीर-शब्दं व्युत्पादयन्ति, तत्रापि पृषोदरादित्वात्समाधानम्, उणादिसूत्रेण वा संसाधनमुपर्युक्त प्रक्रियामेवान्ततोऽनुगृह्णाति। अतश्च शरीर शब्दनिर्वचने प्रयत्नदोष एव विज्ञेयः।

एवं प्रयत्नदोषादुच्चारणसौकर्याच्च गो—इन्द्रः, गो—अध्यक्ष इत्यादि प्रयोक्तव्ये "गवेन्द्रो" गवाध्यक्ष इत्यादिपदानां प्रयोगो बहूपलभ्यते। अस्य गोशब्दस्योच्चारणे च विचित्रचमत्कारस्तत्र तत्र दृश्यते। तथाहि—गो-शब्देन तावत् ग—अ—उ, इति गकाराकारोकारास्त्रयो ध्वनयः प्रसिद्ध्यन्ति। तत्र क्वचित्ते एव यथास्थितं प्रयुज्यन्ते। यथा "गोधनम्" क्वचित्तु अकारो विलुप्यते, यथा 'चित्रगु' 'अगुः'। क्वचिदकारो नोच्यते, यथा—'ग्राम्' 'गाः'। क्वचित् पुनरकारोकारयोर्मध्येऽकारान्तरं विकरणम् यथा—"गौः" 'गावौ'। क्वचिदकारोकारयोरुत्तरमकारोपजनः, तेनाऽकारान्तो गवशब्दः संपद्यते, यथा "पुंगवः" "संगवः" इत्यत्र। अयं च गवशब्दः स्त्रियां गौरी, वृषलीत्यादिवदीकारान्तः प्रसिद्ध्यति, यथा "चित्रगवी" "दुष्टगवी" इत्यादौ।

किंच स्वरान्तरसन्धौ गोशब्द (ग—अ—उ) वैलक्षण्यन्तु क्वचिदुकारस्य परकार्यप्रवेशः, यथा—"गवीशः" "गवे" इत्यत्र। क्वचिदुत्तरस्वरस्य स्वकार्यप्रवेशनम्, यथा "गोऽग्रम्" इत्यत्र। एवं च क्वचित् स्वरे परेऽपि यथास्थितं रूपमुपलभ्यते यथा "गो अग्रमिति। ततश्चेमे गोशब्दभेदा उच्चारणसौकर्यनिबन्धनप्रयत्नदोषादेव तत्तद्वर्णसांनिध्यादसांनिध्याद्वा जायन्ते। तदनु तदनुशासनं भवतीति ज्ञायते।

इदं चोच्यते यत्—अयं गोशब्दो "ग धातो रूप्रत्यये संपद्यते, स "ग" धातुरपि गकाराकारकूटात्मकः क्वचिन्निरपेक्ष एव वर्णान्तरेण प्रयुज्यते, यथा "गौः" "दुर्गः" "अगात्" इत्यत्र। जग्मतुः जग्मुः इत्यत्र तु अकारमात्मीयं त्यजन् मकारेण संभूय प्रयुज्यते। क्वचिच्चाकारमाददान एवं मकारेण, यथा "आगमः", "आगम्य, अगमत्" इत्यत्र। एवं क्वचित् तकारेण यथा आगत्य गत्वा इत्यत्र। अपि नाम क्वचित् तकारशकाराभ्यां युगपत् संयोजिताभ्यां संभिद्य प्रयुज्यते, यथा गच्छति, गच्छन्, गच्छ, इत्यत्र। तदेवं व्यवस्थया तत्र तत्र अकारो वा, मकारो वा, अकारमकारौ वा, अकारतकारौ, अकारत-कारशकारा वा। (अ, म, अम, अत, अतश) इत्येतैः स्वरूपकरणैर्वर्णैः प्रसज्जितो गकारो गमनमर्थमभिधत्त इति यत्नदोषो व्याख्यातः।

अनिश्चयः

उच्चारणविषमानिश्चयादपि वर्णाः शब्दा वा विकृतिमालभन्ते। तत्र तावद् भ्वादावाक्रोशे—"विट" धातुः पठ्यते। अपि च तत्रैव "हिट" इति पाठान्तरतः पठ्यते, एवं कण्ड्वादौ असु—असू इति, इरस् इमस् इति च पाठान्तरतः पठ्यते। तत्र न ज्ञायते कस्साधीयान् इति। एवमेव "आम्रे फले शलाटुः स्यात्" इत्यमरकोशे "शलाटुः" शब्दः, अन्यत्र "उदुम्बरेण सटालुद्रप्सेन सीमन्तोनयनं विदधते पारस्करादयः" इति वाक्ये च "सटालुः" शब्दो दृश्यते। तथा च लकारटकारयोर्वैपरीत्यं स्फुटं प्रतीयते, ततश्चानुमीयते दृढं यदवश्यमेतयोरेको विकृतिसिद्धः शब्दः। तदनिश्चयाद् व्यवहारसांकर्यं प्रसज्यते। एवमेव—

एषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥

इति पद्ये गूढात्मेत्यस्य स्थाने गूढोत्मेति व्यवहारो लिपिदोषादेव प्रचलितो दृश्यते। पुरा क्वचित् पुस्तके ओकारेण गर्भितोऽयं शब्दो मुद्रित आसीत्, ततः पारस्परिकव्यवहारादद्यापि समुपलभ्यते। यद्यपि शब्दोऽयं व्याकरणसरणीं नानुगच्छति, तथापि भगवतः पाणिनेः "पृषोदरादीनि यथोपदिष्टम्[1]" इति सूत्रं किं किं न साधयतीति को वा वक्तुं समर्थः। निरुक्तयः प्रायेण तदेवानुगच्छन्ति। तथा च वर्णविकृतेर्गूढोत्मेति रूपं सुतरां सम्पद्यते।

अन्ये त्वाहुः—

आत्मशब्दपर्यायवाची "त्मा" शब्दोऽप्यस्ति 'त्मना देवेषु विविदे मितद्रुः" इत्यादौ भूयसा प्रयोगदर्शनात्। नचाऽऽदेराङो लोपेन तत्साद्धर्वक्तव्या, उभयविधव्यवहारे विशेषादर्शनात्, एकस्यान्यविकारकल्पने बीजाभावात्। आङा रहितस्य लोके प्रयोगाभावस्तु भाषायां तदप्रवेशादेव ज्ञेयः, यथा "देवासो" ब्राह्मणासः, पिबध्यै, अस्मे, इत्यादिशब्दानां छन्दोमात्रगोचरत्वम्। एतमेतस्य "त्मा" शब्दस्य छान्दसत्वं द्रष्टव्यम्।

यत्तु पाणिनिना "मन्त्रेष्वाङ्यादेरात्मनः"[2] इत्युक्तम्, तत्त्वेतच्छिक्षासौकर्यानुरोधात्, न तु पाणिन्याज्ञया तत्राकारलोपो भवति। यथा हि पाद—पद्, इत्यादीनां भिन्नानामेव शब्दानां प्रयोगनियमाय स्थान्यादेशभावः पाणिनिना प्रक्लृप्तः, तथा प्रयोगनियमार्थमेवेहापि लोकप्रक्रिया समाश्रितेति न ततो विरोधः। तथा च प्रकृते पदद्वयमसमस्तं सिद्धं भवति। मध्ये

१. पाणि० सूत्र ६।३।१०९। २. पाणि० सूत्र० ६।४।१४१।

च तयोर्निर्देशफलकोऽकारनिपातो वितर्कार्थे वर्तते। तथा च "गूढो नन्वात्मा" इत्यर्थे "गूढोत्मा" इति प्रयोगः भावनीयः। इत्थमुपपत्तौ जातायां गूढोत्मशब्दैक्याभिमानः केवलं साहसमात्रम्। तदेवमनिश्चयादपि शब्देषु विकारा भवन्तीति जातम।

विवक्षा

हेतुना चानेन शब्दविपर्यासो भवति, यथा अभिपूर्वकेक्षणशब्दसंपन्नात्, "अभीक्षण" शब्दादर्थविशेषप्रतिपत्त्यर्थं क्षकारस्याकारो लुप्यते, तेन अभीक्ष्णमिति सिद्धम्, तस्य भावे "आभीक्ष्ण्यम्" इति रूपं भवति। अत्र यत्नदोषोऽपि संभाव्यते। वै शब्दसिद्धिश्च विवक्षणादेव भवति, "एव" शब्द एव विपर्यस्यन् (व-ए) "वै" रूपतां गतः। अन्यत्राप्येवं वर्णविपर्ययात्-शब्दसिद्धिं मन्यन्ते। तदुक्तम्।

हिंसि-धातोः सिंहशब्दो वश-कान्तौ शिवः स्मृतः।
वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथा॥ इति।

किंच उह्यतेऽनेन तदिदं वक्षो बलम्, बलेनैव सर्वं वहति। तात्स्थ्यात्ताच्छब्द्यमिति कृत्वा कण्ठादिहृदयस्थाने बलक्षेत्रभूते वक्षःशब्दः प्रवृत्तः। तदनु तस्य वक्षसो मेरुदण्डद्वारा पार्श्वद्वयभागे विवक्षिते विवक्षणादेव वकारस्य पकारभावात् "पक्षस्" शब्दः सिद्धः। तदेवं विवक्षावशाच्छब्दविपरिणामो निरूपितः।

अप्रसक्तिः

अप्रसक्तिः सप्तधा भवति—प्रतिबाधात्, प्रतिक्षेपात्, रंजनात्, विक्षेपात्, अभिभवात्, आक्रमणात्, आक्षेपाच्चेति।

तत्र प्रतिबाधात् स्पर्शभेदविकारो भवति, यथा दाक्षिणात्याः 'कागद' शब्दस्थाने 'कागल' इति व्यवहरन्ति। प्रतिक्षेपात्तु स्थानभेदविकारः, यथाऽत्रैवान्ये "कागज" इति व्यवहरन्ति। एवमन्येषामपि रंजनविक्षेपादीनां "स्त्री इस्त्री, स्थूल, उस्थूल" इत्यादि चोदाहरणानि प्रायः प्रोक्तान्येवेति विशेषतया ततोऽवगन्तव्यम्।

वाग्व्यवहारलाघवम्

अयं च हेतुः सर्वतोऽधिकं शब्दपरिवर्तनं प्रयोजयति, संयुक्तक्षराणि प्रायेणोच्चारणलाघवादेव परिणमन्ते। 'आदित्यवार" इत्यस्य स्थाने "इतवार" "अतवार", इति। वारिवाहक इत्यस्य स्थाने "वलाहक" इति चोपर्युक्तं वाग्व्यवहारलाघवमेवं प्रयोजयति।

एवमद्यत्वेऽपि प्रथम-द्वितीयकक्षीया बालकाः किंवा युवानः "मास्टर साहब" इति प्रयोक्तव्ये "माट्साहब, मास् साब" इति वा सुखेन प्रयुञ्जते। तदेवं वाग्लाघवं भाषाविकृतिनिमिते विशिष्टं स्थानम् भजत इति।

अत्र संस्कृतभाषाशब्दानां स्वरूपनिष्पादनस्य सन्ध्यादेश्च वैज्ञानिक-प्रक्रिययोपपत्तिः प्रायेण दर्शिता। एते नियमाः संस्कृताद् भाषान्तरोत्पत्ता-वपि बहुधा नियोजयितुं शक्यन्ते। "नामानि धातुजानीति" सर्वस्यापि शब्दस्य केनचिद्धेतुनैव प्रवृत्तिरित्येवंविधो नैरुक्तानां सिद्धान्तः प्रायेण विद्यावाचस्पतिमहाशयैर्विवृतः। तास्ता निरुक्तयः केवलं निरुक्ते प्रदर्शिताः, शब्दपरिवर्तनन्तु कया परिक्रियया भवतीत्यत्र निदर्शितम्।

परिवर्तनान्येवं विधानि क्वचिदादिभूते शब्दे एव जातानीति तादृश-प्राकृतपरिवर्तनं सोढ्वैव शब्दप्रयोगो जातः। क्वचित्तु पूर्वं शब्दप्रयोगे पश्चादपि परिवर्तनं जातम्। क्वचिदेकविधः शब्दः प्रयुक्तः पश्चान्नाना रूपतां गत इत्यपि निदर्शनान्यत्र दर्शितानि।

महति महति काले एवमनेकविधानि परिवर्तनानि संस्कृतभाषायां जातानीति को वा नानुमन्येत। व्याकरणनियमनिबन्धनानन्तरं तु परिवर्तित-शब्दानां संस्कृतभाषायां प्रवेशो वारितः। परिवर्तिताः शब्दाः भाषान्तरं जनयामासुः, तत्रापि परिवर्तनेष्वेवंविधा नियमाः समन्विताः प्रतीयन्त एव सति सूक्ष्मनिरीक्षण इति भाव्यम्।

हिन्दी-भाषोत्पत्ति :—

अथ येयमद्यत्वे राष्ट्रभाषासिंहासनमधिरूढाऽस्माकं हिन्दी भाषा, तस्या अप्युत्पत्तिविषये किंचिद् विचार्यते। इयं हि संस्कृतात् प्राकृतापभ्रंश-क्रमेणोत्पन्नेति प्रायेण सर्वेषां भाषातत्त्वविदां घण्टाघोषः। संस्कृतान्मागधी अर्धमागधी वा प्राकृतम्, ततोऽपभ्रंशभाषा, ततो हिन्दी भाषेति क्रमं निरूपयन्ति। तत्र हिन्दी भाषायां प्रयुज्यमानानि क्रियापदानि प्राकृत क्रमेणैव निष्पन्नानीति सत्यं प्रतीयते। यथा—

संस्कृतम्	प्राकृतम्	हिन्दी[1]
भवति	भोदि, होदि होइ,	होइ, होत, होता
भविष्यति	होहिइ	होइहि, होगा
भवतु	होज्जउ	हो जाउ, हो जाहु, होजावो
अभवत्	हुवी अ	हुआ
शोभते	होहदि, सोहइ,	सोहत, सोहता है

१. अत्र हिन्दीपदेन प्राचीनार्वाचीनयोर्ग्रहणमित्यवधेयम्।

संस्कृतम्	प्राकृतम्	हिन्दी
उत्तिष्ठ	उठ्ठेहि	उठ
अतिष्ठन्	ठाही	ठाढी, ठाढो, ठहरी
वर्द्धताम्	वढढहु	बढहु, बढो
स्मृत्वा	सुमरिअ	सुमिरि
कारयति	करावेइ, करावेदि	कराइ, करात, कराता है
कार्यते	कराविज्जइ	कराइयत, कराया जाता है
कारितम्	कराविअ	कराया

इत्यादि ।

तथैव नामान्यपि कानिचित् प्राकृतक्रमेणायातानीति स्पष्टं प्रतीयते । यथा—

शुष्क	सुक्ख	सूखा, सूका
बुभुक्षा	बुभुक्का	भूख, भूक
दधि	दहि	दही
घृत	घिअ	घी
शय्या	सेज्जा	सेज
गृहम्	घरम्	घर
तस्मात	ता	तो
यत्	जो	जो
तद्	सो	सो
त्वम्	तुमम्	तुम
द्वौ, द्वे	दुवे	दो
त्रयः–त्रीणि	तिणि	तीन
चत्वारः	चउरो	चार
अधः	हेट्ठ	हेंठा, हेठ[1]
ईदृशः	इरिसो	ऐसो, ऐसा.
ऋतु	रितु	रितु[2]
शरत	सरदो	सरद
वर्षा	वरिसा वासा[3]	वरसा, वरषा

---

१. भोजपुरी हिन्द्यां पंजाबप्रदेशेच सुप्रचलितोऽयं शब्दस्तस्मिन्नर्थे ।

२. "बरषा बिगत सरद रितु आई" इति ।—तुलसीदासः ।

३. अपभ्रंशपद्येऽयमुपलभ्यते शब्दः—

हिअड़ खुडुक्कइ गोरडी गयणि चुडुक्कई मेहु
वासा-इति,पवासु अह विसमा संकहु एहु । इति ।

संस्कृतम्	प्राकृतम्	हिन्दी
एतावत्	इत्तिअम्	इतना
बृहस्पति	विहप्फइ	विफै
पितृगृह	पिइघर, पिइहर	पीहर
सूतिगृह	सूइघर, सूइहर	सोहर[1]

कतिचिन्नामानि तु संस्कृतादेव सरलेन मार्गेण हिन्दीभाषायां प्रविष्टानि न तु प्राकृतक्रमेणेति तेषां स्वरूपपर्यालोचनेन सुस्पष्टीभवति। यथा—

संस्कृतम्	प्राकृतम्	हिन्दी
लोक	लोअ	लोग
स्नेह	सिणेह	सनेह
स्वप्न	सिविण	सपन, सपना
भर्ता	भत्ता	भरता, भरतार, भतार
आचार्य्य	आरिओ, आअरिओ	आचारज
धैर्यम्	धिज्जाम्	धीरज
पन्था	पहो	पंथ
समर्थः	समत्थो	समरथ
कीर्ति	किता	कीरति
सूर्य	सूरिओ, सूरो, सूज्जो	सूरज
पक्व	पिक्क	पका
तृण	तण	तिन, तिनका
ऋषि	इसी	रिसि
नयन	णय	नैन
सर्वज्ञ	सव्वज्ज	सरवज्ञ
वैद्य	वैज्ज	वैद

इत्यादि।

अत्र हि स्फुटमेव प्रतीयते यत् हिन्दी-भाषायां प्रयुज्यमानस्य "लोग" शब्दस्य "लोअ" शब्दाऽपेक्षया लोकशब्देनैव स्फुटः सम्बन्धः, तेन "लोक" शब्द एव साक्षाद् "लोग" रूपतां गतः न तु "लो अ" क्रमेण। तथैव "स्नेह"

---

१. केचित्तु सुवकरशब्दात् "सुहअर" इति प्राकृतक्रमेण "सोहर" शब्दं व्युत्पादयन्ति तदसमीचीनमिव भाति, लोकेसूतिगृहेणैव साकं तच्छब्दस्य सम्बन्ध-दर्शनात्, किंच नैहर (ज्ञातिगृह—नाइहर) मेहर (मातृगृह—माइघर, माइहर) उपर्युक्त "पीहर" शब्दवच्च तन्निर्वचनसंभवात।

शब्दादेव "सनेह" शब्दस्योत्पत्तिः सम्भाव्यते न तु "सिणेह" शब्दात् ।

इतिहासक्रमे जाग्रत्यपि साक्षात् संस्कृतात् हिन्दीभाषायां शब्दग्रहणे को हेतुरिति विचारे तु इदमेवमनुमीयते यद् भारतस्य शिक्षाभाषा संस्कृतमेवासीत्, तेन संस्कृतभाषया लोकानां सम्बन्धो दृढतर इति संस्कृतशब्दाः प्राकृताऽपेक्षया झटिति तेषां मतौ प्रतिभासन्ते । ते च पुनरपि प्रकारान्तरेणापभ्रष्टतां गच्छन्तिस्मेति । कतिचित् प्राकृतानां प्रकृत्यपेक्षया हिन्दीभाषायां प्रकृतिवैलक्षण्यमपि प्रतीयते तत एव । यथा प्राकृतेऽनेके स्वरा व्यंजनाव्यवहिता बाहुल्येनोपलभ्यन्ते । हिन्दीभाषायां त्वल्पप्रयोगा एव ते ।

किंच व्यक्तिनामान्यपि प्राकृते परिवर्तनं गतानि-यथा शकुन्तला-सउन्तला, राधा-राहा, इत्यादि । हिन्दीभाषायान्तु व्यक्तिवाचकाः शब्दाः केचित्कठिना एव परिवर्तिता दृश्यन्ते यथा कृष्ण-कान्ह; कान्हा,-कन्हैया, पद्मनाभ-पदुमनाभ, विष्णु-विष्नु, विसुन, शत्रुघ्न-शत्रुहन, शत्रुघन इत्यादि ।

अन्ये तु प्रायेण व्यक्तिवाचका न परिवर्तिताः । तदित्थं संस्कृतेन साक्षात् सम्बन्धोऽपि हिन्दी भाषायां बाहुल्येनोपलभ्यते ।

इदं चास्मदुक्तं तदा विशेषेण दृढीभविष्यति यदा हिन्दीभाषायां एकस्यैव शब्दस्य द्विविधानि रूपाणि पर्यालोच्येरन्, तत्रेकं रूपं प्राकृतक्रमेणागतम् । अपरन्तु साक्षादेव संस्कृतादागतम् । यथा—

संस्कृतम्	प्राकृतक्रमेणागतम्	साक्षात्संस्कृतादागतम्
चक्र	चक, चका	चकरा, चक्कर
व्याघ्र	बाघ	बघेरा
हृदय	हिय, हियरा	हिरदा
स्त्री	तिय	तिरिया
प्रिय	पिय, पिया	पियारा, प्यारा[1]
कर्म	काम	करम
घर्म	घाम	गरम
अग्नि	आगि	अगनि
कार्य	काज	कारज
मार्ग	मग	मारग

---

१. प्रियशब्दादेव संस्कृतात्साक्षादागतावेतावित्यभिप्रेमः न तु "प्रियकर" शब्दात्, गुणवाचक "प्यार" शब्दस्य "प्रियकर" शब्देन साकं सम्बन्धविरहात् ।

संस्कृतम्	प्राकृतक्रमेणागतम्	साक्षात्संस्कृतादागतम्
दीर्घ	दीहा	दीरघ
दर्प	दाप	दरप
तीक्ष्ण	तीखा	तीच्छन

इत्याद्याः शब्दाः ।

आधुनिकाः हिन्दी-भाषालेखकाः संस्कृतशब्दान् स्वस्वरूपेणैव प्रायेण गृह्णन्तीति तेषामुदाहरणानि नात्रोपात्तानि, अपि तु हिन्दी-भाषायाः प्राचीनैः कविभिर्यानि शब्दस्वरूपाणि प्रयुक्तानि तान्येवात्र संगृहीतानि । तेन चेदं दृढीभवति यत् संस्कृतभाषया जनानां दृढतर आसीत् सम्बन्धः, तत एव पुनः पुनः संस्कृतशब्दोच्चारणाय ते प्रयतन्ते स्म । पुनश्च प्रकृत्या यदपभ्रंशान्तरं सम्पन्नं तदपि हिन्दी भाषायां गृह्यतेस्म ।

इत्थं रूपद्वयमपि भाषायां प्रविष्टम् ।

बहवश्च संस्कृतशब्दाः तथाविधा अपि स्पष्टमुपलभ्यन्ते ये प्राकृते रूपान्तरं गताः किन्तु हिन्दी-भाषायां प्राचीनैरपि कविभिः स्वस्वरूपेणैव संगृहीताः । यथा—

संस्कृतम्	प्राकृतम्	हिन्दी
प्राकृत	पाउअ	प्राकृत
अधिक	अहिअ	अधिक
उदक	उदअ	उदक
भोजन	भोअण	भोजन
विद्या	विज्जा	विद्या
राज	राअ	राज
धेनु	धेणु	धेनु
नदी	नई	नदी
अंगार	इंगाल, अंगाल	अंगार
औषध	औसढ	औषध
कदम्ब	कलंब, कअंब	कदम्ब
गद्गद	गग्गर	गद्गद
चिकुर	चिटुर	चिकुर
चिह्न	चेधं	चिह्न
वृंदावन	बंदावन	वृन्दावन
देवर	देअर	देवर
पीयूष	पेउश	पीयूष

इत्यादि ।

तेनापि हिन्दी-भाषायाः संस्कृत-भाषया साक्षात् सम्बन्धः सुदृढो भवति।

ये खलु हिन्दी-भाषायामपि कवयितुं प्रवृत्ताः कवयः तेऽपि संस्कृत भाषयैव शिक्षिता आसन्निति बलात् संस्कृतशब्दास्तन्मुखान्निःसरन्तिस्म। तत एव ते क्वचिदपभ्रंष्टान् शब्दान् प्रयुञ्जते क्वचिच्च मुख्यान् संस्कृतशब्दान्। कविशिरोमणेः श्रीतुलसीदासगोस्वामिन एव कतिचिदुदाहरणान्यत्र दर्शयामः—

अपभ्रंश-प्रयोगः	शुद्ध-प्रयोगः
आनेहु फेरि वेगि दोउ **भाई**।	तब हनुमन्त कहा सुनु **भ्राता**।
सरग नरक जहँ लगि व्यवहारू।	तात **स्वर्ग** अपवर्ग सुख, धरिय।
कहि प्रिय बचन राम **पगु** धारे।	गुरु—**पद**पदुम हरषि सिरनावा।
रिस अति बढ़ि लघु चूक हमारी।	राग **रोष** इरिखा मन माहीं।
सकहुं **पूत** पति त्याग।	मैं पुनि पुत्र वधू प्रिय भाई।
गावहिं मंगल कोकिल **बयनी**।	बचन न आव नैन भरि बारी।
तात पितुहि तुम प्रान—**पियारे**।	प्रान—**प्रिया** केहि हेतु रिसानी।
मुदित भये लहि लोचन **लाहू**।	हानि **लाभ** जीवन मरन, जसु।
करहु हरषि **हिय** रामहि टीका।	अंडनि कमठ—**हृदय** जिहिं भांती।

किमन्यदेकस्मिन्नेव पद्ये-अपभ्रंशशब्दः शुद्धशब्दश्च गोस्वामिनः कवितायां बाहुल्येन दृश्यते। यथा—

"**सब** के संयत **सर्व** हित करिय प्रेम पहिचान"।

श्रद्धा **विना** धर्म नहि होई। **बिनु** महि गंध कि पावइ कोई।

"गुरु **गृह** बसहुं रामु तजि **गेहू**"

कामिहि नारि **पिआरि** जिमि, लोभिहि **प्रिय** जिमि दाम।

तिमि रघुनाथ निरन्तर **प्रिय** लागहु मोहिं राम।

इत्याद्या बहुशो द्रष्टव्याः।

अन्येषामपि कवीनां कवितासु संस्कृतशब्दबाहुल्यं दृश्यते।

यथा बिहारिणः—

"**नभ** लाली चाली **निशा** चटकाली धुनि कीन"

"आये बनमाली न" "मकराकृति गोपालके", स्तन मन नयन नितम्ब को"

एवमेवातिप्राचीनायामपभ्रंशपदवाच्यायां भाषायामपि साक्षात् संस्कृतस्य शब्दा व्यवहृता दृश्यन्ते। यथा—

काणण सिरि सोहइ अरुण नव पल्लव परिणद्ध।
नं रत्तं सुय पावरिय वहु पिययम संबद्ध।
ढोल्ला मंह तुहं वारिआ मा कुरु दीहा माणु।
णिद्दए जमिहि रत्तड़ी दड़वड़ होइ विहाणु।

इदं चातीवचमत्कारकं यत् प्राकृतक्रमेणागता बहवः शब्दा अद्य ग्राम्यतां गताः, तत्स्थाने च संस्कृतशब्दा एवाद्य प्रयुज्यन्ते। यथा—वृक्ष-रुक्ख, रूख इति क्रमः। अद्य तु 'रूख' शब्दो ग्राम्यतां गतः, वृक्षशब्द एव प्रयुज्यते। 'नूपुर' शब्दः णउर, णिउर, नेवर-रूपतां गतोऽपि ग्राम्यतया त्यक्तः, अद्य-नूपुरशब्दमेव प्रयुञ्जते शिष्टाः। 'छाह' शब्दो ग्राम्यः, परं छायैवाद्य समाश्रीयते। कियदुदाहरामः, अद्यत्वे प्रचलितेयं हिन्दीभाषा संस्कृतबहुलैव।

इदं हिन्दीभाषामधिकृत्य दिङ्मात्रमुदाहृतम्, भारतस्य प्रायेण सर्वास्वपि प्रान्तीयभाषासु पर्यालोच्यमानास्वियं दशोपलभ्यते यद् देशीय-शब्दाः क्रमेण विरला भवन्ति, संस्कृतशब्दाश्चाधिकाधिकं प्रविशन्ति। इदानीन्तनीं च दशामवलोक्य पुरातनेऽपि काले अनुमितिः प्रवर्तते यथा अद्येमाः सर्वा अपि भाषाः संस्कृतभाषामुपजीवन्ति, तथा प्राक्तनीभिरपि सर्वदेशीयाभिर्भाषाभिः संस्कृतमेवोपजीवितमासीदिति।

संस्कृतस्य महिमैव कोपि तादृशः यत् तदीयाः शब्दा न जीर्णा भवन्ति, न ग्राम्यतां गच्छन्ति, न वा भाषातो बहिर्भवन्तीति। तेन च संस्कृतस्यादि-भाषात्वं विस्पष्टमनुमेयं भवति चक्षुष्मताम्। अस्तु!

"संस्कृत-भाषाविज्ञानम्" इति विषयमवलम्ब्य निबद्धुमहं प्रवृत्तः। संस्कृतग्रन्थेषु भाषाविज्ञानं कुत्र कुत्र कियदुपलभ्यत इत्येव मे प्रतिपाद्य-मासीत्। भाषान्तरेषु (हिन्दीभाषादिषु) विद्वद्भिर्निबद्धभाषान्तरोत्पत्ति-प्रकरणं च यदत्र निबन्ध आगतं तत्प्रसक्तानुप्रसक्तमेव। तत एव संक्षेपेणैव तद् विवृतम्। संस्कृते तु भाषोत्पत्तिविषये भाषाविकृतिविषये च यदुपलभ्यते तद्यथामति संगृहीतम्। अनेन निरूपणेन वाचयतामिदं सुस्फुटं भविष्यति यत संस्कृतभाषायां भाषाविज्ञानसम्बन्धेऽत्यतिप्रचुरा सामग्री समुपलभ्यते।

विकृतिनियमाश्चापि वैज्ञानिकरीत्या वैयाकरणैश्च नैरुक्तैश्च बहुलं संगृहीताः। एतानेव नियमानाधारीकृत्य व्याकरणम्, प्रातिशाख्यानि, शिक्षा, निरुक्तं च समवलम्ब्य यदि भाषाविज्ञानशास्त्रं समुद्भाव्येत तर्हि बहूलानि रहस्यानि प्रकटीकृतानि स्युः, सर्वा अपि च भाषाः संस्कृतादेव समुत्पन्ना इति सिद्धान्तः क्रमेण सुदृढः स्यात्।

भाषायाः स्वरूपसंघटनात्मकोत्पत्तिविषये तु यावदुपलभ्यते तन्त्रादिषु संस्कृतभाषायां तावदन्यत्र दुर्लभमेवेति निर्व्याजं दृढं ब्रवीमि।

अत्र विषये वर्तमानयुगशैल्या ग्रन्थानां निर्माणं संस्कृतस्य महते गौरवाय सम्पद्येत भाषाविज्ञानप्रणयिनश्च विद्वांसश्च ते यद्यर्थसमुपकृता भवेयुः।

वितरतु जगदीश्वरस्तादृशीं सुबुद्धिमवारपारीणेषु महाविद्वत्स्विति शम्।